मुद्रायन्त्रारूढाः सन्दर्भाः—

१। सटीकानुवादान्वितः धनुर्वेदः।

२। सटीकानुवादान्वितं वार्हस्पत्यमर्थशास्त्रम्।

३। शिवमहिम्नःस्तवभाष्यम् (शोधनावस्थायामस्ति)।

४। सटीकं चाणक्यशतकम् („ „)।

Printed by—ABINASH CHANDRA MANDAL,
SIDDHESWAR PRESS,
39-2, Shibnarain Dass Lane, Calcutta.

प्राप्तिस्थानम्

१। [illegible]

[illegible]

२। [illegible]

[illegible]

अवतरणिका ।

([illegible])

अथ कौटिल्य इत्येव सर्वत्र प्रसिद्धिमुपेतम् । अयमेव गुप्त इति विष्णुगुप्त इत्यपि कौटिल्यः । स्वनामधेयाख्येन कौटिल्येन सन्दर्भं विरचय्य प्रदीयमानमुख्यां [illegible] महोपकारं विदधातितम् । अयमसावपि कौटिल्यो [illegible] मान्यविशेषेण सर्वकीर्तितं । [illegible] नाम्ना प्रख्यातः । कामशास्त्रे वात्स्यायनेऽपि [illegible] हेतुरुपनिबद्धः । एष खलु (३२१ [illegible]) [illegible] विविधविद्यानिष्णातोऽपि [illegible] विष्णुगुप्तः [illegible] महाराज-चन्द्रगुप्त-[illegible] [illegible] । [illegible] भारतभूमिभागाऽलमकरोत् । [illegible] मौर्यसाम्राज्यस्य चन्द्रगुप्तनाम्ना [illegible] पाटलिपुत्रनगरे [illegible] [illegible] ।

[illegible]-टीका [illegible] न धान्यम् [illegible] धान्या. इति प्रसिद्धं । अतएव तेन [illegible] कौटिल्य विष्णुगुप्तोऽयम् । अथवा [illegible] [illegible] इति पाठेऽपि (१।४।११) [illegible] प्रसिद्धा [illegible] [illegible] इति' इति [illegible] । महाभारत शान्तिपर्वणि ६३ अ ६ श्लोः, 'कौटिल्य कौशलदक्ष [illegible]' । अत्र कौटिल्यमित्यत्र कौटल्यमिति पाठान्तरमप्यस्ति । 'कौटिल्य' [illegible] [illegible] ।

भुव भोक्ष्यन्ते इत्युक्तं नवमस्कन्धे। 'ये बार्हद्रथभूपालाः भाव्याः भोक्ष्य-वत्सर'मिति। ततः पञ्चप्रद्योतनाः अष्टत्रिंशतं. शिशुनागाश्च षष्ठ्युत्तरशतत्रयं, भोक्ष्यन्ते पृथिवीमित्यत्रैवोक्तत्वात्'। अनेन परीक्षित जन्मतोनन्दराज्याभिषेक-पर्य्यन्त (१४६८) एतत्परिमित-कालस्य व्यवधिर्भवति। परीक्षित समकालिकमागधवंशीयमार्जारितः रिपुञ्जयभूप यावत् विंशतिसंख्याका भूमिपालाः सहस्रसम्बत्सरकालम् अवनिं बुभुजिरे, ततः परं पञ्चप्रद्योतनाभिधाना भूमिपालाः (१३८) इयतःकालान्। ततोऽपि शिशुनागनृपालाः (३६०)-स ख्याकाब्दान्। एतेन (१२००+१३८×३६०=१४६८) तेषां भूभोगस्य कालोज्ञेयः। ततः कलेर्द्वादशशताब्देषु व्यतीतेषु परीक्षितो नामा नृपोजन्म लेभे। ततश्च (१४१४)-अब्देभ्यः परं नन्दनामानोनृपा अभुवन्। तेनच नवनन्दानां राज्यकालः (१००) वर्षात्मक। यतोऽप्येतेषां समष्टीकरणेन (१२००×१४६८+१००=२७६८) कलेः सम्वत्सरेष्वतीतेषु मौर्य्यश्चन्द्रगुप्तोराज्याभिषिक्तोऽभूत। एवमेव विष्णुपुराणे भागवतेचोक्तम्। सम्प्रति (५०२६) कल्यब्देभ्य (२७६८) इयदङ्केषु वियुक्तेषु (२२०६) इयत्यः संख्या भवन्ति। तत्पूर्व्वं मौर्य्यस्य सिंहासनाधिरोहणमभूत। भागवत-व्याख्यानकृता भगवच्छङ्करणेन विश्वनाथेन, स्वामि-श्रीधरोत्काद्विगयेऽस्मिन् अन्यदुक्तम्। तेनानयोरनैक्यम्। यथा "एतद्वर्षसहस्रमित्येतेषां संख्या प्रमाणी कर्त्तव्या। परीक्षित समकालवर्त्तिमार्जारिप्रभृतीनां आ नन्दात् भोगकालसंख्यान्तु किञ्चिन्न्यून सार्द्धसहस्र वर्षाणि भवन्ति. तत्तेषां बाहद्रथप्रद्योतानां विनाप्यानन्तर्य्येण संख्यातानीति ज्ञेयम्। तथाच भागवतश्लोके यत्पञ्चदशोत्तरशताधिक-सहस्रसम्वत्सरात्मकं कालं उक्तं। स एव सम्यक्प्रमाणार्ह इति। परीक्षित-समकालिक मागधवंशीय मार्जारिप्रभृते-नन्दनृपराज्याभिषेक-पर्य्यन्त तद्भोगकाल संख्यानुसारेण किञ्चिन्न्यून सार्द्धसहस्राब्दाः। स्वाम्युक्तसमयश्च तथैवोन्नेयः। किञ्च तत्पक्षस्य राज्यभोगकालानन्तरमपरस्य तद्भोगकालोऽदीर्घं स्यात्। तादृशपरि-

कल्हणमतं-विरुद्धं मनुमत्। येन येन नृपेण यावान् कालः शासने व्यनीत, तेन कालेनागस्य तरङ्गिणी मुख्य राज्यकाल संयुक्तः सन् दिग्विजयप्रदर्शं तरङ्गसमर्पित भूतानीति। भूगोलकालाद्यवगोलकाल पूर्वमिति। यतोऽहं कल्पतः कृतिं यावत् भूमि गोलकालः। त्वत्वान्तरा गोनर्द तावदर्द पञ्चं राज्यमस्वेति कल्पौ गोनन्दा अभूवन्। भू गोन गाथा गोनर्दादयः। राज्य-गोनन्दान्तेन्यो विधुरा स्थूलपं स्वाका। काश्मीरे प्रथमो भू-गोलकाल समष्टि संख्यादिरिगद्वये (११६४) इत्यतोऽन्यत्र गुरु- कलौ कलत (१४६८) संख्यात वाक्यादि-गोनन्दादिष्वनुमिनेषु (३८२) इत्यङ्केषु विधुरम्बेषु (१४६—३८२=१११४)-एतनन्तरास्य दरोग-दर्शित-तरङ्गाणां राज्य-काला सञ्चिता अभूवन्। अनेन कौशिक-कालमितेनैव दर्शितवन्तः (१११४ भवत्येन्यः पर अब्दपूर्व कालेन। एतस्य कलेर्वर्षेषु (१३३४) हायनेषु परीक्षितः स्वोत्पत्तिं प्राप्तवान्। तदोत्पनन्दः कांपद्य राज्यशासनं चक्रे। तेषां संयोगे (१११४+१३३४= १००+२४१०) कल्पाब्दे अब्दतुपोत्पन्नोऽभूत्। सम्प्रति कल्पाब्दाः ४०४६ —२४१४=१६३२) इत्थं प्राक् कल्पतुल्यादिमितंक-कालोऽविदितः। तत्र गोनन्दतरङ्गेणैः "आरभ्य भवतोऽस्य शासनाब्दादिमितेवं। तावद्वर्ष-सन्तु तत एकत्रोत्सवाह"। भारतयोर्मध्ये (१३३४—४६) परीक्षितजन्मतः अब्दाराप्त्यादिमितकास दाशन् १११४ इत्यतोऽन्यत्र स्तुतिरिति। अतश्च मनुः स से स्वरीते द्विधा काले मनुना वर्णिता यथा। तत्तत्वन्तु तत्रैव राज्यकाले मन्वन्तरस्य मतोऽभिना इति। तस्मिन् काले कल्प "यदा देवर्षयः स्वतन्त्रं विचरन्ति हि। तदा तु कृष्णस्तु कथं द्वारकायाम् इत्यत्र * सप्तर्षयो मघायुक्तिकाले कलेर्द्विशत-वर्षसंयुक्तम्"। कल्पाब्दो स्वोत्पन्नो तस्य प्रवेशे। युधिष्ठिर राज्यकाले कृते द्वारिह इत विनाशश्च कल्पे। इति संदेह। महाभारते भारतिरुक्तिरास्य "यथा इत्यनेन लिङ्ग वर्तिन-वर्णितमसनवर"। इत्येवमुक्ता युधिष्ठिरः प्र गोनन्दाद्वेतिच राज

भुव मोक्ष्यन्ते इत्युक्तं नवमस्कन्धे। 'ये बार्हद्रथभूपालाः भाव्याः साहस्र-वत्सर'मिति। ततः पञ्चप्रद्योतनाः अष्टत्रिंशत्. शिशुनागाश्च षष्ठ्युत्तरशतत्रयं, *मोक्ष्यन्ते पृथिवीमित्यत्रैवोक्तत्वात्*'। अनेन परीक्षित जन्मतोनन्दराज्याभिषेक-पर्य्यन्त (१४९८) एतत्परिमित-कालस्य व्यवधिर्भवति। परीक्षित समकालिकमागधवंशीयमार्जारितः रिपुञ्जयभूपं यावत् विंशतिसंख्याका भूमिपालाः सहस्रसम्वत्सरकालम् अवनिं बुभुजिरे, ततः परं पञ्चप्रद्योतनाभिधाना भूमिपालाः (१३८) इयतःकालान्। ततोऽपि शिशुनागनृपालाः (३६०)-संख्याकाब्दान्। एतेन (१२००+१३८×३६०=१४९८) तेषां भूभोगस्य कालोज्ञेयः। ततः कलेर्द्वादशशताब्देषु व्यतीतेषु परीक्षितो नामा नृपोजन्म लेभे। ततश्च (१४१५)-अब्देभ्यः परं नन्दनामानोनृपा अभुवन्। तेनच नवनन्दानां राज्यकालः (१००) वर्षात्मक। यतोऽप्येतेषां समष्टीकरणेन (१२००×१४९८+१००=२७९८) कलेः सम्वत्सरेष्वतीतेषु मौर्य्यश्चन्द्रगुप्तोराज्याभिषिक्तोऽभूत्। एवमेव विष्णुपुराणे भागवतेचोक्तम्। सम्प्रति (५०२६) कल्यब्देभ्य (२७९८) इत्यङ्केषु वियुक्तेषु (२२०६) इयत्यः संख्या भवन्ति। तत्पूर्व मौर्य्यस्य सिंहासनाधिरोहणमभूत्। भागवतव्याख्यानकृता भगवच्छरणेन विश्वनाथेन, स्वामि-श्रीधरोल्कादिभिरप्यस्मिन् अन्यदुक्तम्। तेनानयोरनैक्यम्। यथा 'एतद्वर्षसहस्रमित्येवैषा संख्या प्रमाणी कर्त्तव्या। परीक्षित समकालवर्त्तिमार्जारिप्रभृतीनां आ नन्दात् भोगकालसंख्यास्तु किञ्चिन्न्यून सार्द्धसहस्र वर्षाणि भवन्ति, तत्तेषां सहस्रमध्यमपतीनां विनाश्यानन्तरमेव संख्यातानीति ज्ञेयम्। तथाच भागवतश्लोके यत्पञ्चदशोत्तरशताधिक-सहस्रसम्वत्सरात्मकः काल उक्त। स एव सम्यक्प्रमाणाह इति। परीक्षित समकालिक मागधवंशीय मार्जारिप्रभृति-नन्दनृपराज्याभिषेक-पर्य्यन्त तद्भोगकाल संख्यानुसारेण किञ्चिन्न्यून सार्द्धसहस्राब्दाः। स्वाम्युक्तमतञ्च तथैवोन्नेयः। किन्त तत्रैकस्य राज्ञो राज्यभोगकालानन्तरमपरस्य तद्भोगकालोऽपि स्यात्। तादृशपरि-

सामान्यतस्तत्-निरूपणं सहृणम्। येन येन नृपेण यावान् कालः शासने व्यनीत, तेन कालेनाप्यस्य परवर्त्तिनो नृपस्य राज्यकाल संयुक्त सन् किञ्चिन्न्यूनमर्द्धसहस्रवर्षाणि भूतानीति। भूभोगकालाद्राज्यभोगकाल पृथगिति। तथाहि जन्मनः भूमिं यावत् भूवि भोगकालः। तत्रचान्तरा गैयर्थं शास्त्रं चार्द्धवर्षं राजस्वस्येति महर्षौ भोगकाला अभुवन्। भू-भोग कालाः, शैशवादय। राज्य-भोगकालास्तेभ्योऽविपुलाः स्मृताः कथाकाः। मार्जारि प्रमुखानां भू-भोगकाल-समष्टि संख्यापरिणामे (१११५) इत्यन्तोऽब्दा अभुवन्, तद्भोगकालत (१४६८) संख्यात बाल्यादि-भोगकालेष्वनुमितेषु (३५३) इत्यङ्गेषु वियुक्तेषु (१४६८—३५३=१११५)-एतमब्दा-पञ्चदशोत्तर-एकाधिक-सहस्रात्मा राज्य-काला' सुस्थिरा अभुवन्। अनेनच श्रीविष्णु-भागवताभिप्रेतेन परीक्षितजन्मनः (१११५)-वर्षेभ्यः परं नन्दनृप आसीत। एतच्च कलेर्व्यतीतेषु (१२११) वर्षेषु परीक्षित स्वोत्पत्तिं प्राप्तवान्। ततोऽनन्तरम्ब्दा अयं नन्दस्य राज्यपालनं चक्रे। तेषां संयोगे (१११५+१२१२= १००+२४३०) कल्यब्दे चन्द्रगुप्तोनृपोऽभूत्। सम्प्रति कल्यब्दा, ५०१६ —२४१४=२६६२) इत प्राक् चन्द्रगुप्तस्याविर्भाव-कालोनिश्चितः। तत्र श्रीमद्भागवतेऽपि 'आरभ्य भवतोजन्म यावन्नन्दाभिषेचनं। तावद्वर्षसहस्रन्तु ज्ञेयं पञ्चदशोत्तरम्'। भागवतोक्ते, (१२।२—२६) परीक्षितजन्मतः नन्दराज्याभिषेककालं यावत् (१११५) इत्यन्तोऽब्दा स्युरितिदिक्। अपरञ्च तत्रैव 'ते त्वदीये द्विजा काले अधुना चाश्रिता मघाः'। तत्तत्वस्तु तदीय राज्यकाले मघानक्षत्र समाश्रिता इति। तस्मिन् वाक्यम् वचनं 'यदा देवर्षयः सप्त मघासु विचरन्ति हि। तदा प्रवृत्तस्तु कलि द्वादशाब्द शतात्मकः" 'मघायां मघास्थिति-काले कलेर्द्वादश-शतमिताब्दाः'। आभ्यां श्लोकाभ्यां स्पष्ट प्रतीयते। नृप-परीक्षित राज्यकाले कले द्वादश शत मिताब्दा अतीता इति ज्ञेयम्। महाभारते आदिपर्व्वणि च "इमा. प्रजाश्च पिता अभि-रक्षितवन्तः'। इत्येवमुक्त्वा नृपपरीक्षितः षट् त्रिंशद्वर्षाणि राज्य

पालनमकार्षीत्। तत्र भारतटीकायां नीलकण्ठभट्टैरुक्तं "षष्टिं वर्षाणि जन्मतः षष्ठिवर्षं यावत् प्रभु राज्यमभात्। अपालयत् पालितवान्। षट्त्रिंशद्वर्षे लब्धराज्यस्य चतुर्विंशतिवर्षपर्यन्तं तत्पालनस्य-दृष्टत्वात्' इति।

हे जनमेजय! तव पिता परीक्षितो जन्मतः षष्ठिवर्षं यावत् प्रजापालन-मकार्षीत्। जन्मतः षट्त्रिंशद्वर्षवयसः कालात् चतुर्विंशति वर्षं प्रजापालनं कृतवान्। तेन प्रागुक्तमायातम्। 'तदा कलेरतीताब्दाः (१२००) परीक्षित जन्मतः' अब्दानां राज्याभिषेक-कालान्तराणि (१११५) वर्षाणि राज्यकालाः (१००) एवमब्दाः। एतेषां मेलनमध्यास्ते (१२००)+१११५+१००= २४१५) अब्दा बोध्याः। सम्प्रति परीक्षित-जन्मकालात् तद्राज्यकाला (३९) अब्दाः परिहृताः। तदा २४१५—३९=२३७६) एतं वर्षाणि कलेर-तीतानि। तेन (५०१६) कल्यब्दात् (२३७६) परिहृतात् शेषात् (२६४०) अतीतात् चन्द्रगुप्तो नृपोऽभूत्। विष्णुपुराणेऽपि "यावत् परीक्षितो जन्म यावन्न-न्दाभिषेचनम्। तावद्वर्षसहस्रन्तु ज्ञेयं पञ्चदशोत्तरम्।" एतेन परीक्षित-जन्मकालान्नन्दराज्याभिषेककालः पञ्चदशोत्तर-सहस्रवर्षात्मकः प्रतीयते। तथाच परीक्षित-राज्याभिषेकात् परं कलेर्द्वादश-शतवर्षाण्यतीतानि। तदेवाह विष्णुपुराणे, चतुर्थांशे 'तदा प्रवृत्तश्च कलिर्द्वादशाब्दशतात्मकः"। तत्रैव विष्णुपुराणे "महापद्मः तत्पुत्राश्च एकं वर्षशतमवनिपतयो भविष्यन्ति। नवैव तान् नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यन्ति। तेषामभावे मौर्याश्च पृथिवीं भोक्ष्यन्ति। कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति"। एतेनैतत्-सिद्धं यथा (१२००+१०१५+१००) एषां संयुक्तेषु संख्यायोगेषु पञ्चदशोत्तर-त्रयोविंशति-शतमिता अब्दा भवन्ति। कलेर्गतेषु (२३१५) समये चन्द्रगुप्तो-ऽभवत्सम्राट्। कौटिल्यश्च तत् सामयिककारी महापुरुषः। प्रमाणान्तरमपि यथा विष्णुपुराणे आम्नायते च —"सप्तर्षीणाञ्च यौ पूर्वौ दृश्येते उदितौ दिवि। तयोस्तु मध्ये नक्षत्रं दृश्यते यत् समं निशि। तेनैव ऋषयो युक्तास्ति-ष्ठन्त्यब्दशतं नृणाम्॥ ते त्वदीये द्विजाः काले अधुना चाश्रिता मघाः"॥

ईदृशं वर्णितम् । [illegible] कौरविक-काले ऋषिस्ते मघानक्षत्रे प्रथमोदिते इत्येवं । [illegible] प्रदेशमस्थितवत्यादि [illegible] । तमेवेन युक्तेन सप्तर्षिमण्डलेन मनुष्यपरिमाणेन शतवर्षाणि यावत् स्थीयते । तेनायुना तत्काले कस्मिन् सप्तर्षि मघानक्षत्रस्थिताः [illegible] । अतएव 'यदा देवर्षय सप्त' इत्यादि प्रायुक्तेन श्लोकेन प्रतीयते सप्तर्षिमण्डलं मघानक्षत्रा- [illegible] क्रमेणोदयगत-वर्तिनाऽभूः इति बोध्यम् । तत्र "यदा मघाभ्यो यास्यन्ति पूर्वाषाढां महर्षयः । तदा नन्दात् प्रभृत्येष कलिर्वृद्धिं गमिष्यति ।" यदा तु सप्तर्षिमण्डलं मघामुक्त्वा परित्यज्य इतरेण पूर्वाषाढामन्तं यास्यति तस्मिन् काले नन्दाद् राज्याभिषेकोऽभविष्यति । एवं कलिरपि वृद्धिं यास्यति च । केचिच्च मते सप्तर्षिमण्डलस्य प्रत्यक्षाभाव इति । तेन सप्तर्षिमण्डलस्य नक्षत्रे समये पृथक् नक्षत्र भुक्तं तस्य गतिः प्रायोपगा कालेन शतानि पुनः सामान्या गतिः । सत्येव यद्यपि क्रियमाणभावेऽपि कतिपयर्यकालेन गतिरनुमीयते । यथा केवल देशान्ता विशालदर्शनेऽस्मिन् एकादशमहस्त लक्षनुमनात् यावत् स्थितिं मन्यते । तेन तेषां गुरुमागतिर्निर्णयते । अथयच सप्तर्षीणां नक्षत्रातिक्रमकालः द्युवर्षीस्या (११५) वत्सरमतः । तेन कलामतौ यदद्रागतं तदाहुत्यते (क) विष्णुपुराणमते (१११५) कल्पवर्षेषु चन्द्रगुप्तोऽभूदोऽभूत् (ख) मत्स्यपुराणीय नाक्षत्रिकगणनानुसारेण (१५००) कल्पवर्षेषु स एव नृप, (ग) भागवतमेवानुसारेण (२३७६) कल्पवर्षेषु । (घ) भागवतीयनाक्षत्रिकगणनानुसारेण (१५००) कल्पवर्षेषु । परीक्षितजन्मतो राज्यप्राप्तिकाल ३६) संख्यापरिहारे विष्णुपुराणोपलानुसारेण नृप गुप्तस्य राज्यलाभः (१११५) कल्पवर्षेषु । पुराणप्रणेतृ ऋषयः स्थूलगणनया परिपुष्टिमलभमाना ज्योतिःसूक्ष्मगणनया कालावधारणमकार्षुः । अतोऽज्योतिषिक-सूक्ष्म-गणना तदानीं समीचीनः । अस्त्विह सप्तर्षिचार-प्रसङ्गे वृहत् संहितायामुक्तम् । तद्यथा—"आसन् मघासु मुनयः शासति

पृथ्वीं युधिष्ठिरे नृपतौ। षड्-द्विक-पञ्च द्वियुतः शककालस्तस्य राज्ञश्च॥" मुनयो मरीच्यादयः सप्तर्षयः। शासति परिपालयति पृथ्वीं भारतवर्षम्। नृपतौ युधिष्ठिरे सति। मघासु मघाख्यनक्षत्रेषु आसन् अध्यतिष्ठन्। अत्रार्थे वृद्धगर्ग आह "कलि द्वापर-सन्धौतु स्थितास्ते पितृदैवतम्। मुनयो धर्म्मनिरताः प्रजानां पालने रताः,, इति। कलिद्वापर सन्धौ द्वापरावसाने कलिप्रारम्भे ते सप्तर्षयः। पितृदैवतम् मघाख्यनक्षत्रमाश्रित्य स्थिताः। तस्य युधिष्ठिरस्य राज्ञः। षड्-द्विक-पञ्च द्वियुतः शककालोऽगतः। शकनृपतेरब्दोऽतीतः। सहस्रद्वयेन पञ्चभिः शतैः षड्विंशत्यधिकैः (२५२६)-शकनृपतेः कालोयुक्तः कार्य्योवा। एवं कृते यद्भवति तावद्वर्षवृन्दम् वर्त्तमानकालं यावद्गतम्। तस्य च शतेन भागमाहृत्य यदवाप्यते तानि नक्षत्राणि मघादीनि भुक्तानि। यच्छेष तानि वर्षाणि भुज्यमाने नक्षत्रे तेषां प्रविष्टानां गतानि,। तत्रैवान्यत् प्रमाणम्। "एकैकस्मिन्न ऋक्षे शतं शतं ते चरन्ति। वर्षाणाम्। प्रागुदयतोऽप्यविवराद्रुजूनयति तत्र संयुक्ताः" ॥ ते सप्तर्षय। एकस्मिन् एकस्मिंश्च ऋक्षे शत शत वर्षाण्यवरन्ति; तद्विषये काश्यपः—"शत शतन्तु वर्षाणाम् एकैकस्मिन् महर्षयः। नक्षत्रे निवसन्त्येते ससाध्वीका महातपाः।" ससाध्वीकाः सारुन्धतीकाः। ते मरीच्यादयोमहर्षयः। महातपास्तपःप्रभावसम्पन्नाः। अत्र च कामसूत्रसमाप्तौ श्लोकस्य भेच्छिन्नकविकल्परीत्या स्वसमयज्ञापकेन निरधारि तदुच्यते। यथा अर्थशब्दं पूर्वाचार्य्याणां मतानि सुविचार्य्य प्रणिनाय, यथा नन्दीय गोनर्दीय बाभ्रवीयांश्च निपयान् पर्य्यालोच्य कामसूत्र चकार। तथाहि "पूर्व्वशास्त्राणि संहृत्य प्रयोगानुपसृत्य च कालसूत्रमिदं यत्नात् सङ्क्षेपेण निवेशितम्,, इति। "बाभ्रवीयांश्च सूत्रार्थानागम सुविमृष्य च। वात्स्यायनश्चकारेद कामसूत्र यथाविधि।,, एतस्यार्थो यथा 'वा इत्यत्र व इत्यनेन 'वायु.' तस्य संख्याः पञ्चदशाः १५। अभ्रशब्देन शून्यं। पुनरस्य वाकारेन वरुणः तनूपल्या ज्योतिः परिभावया चतुर्विंशति २४। एवं रीत्या समन्विमलयायोगाः (१५०२४) एवमभवत्

'अङ्कानां वामतो गतिः' इत्येवं प्रणाल्या तेऽङ्काः—(४१०५१) स्युः। तदुपरि कार्यशब्देन द्वितीयवर्गः। तत्संख्या द्वौ २। द्वाभ्यां योगे—(४१०५१२) एताः समष्टिसंख्याः। कल्पवर्षाणि—४३२०००। तत्समयात् ४२०५१२—संख्याया विगुणाय (४३२०००—४२०५१२=११४८८) एते अङ्का अवशिष्टाः। ततः 'मा, गं, घं', इति विमृश्य घं—कलायाशब्देन विष्णुः तत्-संख्याः २२। भगशब्देन भगः तत्संख्या ८। एतयोर्मेलने ३०। अत्र इत्येतयोः संख्या द्वाविंशति, २२। ते द्वे सम्मिलिते ३०२२। अत्र पृथक् पृथक् निर्देशादङ्कानां वामतोगतिरिति रीतिर्नास्ति। ततः विज्ञानामङ्कानां वियोगो यथाक्रमं कार्यः। तथाहि—११४८८—अङ्कानां मध्यत ३०२२—अङ्का यावता कालेन विगुणाः स्युस्तावन्तोवियोगाः कार्याः। यथा (११४८८—३०२२+३)=२४२२ इत्यवशिष्टास्तः ३०२२ संख्या नैव विगुणाः स्युः। ततरामेव २४२२—संख्याकवत्सरे कौटिल्येन कामसूत्रं प्रणायि। कौटिल्य-वात्स्यायन-विष्णुगुप्तानां नाम्ना यथानामभेदेन बहुषु प्रामाणिकग्रन्थेषूल्लेखो दृश्यते। तथाच प्रशस्तपादभाष्यव्याख्याने न्यायकन्दल्यां श्रीधराचार्यैः 'तथाहि परमास्तिकौ पक्षिल-शबरस्वामिनौ नानुतिष्ठतः इत्यसम्भावनमिदम्" इत्याहुः। परमलमीत्यकारिका वाचस्पतिमिश्रे च पक्षिलस्वामीतिनाम्ना वात्स्यायनस्य व्यपदेशो न्यायवार्त्तिकटीकायामकृत। 'यदीय. सर्वविद्यानामिति' इत्यादिना वात्स्यायनभाष्यपूतश्लोकमधेयाम्ने ईश्वरप्रतिर्वितरूपेण तत्प्रकरणानुसारेण विद्यासमुद्दं यथकरदे दृश्यते। योगवार्तिके वैराग्यप्रकरणे वात्स्यायनस्य मुनेर्नामोल्लेखोऽस्ति। दशकुमारचरितस्याप्युपोद्घाते "अधीष्व तावद्दण्डनीतिं ... ...विष्णुगुप्तेन मौर्यार्थे षड्भिःश्लोकसहस्रैः संक्षिप्ता" इत्युक्तम्"। इदमिदानीमाचार्य विष्णुगुप्तेन कौमन्दीय षड्भिःश्लोकसहस्रैः संक्षिप्ता सैषा सम्यगनुपूर्वीयमाधा यथाक्रम क्रमेति"। कामन्दकेऽपि तथैव 'कौटिल्येन कोऽन्वय ...कृत." इति। एवमेव दण्डकस्य अपि 'ततो यत्सदाचरादि अन

शास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनित्येवं विद्यते। कामन्दकनीतेर्व्याख्यायां उपाध्यायनिरपेक्षाभिधाने क्वापि क्वापि स्थाने अर्थशास्त्रवाक्यानि उद्धृतानि सन्ति।

बौद्धाचार्य्य बुद्धघोषविरचितस्य विनयपिटकस्य 'समन्तप्रसादिका' नाम टीकायां महानामस्थविर-विरचित-महावंशव्याख्यानेष चाणक्यविषये वृत्तमस्ति। जैनसूरिपद्मनन्दिगणिप्रणीत 'ऋषिमण्डल-प्रकाशवृत्ति' नामकसन्दर्भेष चाणक्यतत्त्व समुद्धहितं विद्यते। कविवरकालिदासस्य रघुवंशे सहस्रसर्गेष (४११५०१६७)-श्लोकानामेवां श्रीमन्मल्लिनाथ कृतव्याख्यानेषु अर्थशास्त्र वाक्यानां समुद्धार. कृत। महाभारते शान्तिपर्वणि नीतिविषये वसुहोमं प्रति मान्धातुरुक्तिरेयं दृश्यते "बृहस्पतेर्मतं राजन् अधीतं सकलं त्वया। तथैवौशनसं शास्त्रं विज्ञातं ते नरोत्तम" इत्येवमर्थशास्त्र प्रतिपाद्य पुष्कला विषया स्तत्र सन्ति। त्रिवर्गविषये भारते बहुधा विषयाः वर्णिताः सन्ति। तथाच "यत्र धर्मस्तथैवार्थः कामश्चैवाभिवर्णितः। त्रिवर्ग इति विख्यातोगण एष स्वयम्भुवा।" 'त्रिवर्गोनीति वेदितामिति' अन्यत्रापि दृश्यते। त्रिवर्गश्च—धर्मार्थकामाः। अरिमित्रोदासीनाः। स्थानवृद्धिक्षयरूपाः। मन्त्रोत्साह प्रभुशक्तिरूपाः। भूमिमित्रहिरण्यादिरूपाश्चेति। नीतिवाक्यामृते सोमदेवसूरिभिरुक्तम्। तथाच "तथाचानुश्रूयते विष्णुगुप्तानुग्रहादनधिकृतोऽपि किल चन्द्रगुप्तः साम्राज्य-पदमवापेति" तत्र टीकाकृदिदमब्रवीत्। 'विष्णुगुप्तश्चाणक्य। मौरिककुलोत्पन्नश्चन्द्रगुप्तः। वृषलोऽपि, नन्दसुतत्वेन साम्राज्यपदमाप'। तत्रैव वृत्तमुद्दिश्येऽप्युक्तं 'श्रूयते हि किल चाणक्यस्तीक्ष्णदूत-प्रयोगेनैकं नन्दं जघाने ति'। हितोपदेशस्य विग्रहप्रकरणे एवमेवास्ति "नन्दं जघान चाणक्यस्तीक्ष्णदूतप्रयोगतः। तद्दूरान्तरितं दूतं पश्येद्धीरसमन्वितः"। तत्रैव वाक्यामृतेऽन्यच्च सूत्रं "अर्थशास्त्राध्ययनं वा।" एतस्य टीकाकारेण व्याख्यानमेवं कृतम् "अर्थशास्त्रं विष्णुगुप्तेन कृतं यत् तस्याध्ययनम्।" तदीययशस्तिलके महाकाव्ये द्वितीयाश्वासे तेनोक्तम्

विषमेव पारस्परीया मपि कुन्तला-नाम वारवनिता इव पुत्र-राज्यलाभाय चित्रवृष शराक-सलिलपानेनामराजं जघान। शूरसेन-देशे माथुरे वसन्त-मतिना शिवाक्ता-सक्तेन रञ्जिताधराभ्यां सम्चुम्बनेन सुरतविलासाभ्य-भूमिरं व्यापादयामास। दशार्णनगरे वृकोदरी नाम ललना विषलिप्तव्य-मणिना मदनार्णवनरेशम्। मगधदेशे मदिराक्षी नाम कामिनी विषाक्तलेप्य दर्पणेन मन्मथविनोद-नाम भूपम्। दक्षिणापथे पाण्ड्यदेशे चण्डरसा नाम महिषी कबरीपाश-निक्षिप्तशस्त्रिया सुधीरनामानं नृपालं जघान। कृत्स्नमेता-दृशं नीतिवाक्यामृते च राज्यरक्षासमुद्देशे विद्यते। तथैव क्षेमेन्द्ररचितायां कथामञ्जर्यामस्ति। नीतिवाक्यामृतटीकायान्तु ऋषिपुत्रक-कपिपुत्र-कौशिक-गर्ग-चारायण-दन्तिल-चाणक्य-गुरु-पालकी-भागुरि-भारद्वाज-राजपुत्र-राजगुरु-रैभ्य-वर्ग-वल्लभदेव-विशिष्टीक-हरदासेन शौनक प्रभृतीनां-नीतिविदां वाक्यानि समुद्धृतानि दृश्यन्ते। एतेषां विवृतिं नीतिवाक्यामृतव्याख्यायां प्रकाशयिष्यते।

सन्ति च 'यादवीय'वैजयन्त्यां, अभिधानचिन्तामणौ, भोजराजीय-नाम-मालायाञ्च कौटिल्यवात्स्यायनयोरैक्य-प्रकाशकानि यथा,—"वात्स्यायनो मल्लनागः कौटिल्यः चणकात्मजः। द्रामिलः पक्षिलस्वामी विष्णुगुप्तोऽङ्गुलश्च सः" (१) "वात्स्यायनस्तु कौटिल्यः विष्णुगुप्तोवरायकः द्रामिल पक्षिलस्वामी मल्लनागोऽङ्गुलोऽपि सः॥" (२) "कात्यायनोवर रुचिर्मेधाजिच्च पुनर्वसुः। कात्यायनस्तु कौटिल्यो विष्णुगुप्तोवरायकः॥" (३) यद्यपि कात्यायनइत्यत्र वात्स्यायन इति पाठोन स्वीक्रियते तदा विष्णु-पुराण-दर्शितवाक्य पञ्चतन्त्रक-वाक्यानां वैयर्थ्यं स्यात्। मौर्यचन्द्रगुप्तार्थ-मर्थशास्त्रं विरचयामासेति लोके प्रसिद्धिरित्येवं दण्डीवाक्यञ्च। ख्रीष्टाब्दात् पूर्वंशतकान्ते आसीद्वात्स्यायन इति नव्याः सूरयो वदन्ति। यत 'कर्त्तर्या कुन्तलः शातकर्णिः शातवाहन महादेवीं मलयवतीं जघान' इतिकामसूत्रे वदन् वात्स्यायनः (१३६) ख्रीष्टाब्दात् पूर्ववर्त्ती। तेन (२०६) ख्रीष्टा-ब्दात् प्राग्वर्त्ती भारतवर्षस्य पश्चिमप्रान्ते कृतराज्यानुशासनानां शातवा-

(११)

इमानी वंशेन शालकर्षिका समकालिक. किम्बा तदुत्तरकालिक आसीदिति दृढं ज्ञायते। एवं पुरातत्त्ववित्-मतेन कामसूत्र-न्यायभाष्ययोः प्रणेतुर्वात्स्यायनात् एवं प्राचीनः कौटिल्य इति प्रतीयमानत्वादर्थशास्त्रस्य द्वितीया वृत्तिकस्य भूमिकायामभिप्रायः। अपितु स्त्रीविषये अर्थशास्त्रे न्यायभाष्य-कामसूत्रयोरीक्षयापि सर्वत्र यथायुक्तं भेद् तानि तथापि केचनविषय् विषयाश्च तौल्यं दृश्यते। तथाच—

न्यायभाष्ये,

(१) प्रदीपः सर्वविद्यानाम् ... अर्थशास्त्रे, —विद्योद्देशे प्रदर्शिता।
(२) 'सदसद्विवेकम्' ... तथैवार्थशास्त्रे ।
(३) 'परमतमप्रतिषिद्धम्' ... ।
(४) 'अनुमितानियमोऽसौ' ... " " ।
(५) 'शास्त्रज्ञो नाम—' ... " " ।
(६) शास्त्रस्य लीलामये— ... " " ।

एवं कामसूत्रोक्त विषयं अर्थशास्त्रे बहु शास्त्रस्य सम्यक् न्यायो अनुक्रम स्पष्टीकरणम्। अर्थशास्त्रे यानि पारिभाषिकपदानि कानिचित् प्रयुक्तानि तानि पुनः कामसूत्रे प्रयुक्तं तत्तदर्थशास्त्राद्गृहीतानीति सूचयति कामसूत्रार्थशास्त्रयोः केषुचित्स्थलेषु तौल्यमपि यथा—

(१) कामसूत्रं प्रदीपम्'। अर्थशास्त्रम् ।
(२) 'तस्यास्य प्रकरणाधिकरणसमुद्देशः'। विद्यासमुद्देशः। विद्यासमुद्देशः।
(३) कौटिल्यविरचितम्। 'कौटिल्येन कृतम्'।
(४) 'विपुलेनार्थ वाच्यम्'। 'विपुलेनार्थ वाच्यम्'।
(५) विस्तरम्। विस्तरम्।
(६) 'कामोत्पत्तिसूत्रार्थ'। कामोत्पत्तिसूत्रार्थं अवगन्तव्यम्।

अन्यच्च सुधीवर श्रीश्यामशास्त्रिमहाभागैः अर्थशास्त्रस्य द्वितीयावृत्ति-भूमिकायामपि । एवमर्थशास्त्रात् कामसूत्रटीकायां यानि यानि वाक्यानि श्रीयशोधरेण समुद्धृतानि तानि सर्वाणि तत्र चार्थशास्त्रभूमिकायाम् प्रदर्शितानि । अपरञ्च "आयुर्दाय विष्णुगुप्तोऽपि नवमं शक्तिस्वामी सिद्धसेनश्च चक्रे" इति बृहज्जातकस्य सप्तमाध्याये । तद्व्याख्यानेन भट्टोत्पलेनोदलेखि "किन्तु विष्णुगुप्तेनापि चाणक्यापरनाम्ना एवमुक्तम् । 'नकुलमलघ्नं शुभमाह सत्य नभागभेदान् यवना वदन्ति । कल्याणभेदोनन्तथास्ति राशेः । अतिप्रसङ्गान्निवर्तितविष्णुगुप्त इति । बृहज्जातकस्यैकविंशति प्रकरणस्य-तृतीय-श्लोकव्याख्याने अत्र विष्णुगुप्तश्च यास्याचाहनु । 'कल्याणेति' । अनेन भट्टोत्पल-लेखेन चाणक्यविष्णुगुप्तौ भिन्नौ प्रतीयेते । अत्र विष्णुगुप्तपदेन ब्रह्मगुप्ताचार्य इत्यन्ये वदन्ति । परन्तु कौटिल्येन राश्यंश-कला-विकलादय सौरमण्डलपरादयश्च न ज्ञाता इत्याहु । तथाचोक्तञ्चाचार्यविष्णुगुप्तेन 'अप्यर्णवस्य पुरुषः प्रतरन् कदाचित् आसादयेदनिलयोगवशेन पारम् । नत्वस्य कालपुरुषाख्य महार्णवस्य । गच्छेत् कदाचिदनृषिर्मनसापि पारम्" इति वृद्धसंहितायामुक्तौ वराहमिहिराचार्य विष्णुगुप्तः अर्थशास्त्रकर्त्तु-विष्णुगुप्तात् [illegible] यदुक्तञ्च तत्र सुष्ठु । यत्र शस्त्र शास्त्रम् [illegible] समुद्धार । तस्याथ राश्यंश कला विकला [illegible] न तत्र दुरूहं स्यात् । तत्र श्री वृद्धसंहितायाम [illegible] । कौटिल्यस्य [illegible] मुनित्वप्रसिद्ध । विष्णुगुप्त-[illegible] माद्यगार्दिभि स्पष्ट-[illegible] विष्णुचन्द्रनाम्ना केनाचित् [illegible] सूत्रक '[illegible]कामपुराण [illegible] कामसूत्रेऽप्यस्ति । [illegible] । कौटिल्य इति नामश्च [illegible] प्रसिद्धम् । यथा कौटिल्यीय

यदि ज्ञाप्ते स्वरयोः ह्रस्वदीर्घयो । किन्तूभयोर्विवर्ण्यमानयोः दुष्टयोश्च इति 'संक्षिप्तम्' इति यशोधरीये कामसूत्रव्याख्याने—'साधु ह्रस्वदीर्घविवक्षमन्यतर विन्यासाद्व्यत्ययार्थं सन्, कस्तेषितं गुरुत्वमुपन्यसेत् ।' तथैव भारते शान्ति-पर्वणि वाक्यावतरणमिव युधिष्ठिरं प्रति विदुरस्य कौटिल्य पूर्वोक्तस्यथा "प्रसादं निहितं तस्य शरीरं परिकल्पितम् । यो वेत्ति ननु तं प्रज्ञं प्रवीक्षा विदुः [illegible]" । भारते शान्ति-पर्वणि कुटीत्यपि कौटिल्योपमिति दृश्यते । अन्यत्र वाक्यस्यमूलानि अध्यायविवक्षितानि अपि सन्ति । तथाहि चाणक्यसूत्राणि [illegible] इति अर्थशास्त्रे १—३ । 'विनयस्य मूलं वृद्धोपसेवा' इति । 'नैव च परिभूयति' इति । अर्थशास्त्रे १—७, १—६ । 'अविनीतस्वामि [illegible] ... ... "आत्मवान् सत्त्वविशेषः" १—६ । 'सम्पन्नाः प्रकृतयः' १—१६ ।—

'हीयमानेन न सन्धिं कुर्वीत' । अर्थशास्त्रे तु "हीयमानः सन्दधीत" । 'तेजो हि सन्धानहेतुस्तदर्थिनाम्' । अर्थशास्त्रे तु "तेजो हि सन्धानकारणम्", 'बलवान् हीनेन विगृह्णीयात्' । अर्थशास्त्रे तु 'न हीनेन विगृह्णीयात्' । 'सह प्रतिकूलं नाचरेत्' । तथैवार्थशास्त्रे । "इन्द्रियवशवर्तिनं चतुरङ्गवानपि विनश्यति" इत्यर्थशास्त्रे । अन्यत्र 'इन्द्रियवशवर्ती चतुरङ्गवानपि विनश्यति' । 'मनुष्य वाणप्रयुक्तार्थं गृह्णीयात्' । अर्थशास्त्रे मनुष्याधीन [illegible] गृह्णीयात् । "कालमतिक्रम्य न प्रकाशयेत्" तथैवार्थशास्त्रे । 'सर्वेषां विवादः [illegible] सत्यं [illegible] एवमर्थशास्त्रेऽस्ति । 'सोऽयमर्थे पुरुषार्थानिवर्तनं इत्यत्र । "लौभयमर्थे श्रीरम्बुजो लभते" इत्यर्थशास्त्रे वैशम्पिते । एव बहुत्र स्थले अर्थशास्त्र-चाणक्यसूत्रयोः ऐक्यम् [illegible] अर्थसमयोः [illegible] चतुर्णामपि । चाणक्यमतीतमेव । [illegible]

[illegible]

[illegible]

[illegible]



Foreword.

([illegible])

One of the most attractive elements in Indian culture is its wealth of gnomic lore. Half of it is written, half unwritten. Much is on record, much has still to be recorded Energetic and capable reapers have still to bring in many sheaves. This lore is expressed in four distinct forms. First we have the elaborate shloka, metrical, polished and refined, a gem of terse poetical expression. Next we have the true proverb, living in the mouth of the people, non-metrical, and in character akin to the proverbs of all nations Thirdly there is the aphorism or sutra, a form peculiar to India, almost an algebraical formula in words. Lastly there is the allusive, abbreviated cryptogram, a menemotechnic device, a formula to recall to mind the fuller form of the first two kinds

In point of numbers the metrical shlokas and the true proverbs are most important Over 10,000 different shlokas are already on record and accessible in printed form The proverbs, concerning which no statistics exist, must be numerous also In their Sanskrit form no extensive collections have been published as yet but collections in vernacular [illegible] have been published [illegible] instances up to 8o [illegible]

Far less [illegible] we tak into account the [illegible] We are [illegible] speaking of [illegible] behaviour of [illegible]

The last class [illegible]

small indeed and need not referred to more fully here. Only very few examples of them have come to my knowledge.

The most interesting collection of the third kind is undoubtedly the one going by the name of Canakya-sutras which forms the subject matter of the present work. An incomplete collection of these was published as early as 1881, in Ceylon, in Sinhalese transcription, and with an English and Sinhalese translation. The little publication has remained almost unknown, and the first wide publicity given to the collection was their publication by Dr. R. Shama Shastri as an appendix to his epoch making edition of the Kautilya Arthashastra. Recently two meritorious publications on the subject have appeared in Bengal, one republishing the sutras in Bengali transcription with a Bengali translation, the other giving an English translation with commentary.

The subject is of considerable importance and many problems are connected with it. Canakya is a great and symbolic name in connection with Niti. Who was this Canakya? Was he the famous minister of Maurya Candragupta, or another person bearing the same name? If not the same, when did he live, and where? Then, what is the relation of the contents of the body of Canakya Niti t[illegible] other Niti preserved in India? What parallels can be found [illegible] sayings, both in Indian tradition and in [illegible] the world? How have we to think [illegible] and [illegible] pment of these sayings? What [illegible] Was the sutra form the original- [illegible] was [illegible] form expanded into that of literary

shlokas, or were these shlokas the original poetical creations, later artificially contracted into brief aphorisms after the model furnished by the philosophical or ritual sutras ? All these questions await treatment. We are only at the beginning of the study of the subject. Every contribution to this study is welcome. We need collection of materials. We need comparison of contents We need explanation of meanings and implications We need treatment of history and origins.

For all these reasons the present capable work of Pandit Ishwar Chandra Shastri is highly desirable. He has produced a book with double merit. It draws new and wider attention to the subject. It brings a wealth of illustration, explanation and comparison of the contents of the sutras

It will make many friends for this old but too generally forgotten or overlooked part of the inheritance of India, and it will stimulate many minds towards fresh enquiry and fresh study

In this field at present no labour is superfluous ; and for a long time to come things will remain so

May the learned and industrious Pandit be rewarded for his labour of love and understanding by a generous response from the reading public of Bengal May he himself continue his interesting and meritorious work. And, above all, and best result, may he awaken others to follow in his footsteps.

Anyone demonstrating the loveableness and wisdom of India does a work of great merit, doubly welcome in our present times.

May then this volume be a messenger of good tidings and goodwill. We regard it as a valuable addition to Bengal's expanding library. We feel happy in bidding it welcome.

Johan van Manen,
General Secretary,
Asiatic Society of Bengal.

Calcutta,
17th September, 1928.

अभिमतम् ।

([illegible])

[illegible]

[illegible]

[illegible]

[illegible]

चाणक्य-सूत्रम् ।

प्रथमोऽध्यायः ।

सा श्रीर्वोऽव्यात् ॥ १ ॥

नत्वेशं सच्चिदानन्दं जगतः परकारणम् ।
श्यामा श्रीरामकान्तौ च पितरौ प्रणमाम्यहम् ॥ १ ॥
नीतिशास्त्रार्णवं येन समालोड्यामृतं महत् ।
समुद्धृतं नमस्तस्मै कौटिल्याय महात्मने ॥ २ ॥
तत्कौटिल्य-वचस्तत्त्वं नीतिनैपुण्य-भास्वरम् ।
तस्य व्याख्या-प्रवृत्तौ तु तत्र च मन्दमतिर्मम ॥ ३ ॥
नीतिशास्त्रोक्तरत्नानि चाणक्यैः सूचितानि च ।
तेषां प्रसरभूतेयं टीका सारार्थबोधिनी ॥ ४ ॥

नीतेः सम्पन्मूलत्वात्तदधिष्ठातृ-देवतां मङ्गलाचरण-स्वरूपेण प्रार्थयति सेति ।

सा प्रसिद्धा परमसम्पत्प्रदा श्रीरैश्वर्याधिष्ठातृ-देवता वो युष्मान् अव्यात् पायादिति । तथा च श्रुतयः । "तामिहोपह्वये श्रियम्" । "श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।"

धर्मस्य मूलमर्थः॥ २॥

भाष्ये तु दुःखलक्षणमित्थं वर्णितम्। 'येनाभिहताः प्राणिनस्तदुपघाताय प्रयतन्ते तद्दुःखम्'। येन प्रतिकूलवेदनीयत्वेनानुभूतेन दुःखेन। अभिहता अनुभूतक्लेशाः। प्राणिनो जीवाः तस्य दुःखस्योपघाताय समुच्छेदाय। प्रयतन्ते सम्यग् यतन्ते। इति दुःखस्य निष्कृष्टलक्षणम्। सुखं दुःखाभाववदिति। "मूल-सूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम्। यस्य विज्ञानमात्रेण मूर्खो भवति पण्डितः" इति लघुचाणक्यवाक्यादिदं चाणक्यविरचितसूत्रमिति केनापि मान्यते। 'धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ' इति मेदिनी। धृञ् धारणे, धरति ध्रियते वा। 'अर्तिस्तुसु' इत्युणादिसूत्रान्मन्। 'मूलमाद्ये शिफाश्रयो'रित्यमरः। मूलधातोरपि मूलप्रतिष्ठायाम्। मूलतीति इगुपधत्वात् कः। सुख-दुःख तत्क्रियायाम्। सुखयतीति पचाद्यच्॥ १॥

सुखस्य मूलमुक्त्वा धर्मस्य मूलं वक्ति धर्मस्येति।

धर्मस्य जगतो विधारकस्याभ्युदयनिःश्रेयसयोश्च मूलं कारणं अर्थः। यतः अर्थेन हि लोके दान याग-तीर्थयात्रादिभिः धर्मः समासाद्यते। निःस्वानान्तु तत्तत्कार्यासम्पादनेन धर्माजर्नासामर्थ्यात् धर्माभाव इति सिद्ध इति। तदुक्तं भर्तृहरिणा "अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा।" अत एव 'धनाद्धर्मः' इत्युच्यते। अपरञ्च 'यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः' इति च।

अर्थस्य मूलं राज्यम् ॥ ४ ॥

अर्थो विषयार्थनयोर्धनकारणवस्तुषु' इति मेदिनी । अर्थं उप-यान्तागाम् । अर्थ्यते । घञ् प्रत्ययेन सिद्धः । 'मूलं शिफा-[illegible] । मूलनिकटेऽस्त्रि मा मे' इति मेदिनी । मूल प्रतिष्ठायाम् । मूलरोहणे च मूलति मूलयति च । 'इगुपध' इत्यादिना कः घञ् वा । "धर्म्मः पुण्य यम न्याय स्वभावाचार सोमपाः" इत्यमरः । धृञ् धारणे, धरति ध्रियते वा । 'अर्त्तिस्तुसु' इत्यादौ-णादिकात्मन् । १ ।

प्राग् धर्म्मस्य मूलमुक्त्वा प्रदर्श्य सम्प्रति राज्यस्यार्थमूलतां निरूपयति अर्थस्येति ।

[illegible] राज्ञ राजधर्म्मो वा । अर्थस्य धनादिविषयस्य मूलं प्रधानं हेतुः । अर्थेन हि राजानो लोकान् धर्मादिनाधिष्ठितं सम्यक् निर्वाहयन्ति यत -

धनवान् [illegible] याति [illegible] परिभूयते ।

[illegible] [illegible] सर्वत्र धनं सदा" ।

[illegible] [illegible] [illegible] [illegible]

[illegible]

राज्य-मूलमिन्द्रियजयः ॥ ५ ॥

शास्त्रमाधीमध्यात्ममत्र बोध्यम्। कामन्दकमते राज्यं सप्ताङ्गं, अमरसिंहमते तु पौरश्रेणीभिः महाराष्ट्रमपि राज्यं तेन प्रदर्शितम् ॥ ४ ॥

अर्थमूलमुक्त्वा राज्यमूलं निरूपयति राज्येति।

इन्द्रियजयः। इन्द्रियाणां पञ्चज्ञानेन्द्रिय-पञ्चकर्मेन्द्रियाणां तदध्यक्षमनसश्च। जयः स्वायत्तीकरणं संयमश्चेति। तद् राज्यस्य मूलं राज्यस्थिति-तत्पालनहेतुर्भवति। तथाच बार्हस्पत्यं सूत्रम्। 'आत्मवान् राजेति'। राजा नृपः आत्मवान् प्रशान्तमनाः स्यात्। मनःप्राशान्त्यं नीत्यादिशास्त्रपरिशीलनेन भवति। अत्रात्मपदेन मनोग्राह्यम्। एतदेव भारतटीकायां नीलकण्ठभट्टेनोक्तम्। अजितेन्द्रियाणां विनाशं सूचयति। तथाच "अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया। दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना" इति। अन्यद्विषयेऽस्मिन् कौटिल्यैरर्थशास्त्रस्य तृतीयाध्याये प्रथमाधिकरणे समुपवर्णितम्। कैश्चिदिह ज्ञानेन्द्रियाणि षडित्युक्तम्। तद्यथा —"मनः कर्णौ तथा नेत्रं रसना च त्वचा सह। नासिका चेति षट् तानि धीन्द्रियाणि प्रचक्षते" इति। इन्द्रस्यात्मनो लिङ्गम्। 'इन्द्रियमिन्द्रलिङ्गम्' इत्यादिना यथा निपातनात् सिद्धमिन्द्रियपदम्। जि जये, जयनम्। सदेरच्-प्रत्ययमिदम् ॥ ५ ॥

इन्द्रिय-जयस्य मूलं विनयः ॥ ६ ॥

इन्द्रियजयहेतुं निर्दिशति इन्द्रियेति।

विनयो नम्रता शीलौन्नत्यं इति यावत्। सर्वेन्द्रियाणामेकादशसंख्यकानां जयस्य मूलं निदानमिति। अथवा इन्द्रियाधिष्ठातृ-मनसोऽजये ज्ञान-कर्मेन्द्रियाणामवश्यं जयः स्यात्। इन्द्रियजयस्य मूलं मुख्यं कारणं विनयः। यस्तु विनयवान् सहिष्णुर्विवेकी तस्य धैर्येण स्थैर्येण चेन्द्रियजयो भवति। अविनयस्याविमृश्यकारित्वेनेन्द्रियलौल्यं विवर्द्धते। तदुक्तं कविभिः "शीलेन कुर्यादृगम्" इति। अन्यच्च 'आपदां कथितः पन्था इन्द्रियाणामसंयमः। तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम्" इति। मानवे तु विनयमाधिकृत्योक्तं यथा

> [illegible] कुर्यात् पृथिवीं नात्र संशयः।
> बहवोऽविनयान्नष्टा राजानः सपरिच्छदाः॥
> वनस्था अपि राज्यानि विनयात् प्रतिपेदिरे।
> [illegible] सर्वाम्॥
> [illegible] हि नियताः' इति।

[illegible] पुरोऽवस्थानात् [illegible] वा नियम्। [illegible]
[illegible] ॥ ६ ॥

विनयस्य मूलं वृद्धोपसेवा ॥ ७ ॥
वृद्ध-सेवाया विज्ञानम् ॥ ८ ॥

विनयकारणं निर्दिशयाह वृद्धोपसेवेति ।

वृद्धानामुपसेवेति तत्पुरुषः । वृद्धानां विद्यावयोभ्यां ज्येष्ठानाम्, सतां सन्निधौ स्वाभार्थमुपसर्पणपूर्वकं सेवा तद्योग्यपरिचर्या । वृद्धसन्निधौ वर्त्ती सांसर्गिकी दम्भमोहादीनां निरसनं [illegible]पूर्वकं भवति । तथाच "वृद्धसंयोगः" इति कौटिल्यः । "तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया" इति गीतायाञ्च । सा च सेवा विनयाख्यस्य मूलं मुख्यमित्यर्थः । तथा हि धर्मशास्त्रे,—

"विद्याविनीतो राजा हि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूत-हिते रतः ॥" इति ।

विद्याविनयगुणा वृद्धोपसेवनात् प्रादुर्भवन्ति । एतदेव पूर्वश्लोके निर्णीतम् । वृद्धं ज्ञाननिपुणं स्थविरं वा ।

"न तेन वृद्धो भवति येनास्य पलितं शिरः ।
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥" इति

तथाच "वृद्धो [illegible]" इति निर्दिष्टम् । [illegible]

वृद्धजनसेवाया [illegible] विज्ञानं [illegible] विविधं दर्शनादिज्ञानम् । एतदेव पूर्वोक्तवृद्धजन[illegible]

निराशिमात्मानं सम्पादयेत् ॥ ८ ॥

[illegible]

[illegible]

सम्पादितात्मा जितात्मा भवति ॥ १० ॥
जितात्मा सर्व्वार्थैः संयुज्यते ॥ ११ ॥

सम्पादितात्मनोजितात्मत्वं प्रदर्शयति सम्पादितेति ।

सम्पादितः । नीतिविज्ञानयुक्तमनाः पुमान् । अथवार्थ-वार्त्ता-शिल्प-धर्म्मशास्त्रजनित ज्ञानेन सम्पादितः परिमार्ज्जित-आत्मा मनो येन सः सम्पादितात्मा । जितात्मा प्रशस्तमनाः । न्यायान्यायविवेकेन जितमना वा भवति स्यादित्यर्थः । अन्यथा प्रतिपदमात्मनो विपत्सम्भावना गरीयसीति भावः । तदुक्तं बृहस्पतिना "आत्मवान् राजेति" । काठके च "यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः" इति । युक्तेन मनसा आन्वीक्षिक्यादि-शास्त्रजनित-ज्ञानयुक्तचित्तेनेत्यर्थः । यतः "अवशेन्द्रियचित्तानां हस्तिस्नान-मिव क्रिये"ति प्रागुक्तम् । असम्पादितात्मनः कार्य्यं विनष्टं स्यात् इति भावः ॥ १० ॥

वश्यात्मनः पुंसः सकलार्थसाधने सौकर्य्यं दर्शयति जितात्मेति । जितो वशीकृतः आत्मा मनो येन सः जितात्मा, जितमनाः प्रशान्तचित्त इति यावत् । पुमान्, सर्व्वार्थैः, कार्य्यकालोपस्थितसकलविषयैः । संयुज्यते तत्तत् कार्य्यसाधने योग्यो भवतीति अन्वयः । अजितेन्द्रियस्य सर्व्वमाकुलितं भवति । तदुक्तं गीतायाम् "इन्द्रियाणां हि चरतां यन्मनोऽनु-विधीयते । तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि" इ

प्रकृतिसम्पदा ह्यनायकमपि राज्यं नीयते ॥१३

पदगतौ इत्यस्मात् क्विप् । सम्पदनमनया वेति । प्रकृतिरिति 'प्रकृतिर्गुणसाम्ये स्यादमात्यादि स्वभावयोः । योनौ लिङ्गे पौर वर्गे' इति मेदिनी । प्रकृष्टं कुर्वन्ति राज्यमिति क्तिचा सिद्धम् राज्ञोराष्ट्रे सुलेपुष्वैः प्रतिष्ठिते राष्ट्रसमृद्धिः सम्भवेत नान्यथा यतो "नाराजके जनपदे" इति रामायणोक्तेः । नृपो निजतनया मिव सर्व्वाः प्रजाः पालयेत् । तथा च "प्रजाः पुत्रानिवौरसान्' इति मार्कण्डेयपुराणे । 'धर्मसम्प'दिति पाठे तु राज्ञायंसम्पद प्रजानामर्थो वर्द्धते इत्यर्थः स्यात् ॥ १२ ॥

प्रकृति-सम्पदामुत्कर्षमनेन प्रदर्शयति प्रकृतेति ।

प्रकृतीनां नियत-कारदानां प्रकृष्टराज्य-कराणां तदङ्गाना मिति यावत् । तेषां सुसम्पदा, हि निश्चितम् । अनायक नृपविहीनं राज्यं नीयते सुप्राप्यते अपि सम्यक् संरक्ष्यते । यतः अनायक-राज्यनाशाशङ्कया सम्पत् शालिनः संरक्षणाय प्रकृतय सम्भूयसमुत्थानेन प्रतिभूकरणेन च राष्ट्रं परिपालयन्तीति भावः ।

केचित् नायकहीनानां दौर्गत्यं विनाशं वा प्राहुः । तथाहि—

'अनायका विनश्यन्ति नश्यन्ति बहुनायका ।

स्त्री नायकाः प्रणश्यन्ति नश्यन्ति शिशुनायका ' । इति ।

"नायको नेतरि श्रेष्ठे हारमध्यमणावपि" इति विश्व ।

नयन्तीति नायकाः । णीञ् प्रापणे इत्यस्मात् ण्वुल् ॥ १३ ॥

प्रकृतिकोपः सर्वकोपेभ्यो गरीयान् ॥ १४ ॥

अविनीत स्वामि-लाभादस्वामिलाभः श्रेयान् ॥ १५ ॥

[illegible]

[illegible]

सम्पाद्यात्मानमन्विच्छेत् सहायान् ॥१६॥
नाऽसहायस्य मन्त्र-निश्चयः ॥ १७ ॥

प्रकृतीनां सम्भूय समुत्थानेन राज्यपरिपालनं सुकरमिति भावः । अविनीतः समुद्धतः । 'समुद्धतं समुद्रोऽविनीतं च समुद्धर'मिति मेदिनी । 'नीञ् प्रापणे', न व्यमार्थानि करोति' इत्यादयः ॥ १५ ॥

राज्यपालनयोग्यप्रयोजनमुक्त्वा तदनुकूलसहायसम्पत्तिं दर्शयति सम्पाद्येति । आत्मानं स्वम् आदौ इन्द्रियनिग्रहं सम्पाद्य नीत्यादिशास्त्रबोधेन प्रतिष्ठाप्य तदनुरूपमन्त्रि पुरोहितामात्यप्रभृतीन् सहायान् सहकारिणः स्वानुकूलभावः इति । अन्विच्छेत् । स्वराष्ट्ररक्षणाद्युपकारकत्वेन सहायानुपार्जयेदित्यर्थः । तदुक्तमभियुक्तैः 'सहायाः साधनोपायाः' ... इति । कौटिल्यमतानुसारेणाप्यत्र ... सहायानेव परिवृणुयात् । तत्र 'सुकरमपि कर्म ... ' इति । 'सहायवानप्यसहायः ...' [illegible] इति च । ... [illegible] ... ॥ १६ ॥

[illegible]
[illegible]

नैकं चक्रं परिभ्रमति ॥ १८ ॥

राष्ट्राश्वनागरथपदातिकोशाद्येति । एभिर्विरहितस्य मन्त्रनिश्चयो मन्त्रप्रणिधानं न भवति । राजाहित-विषयसंवादावधारणं सचिवादिभिर्विना न सम्भवतीति भावः । एवमर्थशास्त्रेऽपि 'य-एवमपायस्थानेभ्यो वारयेयुः' । 'सहायसाध्यं राजत्वम्' । अन्य-त्रत्रैव 'कुर्वीत सचिवांस्तस्मात्तेषाञ्च शृणुयान्मत'मिति । अपरे तु तीर्थाद्यष्टादशसंख्यकाः सहाया भवन्ति । तथाच "सेना-पतिर्गणको राजश्रेष्ठी दण्डाधिपो मन्त्रीमहत्तरो बलवत्तरश्चत्वारो वर्णाश्चतुरङ्गबलं पुरोहितोऽमात्यो महामात्यश्चेत्यष्टादशसंख्यका राज्ञां तीर्था भवन्ति" । एते चाष्टादशसंख्यकास्तीर्थाः शास्त्र-विश्विपुणा मन्त्रिणो वा राज्ञां सततं सहायाः स्युरिति श्रुत-सागरीये यशस्तिलकव्याख्याने प्रोक्तम् । 'स्वामिचित्तानुवृत्तिभि-र्मत्यैक्याकारकर्मैव मन्त्र'मिति बृहस्पतिः । स्वामिनो नृपतेः । चित्तानुवृत्तिभिर्मनोऽनुकूलाभिप्रायैः सार्द्धं मत्या नृपामात्योभय-बुद्धा एकरूपकर्मैव । अभिन्नबुद्धा एकरूपकर्मैव मन्त्रमिति गुरुसूत्रार्थः । "अनुप्लव सहायश्चानुचरोऽभिसरः" इत्यमरः । अय गतौ, इण गतौ च । सह अयते एति वा, ताभ्यामच् । "समौ निर्णयनिश्चयौ" । चिञ् चयने, निश्चिनोति । ततो 'ग्रहवृद्ध' इत्यादिना अप् स्यात् ॥ १७ ॥

बहुभिः सम्पाद्ये कर्मणि नैकस्योपयोगित्वं तद्दर्शयति नैक-

सहायः समदुःखसुखयोः ॥ १९ ॥

मिति। यथाहि शकटस्यैकं चक्रं रथनाभिः न भ्रमितुं समर्थं तथा राज्यम्। एवं मन्त्रि-मन्त्रसचिवादिभिर्विना स्वयं महीभुक् कार्य्यं न शक्नोति। तथाच कौटिल्यीये 'चक्रमेकं न वर्त्तते' इति। अन्यत्राप्युक्तं 'यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेदिति'। तथा मन्त्र्यादिभिर्विना न राजकार्य्यमिति भावः। 'चक्रः कोके पुमान् क्लीबं व्रजे सैन्यरथाङ्गयोः। राष्ट्रे दम्भान्तरे' इति मेदिनी। चक्रमिति। क्रियतेऽनेन इत्यर्थे कः। 'के छ्वादीनामिति' वार्त्तिकाद् द्वित्वम् ॥ १८ ॥

प्राक् सहायस्यावश्यकत्वमुक्ता सम्प्रति तद्गुणं वक्ति सहाय इति। कर्म्मसु विपत्सु च सहायः सहकारी साहाय्यकारीति यावत्। स च भूभृतां परेषां वा दुःखे प्रतिकूलवेदनीये सुखे चानुकूलवेदनीये। तयोः समः साम्यम् अनुभविता कर्म्मकर्त्ता चेत् सम्यग्योग्यसाहाय्यभाग्भवति। 'समदुःखसुख' इति पाठे तु ते सुखदुःखे समे तुल्ये सह राज्ञा यस्य स इत्यर्थः स्यात्। सहायत्वञ्च तुल्यमात्रमहितत् समासेन्। 'समसुख' इत्यमरः। सम केकयी समति। सम इत्यस्य सिद्धम्। क्वापि गर्भेर्मृतत्वे सहायकस्य पाठस्य सूचितम्। तदाह 'सहायो ऽनुचरः' इति केचिदुक्तम ॥ १९ ॥

अविनीतं स्नेहमात्रेण न मन्त्रे कुर्व्वीत ॥ २१ ॥
मन्त्रमूलाः सर्वारम्भाः ॥ २२ ॥

दिना णिनिः। सुगममन्यत्। 'गुरोर्मानीति' पाठे तु गुरोरप्याहतमभिमानी चेति राज्ञो विशेषणम् ॥ २० ॥

अविनीतं सचिवं केनोपायेन पालयेदित्याह अविनीतमिति। नयपरिहीनमर्यादाभिजात्य-प्रज्ञार्थौचशौर्य्यानुरागरहितं सचिवं स्नेहमात्रेण वात्सल्यमात्रेण रक्षेत्। न तु मन्त्रे। हितजनकरहस्यालोचनादिषु न कुर्वीत न नियुञ्जीत इति। तथाच कौटिल्यः—'कार्य्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्पयेत्।' कार्य्यसामर्थ्यादिति। कार्य्यनियुक्तस्य पुंसः कार्य्यगुरुत्वेन तत्सम्पादने पाटवमपाटवं वा सामर्थ्यं शक्तिः कल्पयेत्, अयमत्र योग्योऽयोग्यो वेति निरूप्यते इति तदर्थः। असाध्यस्यान्यस्य वा कार्य्यनैपुण्यदर्शनेन तत्पुरुषसामर्थ्यं कल्पनीयम्, नाभिजात्यादिना। अविनीत, समुद्धतो इति।

'समुद्धते समुद्धतोऽप्यविनीते च वाच्यवत्' इति मेदिनी।

न विनीत। णाञ् प्रापणे इत्यस्मात् क्तप्रत्ययेन सिद्धम्।

'स्नेह प्रेम्णि घृतादिके।' ष्णिह प्रीतौ, स्नेहनम्। घञा सिद्धम् ॥ २१ ॥

राड्हिताहित सकलकार्य्याणां मन्त्रमूलत्वं प्रदर्शयति मन्त्रेति। सर्वाणि समारब्धकार्य्याणि करिष्यमाणानि वा मन्त्रमूलानि मन्त्रपूर्व्वकाणि भवन्ति यद्वा सर्वं कार्य्यारम्भा

प्रमादाद् द्विषतां वशमुपयास्यति ॥ २५ ॥
सन्दोहाभ्यो मत्तो रक्षितव्यः २६ ॥

[illegible] प्रवासाय' । [illegible] गतौ, [illegible] ।
[illegible] इति ॥ २४ ॥

[illegible] प्रमादादिति । [illegible] ।
[illegible] प्रमादादिति । द्विषतां शत्रूणां [illegible] । [illegible] वशं [illegible] । [illegible] । यद्यपि [illegible] मन्यते । [illegible] ।

[illegible] ।
[illegible]

[illegible] ।
[illegible] न [illegible]
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]

मन्त्रसम्पदा हि राज्यं विवर्द्धते ॥ ६० ॥

सर्वेति । मन्त्रमनुमार्गेण । मन्त्रः संवरणीय । [illegible] तच्छ्रुतिभिर्मावादिर्ष्ट साधयिष्यते । यथाहि तड़ागोदकम् [illegible] मवहे नटोऽस्मिन्छिद्रेषु बहुषु बहिर्निर्याति तद्वद् मन्त्रो [illegible] [illegible] [illegible] ति । ततः सर्वथा रक्षितव्य. सर्वमन्त्रो हारिणा [illegible] कोषागारः । तत्र कौटिल्योऽप्याह "[illegible] मन्त्रं भिनत्ति । तस्मादृक्षितव्यम्" इति । [illegible] [illegible] [illegible] बहिः प्रकाशयति । सर्वथा मन्त्रं [illegible] । [illegible] सर्वोऽप्यिन्द्रियद्वाराणि [illegible] । [illegible] भूपोऽपि [illegible] ६१ ॥

[illegible] निर्द्धेति मन्त्रसम्पदेति ।

मन्त्रसम्पदा [illegible]

[illegible]

श्रेष्ठतमां मन्त्रगुप्तिमाहुः ॥ २८ ॥

कूर्मः कमठ इव, अङ्गानि मन्त्रितकार्याणि, गूहेत् संवृणुयात्। आत्मनः स्वस्य यद् विवृतं वृत्तं सम्प्रकाशितं स्यात् तच कूर्माङ्गानीव सर्वतः संगोपायेत्। अतो बृहस्पतिसूत्रानुसारेण 'बालं दुष्टमसाहसिकमप्रातशास्त्रं मन्त्रे न प्रवेशये'दिति। एतान् बालादीनयोग्यत्वान्मन्त्रकाले न स्थलीयादिति। विदुरनीतौ च "चत्वारि राज्ञा तु महाबलेन, वर्ज्यान्याहुः पण्डितस्तानि विद्यात्। अल्पप्रज्ञैः सह मन्त्रं न कुर्यान्न दीर्घसूत्रै रभसैश्चारणैश्च" इति।

रभसैः सदा त्वरितरैर्विचारशून्यैः। चारणैः रणभीरुभिरित्यर्थः। सम्पदेति। पद गतौ, संपदनं सम्पदिति। 'सम्पदादित्वात्' इति वार्त्तिकात् क्विप् ॥ २७।

सकलगुप्तिभ्यो मन्त्रगुप्तेर्मुख्यत्वमभिदधाति श्रेष्ठेति।

मन्त्राणां गुप्तिः। रहस्यप्रणिधानं गोपनीयत्वमिति बृहस्पतिप्रभृतयः। अन्यकार्येभ्य इमामेव प्रशस्ततमां नीतिमाहुरमन्यत। अनया राज्यस्य सम्यग्रक्षणं स्यादिति। आहुरिति, विशालाक्षबाहुदन्तीपुत्र-पिशुनप्रभृतय इति शेषः। "मन्त्रमूलं यतो राज्यं अतो मन्त्रं समाश्रयेत्" इति भोजभूपस्य। तथाच गुरुणा सूचितं 'मूढा दुराचारस्त्रीलुब्धा आत्मबुद्धयः क्षिप्रकुद्धा बाला न मन्त्रयोग्याः'। अत्रैते मन्त्रयोग्या न भवन्तीत्यर्थः। मूढा बुद्धेर्मान्द्यात्, दुराचाराः प्रकाशनसम्भवात्, आत्मबुद्धयः स्वार्थसिद्धिपरत्वात्,

कार्य्याकार्य्यप्रदीपो मन्त्रः ॥ २८ ॥

ईश्वरपरत्वाद्वा, विप्रकृताः—क्रोधाधिक्यात् प्रमादादिसम्भवः। बाला बुद्धिराहित्यादिति। एषु सर्वेषु मन्त्रगुप्तिसम्भावना विरलेति भावः। उक्तञ्च विदुरनीतौ "एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता। बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराष्ट्रकम्"। तत्रैव "चिकीर्षितं विप्रकृतञ्च यस्य, नान्ये जनाः कर्म्म जानन्ति किञ्चित्। मन्त्रे गुप्ते सम्यगनुष्ठिते च, नाल्पोऽप्यस्य च्यवते कश्चिदर्थः।" चिकीर्षितं कर्त्तुमिष्टम्। विप्रकृतं सम्यगनुष्ठितं कर्म्म, विरुद्धं वा कृतमिति। २७।

मन्त्रमाहात्म्यं प्रदर्शयति कार्य्येति। किमिदं कार्य्यमिष्टसाधनं किमिदं वाऽनिष्टसाधनमिति संशयान्धकारे मन्त्रोऽन्धकारनाशी प्रदीप इव भवति। यथा दीपस्तिमिरहारी तथा मन्त्रोऽपि प्रज्ञामान्द्यान्धकारे धीवैशारद्यालोककृदिति। तदुक्तं पूर्व्वसूरिभिः "मन्त्रचक्षुर्मन्त्रिभिः सार्द्धं कर्म्म कुर्य्याद् विचक्षणः" इति। असम्मिलितं कार्य्यं यथा जले आम-घटः। मन्त्रमिलितं कार्य्यं पक्वघट इव वारिणि न तथा भिद्यत इति भावः। अथवा प्रदीपोऽस्मान्वीक्षिकी। अनया सकलतत्त्वोद्भासकत्वात्। तथाच वात्स्यायनोऽपि "प्रदीपः सर्व्वविद्यानाम् उपायः सर्व्वकर्म्मणा"मिति। प्रदीप इव प्रदीपो मन्त्रः। दीपस्तु स्नेहाशः कज्ज्वलध्वजः। दशेन्धनो गृहमणिरिति त्रिकाण्डशेषः। प्रदीपयति प्रदीप्यतेऽनेन वा, दीपी दीप्तौ। इगुपधत्वात् कः ॥ २८ ॥

मन्त्रचक्षुषा परच्छिद्राण्यवलोकयन्ति ॥ ३० ॥
मन्त्रकाले न मत्सरः कर्त्तव्यः ॥ ३१ ॥

मन्त्रकरणस्य फलं प्रदर्शयति मन्त्रेति । मन्त्रश्चक्षुरिव कार्यं सम्पादयति । यथा रूपग्रहणलिङ्गं चक्षुः तथा विषयतत्त्वविचारे तद्ग्रहणे च मन्त्रः । लोका मन्त्रचक्षुषा परेषां शत्रूणां छिद्राणि राष्ट्रविषयदोषान् वा । तानि स्वार्थसाधनेऽवसरप्रदानि, मन्त्रैरेवावलोकयन्ति पश्यन्तीत्यर्थः । केचित्तु चारैर्दूतादिभिर्वावलोकयन्तीत्याहुः । तथाहि 'राजानश्चारचक्षुषः' इति । हिताहितरहस्यालापो गुह्यभाषणं वा मन्त्र इति । उत्तममध्यमाधमभेदेन प्रागुक्तानां त्रिविधानां मन्त्राणां मध्ये स उत्तमः । स प्रशस्तो मन्त्रः । तदेव चक्षुस्तेनेति पूर्वोक्त बार्हस्पत्यसूत्रार्थः । मनुनाप्युक्तम् 'नास्यच्छिद्रं परोविद्याद्विद्याच्छिद्रं परस्य तु' इति । 'छिद्रं विवरमप्यवत् गर्त्तं दोषे' इति हैमः । छिद्राते । छिद्रभेदने । छिदिर् द्वैधीकरणे वा । 'स्फायितञ्चि' इत्यादीनादिकाद्रक् ॥ ३० ॥

मन्त्रकरणसमये मात्सर्यप्रकाशे तद्धानं स्यादिति निषेधति मन्त्र इति । मन्त्रकाले मन्त्रणासमये । मत्सरोऽन्योत्कर्षासहिष्णुता । स च न कर्त्तव्यः न अनुष्ठातव्यः । तेन धैर्यहानात् कार्यव्याघात । तद्वान् मत्सरः । मात्सर्यभावो मत्सरोऽयः । 'मत्सरो मक्षिकायां स्यात् मात्सर्यक्रोधयोः पुमान् । मत्सर

परसम्पर्शौ शपथे चाभिधेयवत्' इति मेदिनी। मन्त्रविप्लवे दोषोऽभिधेया विदूरनीतौ च,—

"एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः॥"

मन्त्रविप्लवो मन्त्रप्रकाश इत्यर्थः।

बृहस्पतिरप्याह "गुणदोषावगमं निश्चित्य मौर्ख्यबाहुल्याद् य आरभते सोऽधमः"। गुणदोषयोरागतिं निश्चित्यावधार्य्य मौर्ख्यबाहुल्यात्। बुद्धिमान्द्यप्राचुर्य्यात्। यो मन्त्रः समारभते अनुष्ठीयते, सोऽधमः मन्त्र इत्यर्थः। सोमदेवनये पञ्चविधो मन्त्रः सर्व्वकर्म्मणामारम्भस्योपायः इत्यादयेति। मदो हर्षे, माद्यति परं ह.रे। 'अभूमदिभ्यः कित्' इत्यौणादिकात्तर प्रत्ययः॥३१॥

मन्त्रिणां त्रयाणाम् एकमत्ये सति अविसंवादं वक्ति त्रयाणामिति।

त्रयाणां मन्त्रनिरतानां धीमसचिवानामेकवाक्ये ऐकमत्ये। सम्प्रत्ययः कार्य्यनिष्पत्तिः। अविसंवादात् कार्य्यसौकर्य्यं वा। अथवा सति तादृशे सम्प्रत्ययः मन्त्रः सम्यक् प्रत्ययः। विश्वस्त कार्य्यफलनिष्पादक इत्यर्थः। तेन कार्य्यसिद्धिर्लक्षणम् अनुमीयते। अत्र मन्त्रणे पूर्व्वसूरयो बहवो विप्रतिपन्ना भवन्ति। तथाच मन्त्रिणां परिषदं द्वादशामात्यान् कुर्व्वीतेति मानवाः। 'षोडशेति' बार्हस्पत्याः। 'विंशतिम्' इत्यौशनसाः। 'यथा सा

आपत्सु स्नेहसंयुक्तं मित्रम् ॥ ३५ ॥
मित्रसंग्रहणे बलं सम्पद्यते ॥ ३६ ॥

कदाचित् कश्चिद्गमनाय स्थित्वा मन्त्रमाकर्णयतीत्यागये-नोक्तं गुरुणा निराश्रयेति ॥ ३४ ॥

आपत्काले समुपस्थिते बन्धुजनस्य योग्यव्यवहारं प्रदर्शयति आपत्स्विति। विपाद-राग-व्यसनादिषु। मित्रं सुहृदम् एकक्रियम्। स्नेहसंयुक्तं वात्सल्यान्वितं व्यवहरेत्। यतो मित्र-साहाय्येनापन्नो विमुक्तो भवति। तदुक्तं विष्णुशर्मभिः 'यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः'। 'ततो नास्तीह पुण्य-वान्' इति।

अन्यत्रोक्तं—'मित्रं स्वच्छतया रिपून् नयबलै'रिति च। वशी-कुर्यादित्यर्थः। अत आपत्सु प्रीतियुक्तं मित्रं यथा भवेत्तथा कार्यम्। 'मित्रं सखा सुहृत्' इत्यमरः। ञिमिदा स्नेहने। मेद्यति। 'दमिचिमिदिशसिभ्यः' इति औणादिकः क्तः स्यात्। एवं पाड़ गुणेऽपि मित्रवृत्तमस्ति। स्नेहेति। ष्णिह प्रीतौ, स्नेह-नम्। घञा सिदम्। पद गतौ, आपदनमनया। ततः सम्प-दादित्वात् क्विप् ॥ ३५ ॥

मित्रसंग्रहस्योपकारं प्रदर्शयन्नाह मित्रेति।

मित्राणां सुहृदां संग्रहणे संलाभे मैत्रीकरणे वा बलं सम्प-द्यते। संवर्तते। तत्र बलं 'स्वाम्यमात्यश्च राष्ट्रञ्च दुर्गं कोषो-बलं सुहृत्' इति कामन्दकोक्तं सप्तविधम्। अमरसिंहनये तु

बलवान् अलब्धलाभे प्रयतेत ॥ ९७ ॥

अलब्धलाभो नालसस्य ॥ ९८ ॥

पौरश्रेण्या सह बलमष्टविधं स्यादिति । अमात्य बल मौल- सामर्थ्यम् । मौलादय राज्ञां बलं पारिभाषिकम् । 'दण्डं बल- मूलकम्' इति सोमदेवसूरिः । चतुरङ्गम् [illegible] मिति [illegible] । [illegible] । 'अमात्यादिषु च यदि गन्तुं युद्धेन [illegible]' इति गुरुसूत्रम् । अत अमात्यादिषु [illegible] दिषु [illegible] । [illegible] स्यादिति । [illegible] दर्पं स्थापनि [illegible]'रिति [illegible] । [illegible] धर्मेति । [illegible] । [illegible] पुंसि' इति [illegible] । [illegible] । [illegible] स्यादिति ॥ ९८ ॥

पूर्वं बलोपायमुक्त्वा [illegible] निरूपयति बलवानिति । [illegible] [illegible] ॥ १०० ॥

[illegible]

अलब्धलाभादिचतुष्टयं राज्यतन्त्रम् ॥४३॥

तीर्थप्रतिपादनासामर्थ्यं प्रज्ञागयति नेति ।

एतच्छास्त्रसंकेतिततीर्थं मत्प्रदर्शसूत्रव्याख्याने निगदितं प्रसङ्गादन्यदुच्यते । तीर्थं काश्यादिस्थानम् । न प्रतिपादयति गमनादिभिर्न तत् सम्पादयति । स्वालस्यतः स्वपरगमनतत्कर्मानुष्ठानासमर्थ इति भावः । अथवा तीर्थं शास्त्र-यज्ञ-विद्वत्-क्षेत्रादीनि सर्व्वाणि तानि न सम्पादयति न रक्षतीति । नीतिवाक्यामृते तु—तीर्थं धर्म्मसमवायिपात्रम्, कार्य्यसमवायिपात्रञ्चेति वर्णितम् । "तीर्थं शास्त्राध्वरक्षेत्रोपाय नारीरजःसु च । अवतारर्षिजुष्टाम्बुपात्रोपाध्याय मन्त्रिषु" इति मेदिनी । मन्त्रिष्विति अष्टादशसंख्यका मन्त्र्यादयः । अमरोऽप्याह "निपानागमयोस्तीर्थम् ऋषिजुष्टजले गुरौ" इति । तॄ प्लवनतरणयोः तीर्य्यते येन तत्तीर्थम् । तरतेः 'पातॄतुदि' इत्याद्यौणादिकात्थक् । प्रतिपूर्वात् पदेर्ण्यन्ताद् लटि रूपम् ॥ ४२ ॥

सम्प्रति राज्यतन्त्रं निर्दिशन्नाह अलब्धेति ।

अत्रालब्धस्याप्राप्तस्य धनादेर्लाभः प्राप्तिः । तच्चतुष्टयम् । चत्वारो भवन्ति दशाभेदेन । तदुक्तमर्थसमुद्देशे सोमदेवसूरिभिः । 'अलब्धलाभो, लब्धपरिरक्षणम्, रक्षितपरिवर्द्धनं चार्थानुबन्ध' इति । सामादिभिरुपायैः पुरुषेणार्थ उपार्जनीयः । लब्धोऽर्थः पुनर्यत्नेन सम्यग् रक्षणीयः । रक्षितोऽर्थो वृद्धिं नेयः । वर्द्धितं पात्रेषु निक्षिपेत् । तच्चतुष्टयं राज्यस्य राजकर्म्मणो राष्ट्रस्य वा तन्त्र

राज्यतन्त्रेष्वायत्तौ मन्त्रावापौ ॥ ४५ ॥

मन्त्रं स्वविषये कृत्येष्वायत्तम् ॥ ४६ ॥

शास्त्रं नीतिशास्त्रम्। शासु अनुशिष्टौ, शिष्यतेऽनेनेति 'सर्व्वधातुभ्यः ष्ट्रन्।' प्रागुक्तगुर्व्वादिविरचित-शास्त्रानुसारेण राज्यशासनस्य सध्रीचीनत्वात्‌ कौटिल्यैस्तु राजनीतिशास्त्रे स्पष्टमुक्तम् "अर्थशास्त्रं धनुर्वेदं यत्नाद्वेत्त्रमहीपति"रिति॥ ४४॥

सम्प्रति मन्त्रावापयो राज्यतन्त्रायत्तत्वं प्रदर्शयति राज्यमिति। राज्यं राजकर्म्मसमूहो राष्ट्रं वा। तन्त्रवृत्तं प्राङ्‌निगदितम्। तदायत्तौ समधीनौ मन्त्रावापौ द्वौ स्तः। अत्र तन्त्रं नृपाश्रितो देशो वेति कैश्चिदुक्तम्। मन्त्रलक्षणमपि पूर्व्वमुद्दिष्टम्। यद्यपि आवापो भाण्डपचनं तरुमूलकृतजलाधारो वा। तथापि प्रकरणादत्रारिचिन्तायामपि तद्वृत्तिः। यथा 'परं प्रत्यावापः फलति कृतसेकस्तरुरिव' इति। 'तन्त्रं कुटुम्बकृत्ये स्यात् सिद्धान्ते चौषधोत्तमे। इति कर्त्तव्यतायाञ्चे'ति मेदिनी। यद्वा मन्त्रस्यावापोऽनुलोम-रीत्या निगूढ़भावेन वर्द्धनम्। तथात्वे एकत्वनिर्देशो भिन्नपाठश्चेति केचित्। तन्त्रि धारणे, तनु विस्तारेच, अनयोरौणादिकात् ष्ट्रन् घञौ स्तः॥ ४५॥

मन्त्रावापयो राज्यतन्त्राधीनत्वमुक्त्वा सम्प्रति मन्त्रस्य स्वविषयकार्य्यायत्तत्वं वक्ति मन्त्रमिति। स्वस्य राज्ञोविषये। कर्म्मसु अमात्योत्पत्त्यादिषु अर्थशास्त्रोक्तेषु समनुगतं मन्त्रं ज्ञेयम्। यतो मन्त्रपूर्व्वः सर्व्वोऽप्यारम्भो नृपाणां भवति। तदुक्तं सोमदेव-

आवापो मण्डले सन्निविष्टः ॥ ४० ॥

सूरिभिः 'मन्त्रपूर्वः सर्वोऽप्यारम्भः क्षितिपतीनाम्' इति। तदयं ग्रन्थेऽप्युक्तम्—

"असम्यग्मन्त्रविधेः सार्द्धं यः कार्य्यं कुरुते नृपः।
तस्य तद्विफलं भाति षण्डस्य सुरतं यथा॥"

यदा स्व-विषयस्थेषु षाड्गुण्यमन्त्र-कार्येष्विति नीति-वाक्यामृते। अन्यत्र च "आकार्य्यसिद्धे रक्षितव्यो मन्त्रः।" याव-न्नकार्य्यसिद्धिर्भवति तावन्मन्त्रो रक्षितव्य इत्यर्थः। मन्त्रो गुह्यवादः। 'गुह्यवादेऽपि च पुमान्' इति मेदिनी। तन्त्रमिति। यत्र तु स्वदेशकार्य्यनिरूपेषु यदायत्तं तदेव तन्त्रं ज्ञेयमिति तदर्थः। गुह्यवादो रहस्यालोचनम्। आयत्त इति, यती प्रयत्ने, आयतते। अकर्मकत्वात् क्त स्यात्। कार्य्यमिति। 'कार्य्यो विदिवि कार्य्यं च कार्य्या क्रिया द्विकोचयोः' इति वचनम्। कार्य्यं कार्य्यं करणीयमिति। 'ऋहलोर्ण्यत्' इत्यनेन ण्यताप्यत्। अथवा कर्त्ता अदृष्टं कथ्यते। 'अदुपधात्' इति क्यप् ॥ [illegible] ॥

आवापस्य [illegible] आवापेति। आवापः [illegible]

सन्धिविग्रहयोर्योनिर्मण्डलम् ॥ ४८ ॥

स्वकीयेऽष्टमसर्गे प्रसिद्धमस्ति। बार्हस्पत्यमतेऽपि समप्रकृतिकं मण्डलं प्रोक्तम्। अर्थशास्त्रे षष्ठाधिकरणे मण्डलयोनिविवरणेऽप्यनुसन्धेयम्। मण्डलं द्वादशराजकम्। यथाहि 'स्वामिमण्डले द्वादशराजके च, देशे च बिम्बे च कदम्बके च' इति विश्वः। कुत्रचित् योजनशतसम्मितं चावदन्ति। 'धातूनामनेकार्थत्वाद् गणनानामनित्यमिति' न्यायादन्यार्थत्वम्। 'हलश्चेति' घञ्। मडि भूषायाम्, मण्डते मण्डयति वा। 'वृषादित्वात्' कलच् ॥ ४७ ॥

सन्धिविग्रहयोः कारणत्वं मण्डलस्य प्रदर्शयति सन्धीति। अथ पणादिदानेन शत्रुभिः प्रीत्युत्पादनेन मित्रीकरणं सन्धिः। "पणबन्धः सन्धिः" इति सोमदेवाः। तदेवाह युक्तिकल्पतरौ भोजभूपः। यत्र शत्रुणा सह पणबन्धः क्रियते कोशविभवदानेन स्वर्णेन वा गवादिना [illegible] वा भवति स पणः, तेन सन्धिर्भवति। "अपराधो विग्रहः" इति सोमदेवसूरिः। यदा यस्य विजिगीषोः कोऽप्यपराधं करोति तदा विग्रहो भवेदिति तदर्थः। अथवा परस्परं शाक-मुद्गल-कुष्ठादि विग्रहः। सन्धिविग्रहयो [illegible] [illegible]। विग्रहस्य प्रकाश-कूट-तूष्णीं भेदेन त्रैविध्यम्। तदुक्तं [illegible]: —

दूरस्थो बलिनं यत्र [illegible] तोषयेत्।
तावत् सन्धिं [illegible] [illegible]।"
[illegible]।
"[illegible]।

नीतिशास्त्रानुगो राजा ॥ ४८ ॥

योनेन रहितैः कार्यः शत्रुणा सह विग्रहः." ॥
एतत् कौटिलीये कामन्दकीये च पुष्कलं वर्णितमस्ति । नीति-
वाक्यामृते षाड्गुण्यसमुद्देशे राजमण्डलं तदधिकारश्च प्रोक्तम् ।
एतयोर्द्वयोर्मण्डलमेव योनिः स्यात् । सन्धिः सन्धानम् । संपूर्वात्
'उपसर्गे धोः किः' । विग्रहं विविधं वा ग्रहणं विग्रहः । वि-
पूर्वाद् ग्रहेः "ग्रह वृ दृ" इत्यादिना अप् । योनिरिति । यु
मिश्रणे । यौति । 'वहि श्रि' इत्यादिना निः । 'योनिः कारणे
भगतोययोः' । "योनिः स्त्रीपुंसयोश्च स्यादाकरे स्मरमन्दिरे"
इति हैममेदिन्यौ ॥ ४८ ॥

भूभुजो नीतिशास्त्रानुसारित्वं प्रदर्शयति नीतीति । नीति-
न्यायः । चाणक्यादिः । दण्डनीतिर्वा । धर्मशास्त्रमिति
केचित् । नीयते बोध्यते विषयोऽनयेति । णीञ् प्रापणे, नयतेः
क्तिन् प्रत्ययाभिधानम् । दण्डनीतिरिति । दण्डो नीयते
प्राप्यतेऽनयेति । दण्डं नयति, दण्ड्यान् प्रति प्रापयति वेति
क्तिन् । नीति-प्रतिपादकं शास्त्रं नीतिशास्त्रमित्यर्थः । तच्छा-
स्त्रानुगामी राजा स्यात् । अन्यथा स्वेच्छया कार्यानुष्ठाने
निग्रहापात-शङ्का प्रबलेति । नीति-नियमानुसारेण स्वाचरणं
प्रजापालनञ्च विधेयम् । 'नास्ति बृहस्पति प्रा । भ्रातृभ्योऽस्या
स्यत् पुरं'ति महाभारते, तथा वात्स्यशास्त्रे 'वार्ता दण्ड-
नीतिश्चेति" बार्हस्पत्याः । कापिलोरप्याह चिन्तयन्ति यास्त
"दण्डनीतिरिरुंका विद्या" इत्यौशनसाः । "धनत्र एव f

अनन्तरप्रकृतिः शत्रुः ॥ ५० ॥

इति कौटिल्यः। चतस्र इति। अन्वीक्षिकी, त्रयी, वार्त्ता। दण्डनीतिश्च। युक्तिकल्पतरौ च—

"नीतिहीननरेन्द्राणां नश्यन्त्याशु सुसम्पदः।
अतो नीतिः प्रयत्नेन श्रवणीया नृपोत्तमैः"॥

"बहवोऽविनया नष्टा राजान" इति मानवे। अविनया नृपा वेणराजप्रभृतयः। नीतिनैपुण्यात्तिस्रः शक्तयो वर्द्धन्ते। प्रभावोत्साहमन्त्रजाः शक्तयस्तिस्रः। प्रभावशक्तिः "कोषो दण्डो बलञ्चेति"। उत्साहशक्तिः "विक्रमबलम्"। मन्त्रशक्तिः "सन्ध्यादीनां सामादीनाञ्च यथावस्थापनम्। न तु ज्ञानबलं मन्त्रशक्तिः। 'पञ्चाङ्गमन्त्रो मन्त्रशक्तिः'। नीतिविदिनां त्रिवर्गः। क्षयः स्थानं वृद्धियेति। अष्टवर्गस्यापचयः क्षयः। उपचयो वृद्धिः। उपचयापचयाभावः स्थानमिति। अष्टवर्गो यथा—

"कृषिर्वणिक पथो दुर्गः सेतुः कुञ्जरबन्धनम्।
खन्याकरबलादानं शून्यानाञ्च विवेचनम्"॥

'त्रिवर्गो धर्म्मार्थकामा' येति च॥ ४८॥

शत्रोः पारिभाषिकं लक्षणं वक्ति अनन्तरेति। अनन्तरप्रकृतिर्नृपः शत्रुः। स्वदेशादव्यवहितदेशस्य राजा अनन्तरभूपः। शत्रुरिति। शत्रवोऽनेकविधाः। शत्रुलक्षणं सोमदेवीये। "य एव स्वस्याहितानुष्ठानेन प्रातिकूल्यमियर्त्ति स एवारिः" इति सामान्यशत्रुलक्षणम्। "समाभिजनः सहजशत्रुः"। "विरोधी

एकान्तरितं मित्रमिष्यते ॥ ५१ ॥

विराधयिता वा कृत्रिमः शत्रुः" । "अनाश्रयो दुर्बलाश्रयो वा शत्रुरुच्छेदनीयः" । 'विषयानन्तरो राजा शत्रुरित्यभिधीयते' । अन्यत् कामन्दकीये पुस्तकमध्ये । शत्रुरिति । शदृश शातने, शातयति । एतस्माद् "श शातिभ्यां क्रुन्" । बहुलमन्यत्रापीति त्रिलुक् । केचित्तु अत्र प्रकृतिपदोपादानादन्तरङ्ग-बहिरङ्ग-प्रभा भूभुजां शत्रुरित्यर्थं जगदुरिति ॥ ५० ॥

शत्रुविजिगीषुमध्यगतं मित्रं दर्शयति । मित्रमिति । एकान्तरितमित्यर्थः । 'शत्रुमित्राभ्यां परमुदासीनः' इति । तदुक्तं श्रीमद्देवे.—"यः सम्पदीव विपद्यपि मेद्यति तन्मित्रम्" । सम्पदीव समृद्धिकाल- वत् । विपद्यपि आपत्कालेऽपि मेद्यति स्नेहं करोति तन्मित्र- मित्यर्थः । तदेव कौटिल्येनाप्युक्तम् ।—

"यः सम्पदि क्रिया स्नेहं यदस्तदतापदि ।

तन्मित्रं प्रोच्यते सद्भिर्वदन्त्यन्येन वैरिणः" ॥

तत्त्रिविधम् । नित्यमित्रम् । सहजमित्रम् । कृत्रिममित्रम् । रक्षारक्ष्यार्थं पाल्य पालको वा यो भवति तन्नित्यमित्रम् । तस्य मित्रस्य पूर्वपूर्वपरम्परयागत सम्बन्धो भवति तत् सहजं मित्रं स्यात् । य पुनः जीवितहेतोः स्वार्थेन स्नेहं करोति तत् कृत्रिमं मित्रम् । 'मित्रत्व [illegible] [illegible] पूर्व निर्दिष्टमतो [illegible] । [illegible] कामन्दक [illegible] [illegible] [illegible] [illegible] ।

"[illegible]

हेतुतः शत्रुमित्रे भविष्यतः ॥ ५२ ॥
हीयमानेन न सन्धिं कुर्व्वीत ॥ ५३ ॥

"अमि ञिमिदिया सिध्यः क्तः" इत्यौणादिकात् मित्रम्। येषु इन्प्रत्ययमित्रमित्यर्थं सम. गुणप्रसङ्गात् सूत्रस्य सद्भावार्थेति ।५१।

हेतुहेतुदोः कारणत्वं व्यक्ति हेतुत इति। हेतुतः कुतश्चित् कारणात्। सदाचरणादुपकाराच्च मित्रम्। असदाचरणादपकाराच्च रिपुरिति। तदुक्तं विष्णुधर्मेऽपि "व्यवहारेण जायन्ते मित्राणि रिपवस्तथा" अपरञ्च—

"आपत्काले च सम्प्राप्ते कार्ये च महति स्थिते।
कोपे प्रसादन नित्यञ्चैमित्रदेहि गुणाः स्मृताः" ।

इति नारदर्षिणा मित्रगुणाः उक्ताः मित्रदोषाश्च वैश्यमोक्ता यथा—

"दानं स्नेहो निजार्थलभ्यता ग्रामधेषु च
वैरिमङ्गोऽप्रणामः न मित्रदोषाः वक्षीर्तिताः" ।

मैत्रीभिदकारणमुक्तं शुक्राचार्येण यथा,—

"प्रीतिमङ्गतिर्व्विवादोऽथ मदार्थित्वमदानता।
समक्षमत्रया निन्दा वैशून्यं नित्रयैरिता" ॥

हेतुत इति। [illegible] भविष्यति व्याप्नोति कार्यमिति वर्तमाने इत्यौणादिकात्तृन्। तत्र मित्रं प्राक् निवद्धं ।५२।

हीयमानेन सह सन्धिं निषेधयति हीयमानेनेति। हीयमानेन सह सन्धिं सन्धिकर्माभिः शत्रुभिः प्रीत्युत्पादन-

तेजो हि सन्धानहेतुस्तदर्थिनाम् ॥ ५४ ॥

सन्धीकरणरूपं कार्य्यं न कुर्य्यादित्यर्थः । "पणबन्धः सन्धि"रिति सोमदेवाः । तथैव "पणबन्धो भवेत् सन्धि"रिति भोजनृपाः । स च षाड्गुण्ये प्रथमः । यत्र शत्रुणा पणबन्धो विधीयते केनचित् वस्तुना स्वदेशेन वा शत्रोर्देशेन विहितेन यो भवति स पण उच्यते, तेन सन्धिर्भवतीति भावार्थः । तदुक्तं शुक्रदेवेन—

"दुर्बलो बलिनं यत्र पण-दानेन तोषयेत् ।
तावत् सन्धिर्भवेत्तस्य यावन्मात्रप्रजल्पितः" ॥

कौटिलीये च "हीयमानः सन्दधीत" । "नातप्तलोहं लोहेन सन्धत्ते" इति च । हीयमानः सन् विजिगीषुः सन्धानं कुर्य्यात् । अन्येषां सकाशात् पणबन्धेन दण्डव्यवस्थया सन्धिमुपेयादित्यर्थः अतप्तलोहम् अन्येन लोहेन सार्द्धं न सन्दध्यात् । द्वयोर्विजिगीषोः एको हीयमानोऽपरोऽभ्युच्चीयमानः । पुनरपि तत्र सुबोधार्थो । पुष्कलमन्यत् कामन्दकीये । सन्धानं सन्धिरिति । तत्र "उपसर्गे घोः किः" । हीयमान इति । ओहाक् त्यागे, कर्म्मणि लभ् । "घु-मा स्था" इत्यादिनेत्वम् ॥ ५४ ॥

सन्धानस्य हेतुं निर्दिशति तेजो हीति । तदर्थिना सन्धानार्थिनाम् । अपरस्य नृपस्य तेजः प्रभावो प्रतापो वेति । सन्धेः हेतुः कारणमिति । "तेजो हि सन्धानकारणम्" इति कौटिलीये । कोषदण्डज-प्रतापस्य तेजस्त्वमिति । कोषो धनसञ्चया-

नातप्तलोहं लोहेन सन्धत्ते ॥ ५५ ॥

लय: । दण्डोदम: सैन्यश्च। ताभ्यां जातं तेज:। भरतोऽपि तेजोलचणं प्राह—

"अधिचेपावमानादेः प्रयुक्तस्य परेण यत्।

प्राणात्यये प्रसहनं तत्तेज: समुदाहृतम्" ॥

तस्मात् परस्मिन् राज्ञि प्रभावाधिक्यात्तेन साकं सन्धानं समुचितमिति भाव:। अन्यन्नीतिसारेऽस्ति। 'तेजो दीप्तौ प्रभावे च स्यात् पराक्रमरेतसो'रिति मेदिनी। तेजयति, तेज्यतेऽनेन वा 'तिज् निशाने' तत औणादिकादसुन् ॥ ५४ ॥

विजिगीष्वोर्द्वयोरेकस्य प्रतापाधिक्यं विना सन्धानं न स्यात्तद्दर्शयति· नेति। यथा अतप्तम् अध्मायमानम् अदग्धलोहमिति। प्रध्मातं लोहं विना न सन्धत्ते नापि संमिश्री भवति। यथा असुल्यप्रकृति: सादृशप्रकृत्या न विगृह्यते। भिन्नप्रकृतिश्चोभौ विग्रहकारणं स्यात्। 'लोहोऽस्त्री शस्त्रके लोहे जोङ्गके सर्वतैजसे' इति मेदिनी। लुह गार्द्धे, लोहति, लुह्यते वा। अचा घञा वा सिद्धम्। अथवा लूञ् छेदने, लूयतेऽनेन, ततो बाहुलकाद् ह:। अन्ये तु—रुह प्रादुर्भावे, रोहति, रुह्यते वा ततोऽच्। कपिलिकादित्वाल्लत्वम्। अन्यदप्युत्तमर्थंगाखेऽस्ति, विस्तारभिया नेह संगृह्यते। तप सन्तापे। तप्यते इति तप्त: क्तप्रत्ययेन सिद्धम् ॥ ५५ ॥

बलवान् हीनेन विगृह्णीयात् ॥ ५६ ॥
न ज्यायसा समेन वा ॥ ५७ ॥

हीनशक्तिना समं बलवतो विग्रहकरणं शक्तिमत्त्वादिति । बलवान् नृपः हीनेन दुर्बलेन क्षीणबलेन विगृह्णीयात् विग्रहं कुर्यात् । परमण्डले दाहच्छेद-लुण्ठनादिभिरिति । 'बलवान् हीनेन विगृह्णीया'दिति पाठे तु गर्भो हीने दुर्बलत्वं सति तेन सह विग्रहं न कुर्यादित्येवमर्थः स्यात् । अयञ्च कौटिल्यमतानुगः पाठो भवेत् । तथाहि अर्थशास्त्रे "न हीनेन विगृह्णीया"दिति । विग्रहं विविधं वा ग्रहणं विग्रहः । स च पञ्चविध-यानेष्वन्तर्गतः । विगृह्य यानम् । सन्धाय-यानम् । सम्भूय यानम् । प्रसङ्ग-यानम् । उपेक्ष्य-यानम् । [illegible] । युद्धविग्रहो-ऽपि त्रिविधः । प्रकाश-विग्रहः । कूट-विग्रहः । तूष्णीं विग्रह-श्चोपांशु स्यात्, हीयते क्षितिः । 'दुःसाध्या' इत्यादिभिरुक्तम् ॥ ५६ ॥

तेन सह विग्रहो न विधेयस्तद्दर्शयति नेति । ज्यायसा ज्येष्ठेन प्रबलेन सार्द्धं किंवा समेन तुल्यबलेन सह नैव विगृह्णीया-दित्यर्थः । शक्तित्रयोपचितो ज्यायान् । समान शक्तित्रयः समः शक्तित्रयापचितो हीनः । [illegible] तदाह सोमदेवः "[illegible] पर विगृह्णीयात् [illegible] सोमः" । [illegible] विगृह्णीयात् । [illegible] सोमो भयं न भवेत् । "ज्यायान् [illegible]" इति

हस्तिनः पादयुद्धमिव बलवद्विग्रहः ॥ ५८ ॥

आमपात्रं आमेन सह विनश्यति ॥ ५९ ॥

हैमः। अतिशयेन वृद्धः प्रशस्यो वा। 'द्विवचन'मित्यादिनेतीव-सुनि 'ज्य च' इति वृद्धस्य ज्यादेशः। ज्यादादीयसः इत्यालम्। 'समस्तुल्य' इत्यमरः। सम वैक्लव्ये, समति, अचा मिडम् ॥५७॥

द्वयो र्बहूनां वा बलवतां परस्परं विग्रहः कीदृगस्तद्दर्शयति हस्तीति। हस्तिनः करिणः पादयुद्धं पादयोः प्रहरणरूप संग्रामः। एकस्य पद्भ्याम् अन्यस्य पादयोर्युद्धम्। तदिव बल वतोर्नृपालयोर्द्वयोः विग्रहः समरः स्यादिति। हस्तिनः सेना ङ्गत्वेन समरसम्भावना निश्चिता। तथा चामरः "हस्त्यश्वरथ पादातं सेनाङ्गं स्याच्चतुष्टयम्"। हस्तः शुण्डोऽस्यास्तीति "हस्ताज्जातौ" इतीनि। विग्रह इति। विग्रहणं विरुद्ध वा ग्रहणम्। "विग्रहो युधि विस्तारे प्रविभाग-शरीरयो"रिति हैम। ग्रह उपादाने इत्यस्मात् "ग्रहवृद" इत्यादिनाऽप् ॥५८॥

पूर्व्वसूत्रस्योदाहरणत्वेनेदं वक्ति आमेति। यथा आमपात्रम् अपक्वमृदादि भाजनम्। आपेनाद्भिरित्यर्थः। 'छन्दोवत् सूत्राणि भवन्तीति' नियमादापेनेति आर्षपदवज्ज्ञेयम्। तेन सह विन-श्यति वारिमात्रमस्तीति। 'आपः स्त्री भूम्नी'त्यमरः। आप्न-वन्ति, आप्नुवन्ति आप्यन्ते वा। 'आप्नोतेर्ह्रस्वश्चे'ति क्विप्, ह्रस्वत्वञ्च। क्वापि 'आपोभिर्मार्जनं कुर्वी'ति अप् शब्दस्य

अरिप्रयत्नमभिसमीक्ष्यात्मरक्षया वसेत् ॥६०॥
शक्तिहीनो बलवन्तमाश्रयेत् ॥ ६१ ॥

मामात्वमपि दृश्यते। बहुवचनबाधकोऽयं प्राणदस्तादिवत् शब्द-स्वाभाव्यात्। 'ग्रामपात्रमाभिन महे'ति पाठे अयमर्थो भाति यदामपात्रं तादृगपात्रान्तरेण सह प्रतिघाते सकृदुभयं विनश्यतीति ॥ ५८ ॥

सर्वोऽप्यिद्रान्वेषी तत्परतां प्रदर्शयति अरीति। अरीणां दुर्दर्शं प्रयत्नमिति। प्रयत्नश्चेष्टा उद्यमश्चेति। परकीय राज्या-दिग्राहि मन्त्रानं वा। तदभि सम्यक् समीक्ष्य गूढमवलोक्येति। आत्मरक्षया आत्मनः स्वस्य राष्ट्रस्य च रक्षणपूर्वकम्। वसेदवतिष्ठेत। यदा अमित्र स्वात्मनोऽप्याक्रमणे दाह-लुण्ठना-दिना समुद्यमं करोति तदा नृपो ह्यात्मानं सर्वथा पालयेदिति भावः। 'अरिप्रयत्नमभि समीक्षेते'ति पुस्तकान्तरस्य पाठेऽर्थस्तु समम एव। अरीणां यः प्रयत्नः तं सम्यग् अवलोकयेदित्यर्थः। अस्मात् परं "मन्त्रार्थकृतो भवेत्" सूत्रं क्वचिदादर्शपुस्तके अस्ति तत् सूत्रमधिकं प्रस्तावविरोधि प्रतीत्य स्वातन्त्र्येण नैव विन्यस्य व्याख्यातम्। यद्' मन्त्रानेन पराक्रमाश्रित्यावतिष्ठेतेति तदर्थः। अरिः। ऋ गतौ, इयर्त्ति विरोधम्। ततः 'अच इ' इत्यौणा-दिकात् सिद्धम्। प्रयत्न। तत्पूर्वाद् यतो प्रयत्ने, यतनं। ततो नङ् इति कालापाः ॥ ६० ॥

दुर्बलस्य बलवदाश्रयत्वं प्रदर्शयति शक्तीति। शक्तिः शौर्य

दुर्बलाश्रयो हि दुःखमावहति ॥ ६२ ॥

सामर्थ्यमिति । राष्ट्र-दुर्ग सैन्य-कोषादयश्च । तेभ्यो हीनो रहितः । बलवन्तमिति । बलवन्तं प्रतापान्वितम् । दुर्ग-सैन्य-कोषादियुक्तं वा । आश्रयेदिति । आधिपत्यं भजेत् । तथाचोक्तमभियुक्तैः—

'अत्यन्त बलवन्तोऽपि पौर-जानपदाश्रयाः ।

दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः' ॥

"विपदि प्रधानाश्रयो हि श्रेयान्" इत्यौशनसाः । विपत्काले प्रधानं शक्तिमन्तमाश्रयेत्तत्त्राणार्थमित्यर्थः । 'शक्तिरायुधभेदे स्यात् उत्साहादौ बले स्त्रियाम्' इति हैमः । शक्तृ शक्तौ, शक्यतेऽनया । 'स्त्रियां क्तिन्' । अन्यत्रोक्त आश्रय इति ।

"उच्छिद्यमानो रिपुणा निरुपायः प्रतिक्रियः ।

शक्तिहीनः संश्रयते बलिनं धार्मिकं नृपमिति" ॥ ६१ ॥

प्रबलं हित्वा यो दुर्बलाश्रयं करोति तस्यावस्थां वक्ति दुर्बलेति । दुर्बलाश्रयो हीनशक्तेरवलम्बनम् । हि अवश्यम् । दुःखं क्लेशमावहति जनयति । सर्वस्य विपदि स्वस्मात् समधिकशक्तेरेवावलम्बनं समीचीनमिति भावः । तदुक्तं नीतिविद्भिः 'कर्त्तव्यो महदाश्रयः' । अन्यत्र हितोपदेशे 'विशिष्टैश्च विशिष्टतामिति' । विशिष्टैः । प्रबलैः सह मेलने विशिष्टतां श्रेष्ठतां विपत्त्राणञ्च भवतीत्यर्थः । 'दुर्बले निशिते श्याता'मिति रभसः । दुष्ट

धर्मिष्ठराजानमाश्रयेत् ॥ ६१ ॥
राज्ञः प्रतिकूलं नाचरेत् ॥ ६८ ॥

दीर्घ बलमस्येति विग्रहः । बल प्राणने । बलति । ततोऽसुन् । एतत् पदं पूर्वापरतः 'प्रतोद' शब्दस्यापि पुरुषस्यापि च ईदृशं अवगन्तव्यम् ॥ ६१ ॥

आश्रयस्य मार्गं निर्दिशति धर्मिष्ठमिति । यथा धर्मिष्ठमेव प्रधानभूता प्रतापैश्वर्यवन्तं राजानं धनहीनः समाश्रयेत् । यदा वा प्रधानोऽप्यन्निदाहादिवशात् विना दाहकः प्रकाशकश्च न भवति, तद्वदेतम् । अथवा धर्मदोषक शोषकादिमत्त्वेऽपि तदाश्रयं विना जीवयात्रा न सम्पद्यते । तद्वदूषयेत्: प्राणत्रेऽपि तदाश्रयं न परित्यजेत् । स्वामि-समुद्देशे सोमदेवेनाप्यु-क्तम्—"धार्मिकः कुलाचाराभिजनविशुद्धः प्रतापवान् नयानुगतवृत्तिश्च स्वामी"ति । धार्मिकः स्वधर्म-प्रजारतः । कुलाचाराभिजनः, पवित्राचारो, आभिजात्यसम्पन्नः । विशुद्धः जितेन्द्रियः । प्रतापवान् शौर्यवीर्यधैर्यादिगुणान्वितः । नयानु-गतः न्यायवान् इत्यर्थः । धर्मिष्ठमिति । धर्म गतौ, धरति । अतिशयेन धर्मी इत्यर्थे, अतिशायने इष्ठन् । राजति । राज्—दीप्तौ, राजति । 'कनिन् युवृषि' इत्यादिना कनिन्प्रत्ययेन राजन् इति निष्पन्नम् ॥ ६१ ॥

नृपस्य विरुद्धाचरणं निषेधति राज्ञ इति । राज्ञो महीभुजः

न देवचरितं चरेत् ॥ ६२ ॥

प्रतिकूलं विरोधं राजद्रोहं वा। नाचरेत्तथैव कुर्य्यादिति तत्करणे महानिष्टपातात्। तदुक्तं भारते—

"यस्य कोपो महान् बाधः प्रसादश्च महाफलः।
कस्तस्य मनसापीच्छेदनर्थं प्राज्ञसम्मतः"॥

अन्यच्च—

"बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥"

वाक्यामृते च—"यस्यामित्राः प्रकृतयः समृद्धा अपि निस्तारं न गच्छन्ति" इत्यतो नृपप्रातिकूल्यं त्यक्त्वा सर्व्वथा तदानुकूल्यं समाचरेत्। तेन आपद्भ्यो निस्तारः। तथाच रैभ्येन—

"रक्षति भूमिनाथे तु प्राणिभ्यः सदैव हि।
परिभ्रमे यतस्तस्य रक्षा देहस्य जायते"॥

एवमेव कौटिल्यीयेऽर्थशास्त्रे प्रथमाध्यायेऽस्ति ॥ ६४ ॥

देवस्य राज्ञश्च यदाचरितं तदन्यस्यानुष्ठाने प्रतिषेधात् नेति। देवस्यासाधारण्य ब्रह्मादिभिर्भूपैश्च यत् कार्य्यमाचरितमनुष्ठितं च तत् मानवः नानुतिष्ठेत्। देवतानाम् इन्द्रादीनां पाद्यार्घ्यादिकं भूपस्य च संप्रचारं श्रीकमागादिरूपं यत् कार्य्यं तत्सर्वं मा कुर्य्यादिति भावः। केवलं सेवा विनयोपदेशादि समनुतिष्ठेत्। तदुक्तं पौराणिकैः—

"धर्म्मव्यतिक्रमो दृष्टः महतामपि साहसम्।
तेजीयसां न दोषाय वह्नेः सर्व्वभुजो यथा"॥

नोद्धत-वेषधरः स्यात् ॥ ६६ ॥
द्वयोरपीर्ष्यतोर्द्वैधी-भावं कुर्व्वीत ॥ ६७ ॥

नृपपक्षे तु—मणिदण्डखेटकरणादि रूपं यत् कार्य्यं, तत्सर्वं साधारणैर्नानुष्ठेयम्, शक्तेस्तारतम्यात्। यदि नृपो दण्डधरो न भवेत्तदा मानवधर्मशास्त्रोक्त-मात्स्यन्यायः कदर्थितः स्यात्। 'देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये' इति। दीव्यन्तीति देवाः, पचादिषु पाठाद्दिव् धातोरच् प्रत्ययः ॥ ६५ ॥

उद्धतवेषधारित्वं लोकाप्रीतिकरत्वाद्विगर्हितं भवति। उद्धतः उत्कटो लोकाप्रीतिकरः। वेषः परिच्छदादिविरचनसुषमा। तद्युक्तः सन् राज्ञः सन्निधौ नो गच्छेत्। तथैव देवादिसन्निधानेऽपि नोत्कटवेषधारी भवेत्। राजा इति पूर्व्वपूर्व्वश्लोकप्रस्तावानुसारेणागतम्। उद्धत इति, उत्पूर्वाद्धन्तेः क्तः। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इत्यत्र हन्त्यर्थान्तरमिति। विषल व्याप्तौ, वेषणं विष्यते वा। वेशेति शब्दपाठे 'विश प्रवेशने' विशति, विश्यते वा घञा सिद्धमुभयपदम्। एवं मूर्द्धन्य-तालव्यान्तयोरलङ्कारवसनादिरचनाभार्यता ॥ ६६ ॥

परस्परेर्ष्यां यातयतो प्रबलयोर्द्वयोः आत्मरक्षणोपायं निर्दिशति द्वयोरिति। ईर्ष्यतोः परस्परम् असूयावतोः दाम्पत्योरन्यतरस्य द्वैधीभावम्। बलिनोर्द्वयोर्मध्ये काकाक्षिवदलक्षितः स्थित्वा समर्पयेत् द्वैधम्। एकैकस्य तदाश्रयं न कुर्यात्। द्वैधीभावस्तु [illegible] कामन्दकीये औशनसीय अन्यतरो न स दर्शित। [illegible]

न व्यसनपरस्य कार्य्यावाप्तिः ॥ ६८ ॥

च प्राथमिक उक्तो द्वैधीभावः। बलिना सह सन्धिः, दुर्बलेन सह विग्रह इति द्वितीयः। शत्रोर्वा मूलप्रकृतिभिः सह सन्धाय शत्रुणा सह विग्रह इति तृतीयः। शत्रुणैव वा सन्धिविग्रहसमुदायहेतोर्दुर्गाश्रयस्य व्यापार इति चतुर्थः। केषाञ्चिन्मते षाड्गुण्ये द्वैधीभावोऽन्तर्नीतः। ईर्ष्यतोः। ईर्ष्य ईर्ष्यायाम्। ईर्षणम्। 'गुरोश्चे'ति अप्रत्ययः। द्वैधं द्विप्रकारम्। 'संख्याया विधार्थे धा' ततो 'द्वित्र्योश्च धमुञ्'प्रत्ययः ॥ ६७ ॥

व्यसनासक्तस्य कार्य्यफललाभेऽसामर्थ्यमाह नेति। व्यसनपरस्य तदासक्तस्य। कार्य्यावाप्तिः। कार्य्यफललाभो न भवति। व्यसनं कामज-कोपजदोषः। स च मानवधर्मशास्त्रोक्ताष्टादशप्रकारः। व्यसनपरः स्वयं नष्टः परानपि नाशयति। तदाह वल्लभदेवः—

"असतां सङ्गदोषेण साधवो यान्ति विक्रियाम्।
दुर्य्योधनप्रसङ्गेन भीष्मो गोहरणे रतः।" इति।

व्यसनहीनो धीरो विचक्षणो निश्चितकार्य्यफलः लोकप्रशंसनीयश्च स्यात्। "व्यसनं विपदि भ्रंशे दोषे कामजकोपजे"। 'व्यसनं त्वशुभे सक्तौ पानस्त्री मृगयादिषु' इति विश्वमेदिन्यौ। कामजदोषे मृगयाक्ष-सुरापानानि। कोपजदोषे वाक्पारुष्य-दण्डपारुष्यार्थदूषणानि। असु क्षेपणे। अस्यति. विपूर्व्वादस्यतेर्भावार्थे ल्युट्। अवाप्तिरिति। आप्लृ व्याप्तौ, अवपूर्व्वादाप्नोतेः क्तिन् ॥ ६८ ॥

इन्द्रियवशवर्त्तिनो नास्ति कार्य्यावाप्तिः ॥६८॥

नास्ति कार्य्यं द्रुतप्रवृत्तस्य ॥ ७० ॥

असंयतेन्द्रियस्य पुंसः कार्य्यवैकल्यं निर्दिशति इन्द्रियेति। इन्द्रियाण्येकादश। पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकादशं मनः। ज्ञानमेतेषां प्रागुपनिगदितम्। 'अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया'। इत्यादित्यर्थः। संयतेन्द्रियाणान्तु सर्वकर्मसाफल्यम्। तदुक्तं काठके—

"यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः"॥

कौटिलीये च *"इन्द्रियवशवर्त्ती चतुरङ्गवानपि विनश्यति।"* इन्द्रियवशवर्त्तीति। असंयतेन्द्रिय इत्यर्थः। तमधिकृत्योक्तम् भारते—

"इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि"॥

चतुरङ्गवानपीति। चतुरङ्गाणि हस्त्यश्वरथपादातानि सेनाङ्गान्यानि। नाविकादिभिः काष्ठादीनां पदातित्वसम्भावः। नौयानादीनां यानत्वेन रथित्वसम्भावः। महिषादीनां गजाश्वादित्वसम्भावः। तथापि च इन्द्रियासक्तस्य कर्म्मारम्भवैकल्याच्च सम्यक् स्थितिर्न भवतीति। इन्द्रस्यात्मनो लिङ्गमिन्द्रियम्। 'इन्द्रियमिन्द्रलिङ्गम्' इत्यादिना घच्, निपातितम् ॥ ६८ ॥

क्षिप्रं कार्य्ये नियुक्तस्य पुंसः कार्य्यासम्प्राप्तिं दर्शयति नेति। द्रुतप्रवृत्तस्याविचारेणाधैर्याच्च क्षिप्रमारब्धकार्य्यस्य असम्य

मृगया परस्य धर्मार्थौ विनश्यतः ॥ ७१ ॥

कार्य्यं कर्त्तुं नास्ति न सम्पद्यते इत्यर्थः । तदुक्तं कविभिः 'सहसा विदधीत न क्रिया'मिति । कार्य्येऽविमृश्यकारिता कार्य्यहानिकरी स्यात् । उक्तञ्च विष्णुना 'सुविमृश्य चीर्णं' सुविचार्य्य यत् कृतं सुदीर्घकालेऽपि न याति विक्रियाम्' । परिणामसंस्मृतिं विना पूर्वापरपर्य्यालोचनं विना च किमपि कार्य्यं नैवानुष्ठेयम् । यत्तु कार्य्यं झटित्येव समुपस्थितं तत्तदानीं सूक्ष्मबुद्ध्या सम्पाद्यम् । 'द्रुतं शीघ्रविलम्बितयोरिति' हैमः । द्रुधातोः 'गत्यर्थां' इत्यादिना क्तः । अन्यत् सुगमम् । 'द्यूतप्रवृत्तस्येति' पाठे व्यसनक्रीडासक्तस्येत्यर्थो ज्ञेयः । पूर्वं व्यसननिषेधाद्व्यसनक्रीड़ा निषेधोऽभूत् । अत्र तदुल्लेखोऽनावश्यकः ॥ ७० ॥

पूर्वं सामान्येन व्यसन निषेधमुक्त्वेदानीं मृगयामात्र धर्मार्थहानिं वक्ति मृगयेति । मृगया आखेटः । तत्परस्य तदासक्तस्य पुंसः । धर्मार्थौ चतुर्वर्गेषु द्वौ वर्गौ विनश्यतः अवि[illegible] [illegible] ध्वंसमुपयास्यतः । "परित्यजे-दर्थकामौ यौ स्यातां धर्मवर्जितौ" इति भारते धर्मविरुद्धयोरर्थ-कामयोर्निषेधात् । यत्र राज्ञो धर्म्मो मृगयेति तदाह कदाचिदेव तत् कार्य्यं न तु सातत्येन । [illegible] राज्ञो व्याधस्य च कार्य्यमिति । न तु [illegible] । [illegible]कार्य्यं [illegible] तदासक्तः [illegible] । [illegible] स्यात् । ननु [illegible] [illegible] व्यसन[illegible] सर्व्वेषां प्रति निषेधात् ।

कार्येषु पान-व्यसनो न गच्छति ॥ ७२ ॥

न कामासक्तस्य कार्यानुष्ठानम् ॥ ७३ ॥

मैवं व्याधरागोर्वैधत्वादन्येषामवैधत्वाद् वैधहिंसायाः शास्त्रचोदितत्वाच्चेति भावः । धर्मार्थौ प्राङ्निरुक्तौ । मृगयेति । मृग पर्व्वेषणे । मृगयतेऽत्र 'परिचर्य्या परिसर्य्या मृगया'इत्यादि वार्त्तिकात् साधुः ॥ ७१ ॥

पानासक्तस्य कार्य्ये नियोगं प्रतिषेधति कार्येष्विति । कार्येषु धनादिषु विषयेष्विति । कार्यनोद्युक्तकार्येषु वा । पानव्यसनी सुरादिपानासक्तः । यद्वा पानं मद्यासवादीनाम् । व्यसनं द्यूतादीनाम् । एतयोरासक्तः पुमान् गच्छति नैव क्वापि नियुज्यते । तादृशस्य नियोगे कार्यहानिर्लोकापवादश्च । पानासक्तस्य बुद्धेर्भ्रंशे विवेकहानिश्च भवतीति भावः । 'व्यसनमध्ये दोषकरौ पानद्यूतौ मृगयादिषु' इति विदितः । प्राक् पानाभ्येन व्यसनं प्रतिषिध्य सम्प्रति पानव्यसनस्य निषेधः कृतः । व्यसनप्रसङ्गा तीति । यथाह इत् । [illegible] न व्यसनेषु [illegible] [illegible] [illegible] व्यसनं न हि [illegible] भवतीत्यर्थं स्यात् ॥ ७२

कामासक्तस्य कार्यार्थं प्रतिषेधति नेति । कामासक्त [illegible] [illegible] तीव्राभिलाष [illegible] न [illegible] [illegible] [illegible] [illegible] पुंस । कार्यानुष्ठानं कार्य्याचरणं न [illegible] [illegible] ॥

[illegible]

अग्निदाहादपि विशिष्टं वाक्पारुष्यम् ॥७४॥

वा न भवति। अतोऽनुष्ठिते तत्कार्य्ये हानं भवति फलसम्भावना च विरलेति। तदुक्तं भामतीकारैः 'कामाद्युपहतमनाः स्फीतालोकमध्यवर्त्तिनं घटमपि न पश्यति' इति। गीतायाञ्च—

"काम एषः क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्धेनमिह वैरिणम्॥"

"कामः स्मरेच्छयोः पुमान्" इति मेदिनी। कमु कान्तौ इति कमेः घञ्। लोकप्रवादश्च—'कामेन रावणो नष्टः देवराजोऽपि गर्हितः' इति॥ ७३॥

मर्म्मन्तुदवाक्यप्रयोगस्य अग्निदहनादपि काठोर्य्यं प्रदर्शयति अग्नीति। अग्निना अनलेन दाहः प्रज्वलनम्। तस्मादपि विशिष्टम् अधिकम्। तदुक्तं 'कुटस्वकटुवागिव व्यथयते तुषारेऽनिलः'। धर्म्मशास्त्रेऽपि वाक्पारुष्यं व्यसनेषु अन्तर्नीतम्। तथाहि—'वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः'। क्रोधोद्दीपनात् वाक्पारुष्यं भवति तेन स्वपरमानसेऽधिकक्रोधो भाविविवादश्च स्यात्। महाभारते राजधर्मे च,—

"वाक्पारुष्यस्तथोग्रत्वं दण्डपारुष्यमेव च।
आत्मनो नियहस्त्यागोऽर्थदूषणमेव च" ॥ इति।

'पारुष्यं परुषत्वे च दुर्वाक्ये पुंसि गीर्पतौ' इति शब्दार्णवे। वाक्पारुष्यं वाग्दण्डो वा। विशिष्ये इति पाठे तु 'पर्य्यवशाद्विभक्तिविपरिणामः स्यात्'। विशिष्यं विशिष्यमिति। तेन चार्थभेदः।

दण्डपारुष्यात् सर्व्वजनद्वेष्यो भवति ॥ ७५ ॥

अर्थदूषकं श्रीः परित्यजति ॥ ७६ ॥

पारुष्यमिति-परुषो निष्ठुरभाषी। तस्य भावः पारुष्यम् ब्राह्मणादित्वात् ष्यञ् ॥ ७४ ॥

दण्डपारुष्यादनिष्टं वक्ति दण्डेति। दण्डो दमनम् अपराधिनि यथाविधि निग्रहकरणं दण्डः। तत्पारुष्यं निष्ठुरता, तस्मात् सर्व्वेषां जनानां द्वेष्योऽप्रियो नृपः स्यात्। लोकास्तु रुष्टा भवन्ति। प्रकृतिक्षोभश्च राज्यनाशकारणम्। यथा तथ भवेत्तथा पारुष्यं परिहरेत्। पारुष्यमिति निगदव्याख्यातम्। दण्डेति—

'दण्डोऽस्त्री मानभेदे लगुडे यमसैन्ययोः।
व्यूहभेदे प्रकाण्डेऽश्वे कोणमन्थानयोरपि।
अभिमानग्रहे दण्डचण्डांशोः पारिपार्श्विके' इति विश्वः।

दण्ड निपातने। दण्डयति अनेन वेति 'पचाद्यच्'। अथवा 'पुंसि' इत्यादिना घप्रत्यय। द्वेष्य इति। द्विष् अप्रीतौ 'द्वेट्-सङः' ततो ण्यत् प्रत्ययसिद्ध. ॥ ७५ ॥

अर्थदूषकस्य सम्पत् परिहारं वक्ति अर्थ इति। अर्थदूषकं अर्थव्यवहारेऽनभिज्ञ कृपण कुत्सित कार्य्यव्ययकारिणं वा श्रीः सम्पदधिष्ठात्रीदेवता ऐश्वर्य्यं वेति। परित्यजति तद्व्यवहारदोषात् परिहरति। नानाविषयनिपुण पुरुष श्री स्वयमेव वृणुते। तथाच भारविः। 'वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः' इति। अन्यच्च विष्णुशर्म्मोक्त ;



दण्डः सर्वसम्पदः योजयति ॥ ७९ ॥

दण्डाभावे त्रिवर्गाभावः ॥ ८० ॥

दण्डयति दण्डयान्' इति । यदि दण्डप्रणयनं न भवेत्तदा राष्ट्र-मराजकमवद्वयेत् । यदा मानवधर्मशास्त्रोक्तमात्स्यन्यायः कदर्थितः प्रवर्त्तेत । अतः शिष्टसंरक्षणे अशिष्टदमने राष्ट्रशान्तये वा यथार्ह-दण्डो विधेयः । 'प्रजा स्यात् सन्ततौ जने' । जन जनने, प्रजा-यते । 'उपसर्गे संज्ञायाम्' इति जनेर्डः ॥ ७८ ॥

दण्डस्य सकलसम्पदां सम्पर्कं दर्शयति दण्डेति । सर्व-सम्पदेति विभक्तिविपरिणामोऽर्थवशाद्भवति । सर्वासु सम्पत्सु प्रजानां लघुगुरुभावेनार्थिक-शारीरिक-मानसिकरूपेण दण्डः प्रयुज्यते । अथवा सर्वसम्पदा सकलसम्पत्करणेन राजानं दण्डो योजयति प्रेरयतीति । व्याकरणप्रक्रिया सुगमा । यदि दण्डप्रणयनं न स्यात्तदा क्रय-विक्रय-कन्याकर-ऋणदान-ग्रहण-विवाह-गृह-क्षेत्र करादान-उत्सवदुर्बलपीडनादौ सर्वं सोपद्रवं स्यात् ॥ ७९ ॥

त्रिवर्गमूलत्वं दण्डस्य प्रदर्शयन्नाह दण्डेति । दण्डाभावे सति त्रिवर्गस्य धर्मार्थकामानामभावः स्यात् । यतो दण्डाभावे दुष्टानां प्राबल्यात् प्रजानां त्रिवर्गहानिं राष्ट्राशान्तिश्च प्रवर्त्तेत । स्मर्यते च—

"राजभिः कृतदण्डास्तु शुध्यन्ति मलिनाः जनाः ।

कृतापराधास्ततो यान्ति स्वर्गं सुकृतिनो यथा" ॥ इति ।

अथवा त्रिवर्गं 'क्षयं स्थानं वृद्धिं' च । तदुक्तं 'क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्' । अष्टवर्गस्यापचयः क्षयः । तद्-

दण्डः सर्वसम्पदा योजयति ॥ ७९ ॥

दण्डाभावे त्रिवर्गाभावः ॥ ८० ॥

दण्डयति दण्डनात्' इति। यदि दण्डप्रणयनं न भवेत्तदा राष्ट्रमराजकमभवेत्। तदा मात्स्यन्यायः [illegible] प्रवर्तेत। अतः शिष्टसंरक्षणं दुष्टदमनं राष्ट्रशान्त्यै वा यथार्हदण्डो विधेयः। 'प्रजा स्यात् सन्ततौ जने'। जन जनने, प्रजायते। 'उपसर्गे च संज्ञायाम्' इति कर्तरि डः॥ ७८॥

दण्डस्य सकलसम्पदां सम्यक् दर्शयति दण्डेति। सर्वसम्पदेति [illegible]। सर्वाः सम्पदः प्रजानां [illegible]-शारीरिक-मानसिकरूपेण दण्डः प्रयुज्यते। अथवा सर्वसम्पदा सकलसम्पत्त्यर्थेन राजानं दण्डो योजयति प्रेरयतीति। व्याकरणप्रक्रिया सुगमा। यदि दण्डप्रणयनं न स्यात्तदा क्रय-विक्रय-[illegible]-ऋणदान-ग्रहण विवाह-यज्ञ कार्यादीन [illegible] भवेत्॥ ७९॥

त्रिवर्गानुमत्स्य दण्डस्य प्रदर्शयन्नाह दण्डेति। दण्डाभावे सति त्रिवर्गस्य धर्मार्थकामानाम् अभावः स्यात्। यतो दण्डाभावे दुष्टानां प्राबल्यात् प्रजानां त्रिवर्गोऽपि [illegible] भवति उक्तञ्च –

[illegible]

[illegible]

अथवा त्रिवर्गो [illegible]

[illegible]

दण्डनीत्यामायत्तमात्मरक्षणम् ॥ ८२ ॥

महीपतेरात्मसंरक्षणं दण्डनीत्यधीनमिति निर्दिशति दण्डेति। दण्डप्रयोजिका नीतिर्दण्डनीतिः। तस्यां नीतावायत्तम् अधीनम्। आत्मनः स्वस्य रक्षणं सर्वविपद्भ्यस्त्राणं त्राण इति शेषः। महा-रते राजधर्म्मे च—'दण्डेन सहिता ह्येषा लोकरक्षणकारिका'। एषा दण्डनीतिः। एतस्या लक्षणं प्रागुक्तम्। षड्वर्गैरन्वेद-पायैव महीपाल आत्मरक्षणं कुर्यात्। तथाच राजधर्मे—

"आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः" ॥

षड्वर्गो षड्गुणा इति नीलकण्ठः। शुक्राचार्य्य-कामन्दक-नये तु यथास्थानं दूतनियोजनादिभिरात्मरक्षणं कार्य्यम्। यथा—

"मन्त्री पुरोहितश्चैव युवराजश्चमूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वेशिकस्तथा।
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः ॥
प्रदेष्टा नगराध्यक्षो दण्डपालस्त्रिपञ्चम ।
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः ॥
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु।
चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च ॥
पाषण्डादीनविज्ञातानन्योऽन्यमितरेषु च।
मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितम्" ॥

एतच्च दूतप्रकरणे प्रतिपादितम् । ८२ ।

दण्डनीत्याश्रयसमाश्रयणम् ॥ ८१ ॥

महीपतिरात्मरक्षणं दण्डनीत्यधीनमिति निर्दिशति दण्डेति। दण्डप्रयोगशिक्षा नीतिर्दण्डनीतिः। तस्यां नीतावायत्तम् अधीनम्। आत्मनः अस्य रक्षणं सर्वविपदुपशमार्थं राज्ञ इति शेषः। अत्रा- पि राजधर्मे च —'दण्डेन सहिता ह्येषा लोकरक्षणकारिका'। एषा दण्डनीतिः। एतस्याः लक्षणं प्रागुक्तम्। षड्वर्गैरन्यैरु- पायैश्च महीपाल आत्मरक्षणं कुर्यात्। तथाच राजधर्मे—

"आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः" ॥

षड्वर्गो षड्गुणा इति नीतिज्ञाः। शुक्राचार्य-कामन्दक- नये तु यथास्थानं दूतनियोजनादिभिरात्मरक्षणं कार्यम्। यथा—

"मन्त्री पुरोहितश्चैव युवराजश्चभूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वेशिकस्तथा।
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः ॥
प्रदेष्टा नगराध्यक्षो दण्डपालस्त्रिपञ्चमः।
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः ॥
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु
चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च।
पाषण्डादीनविज्ञातानन्योन्यमितरेतरैः।
मन्त्रिणं युवराजञ्च हित्वा स्वान् पुरोहितम्" ॥

एतदर्थं दूतव्यापारस्योपादानम् ॥ ११ ॥

दण्डनीत्यामायत्तमात्मरक्षणम् ॥ ८२ ॥

महीपतिरात्मरक्षणं दण्डनीत्यधीनमिति निर्दिशति दण्डेति । दण्डप्रयोजिका नीतिर्दण्डनीतिः । तस्यां नीतावायत्तम् अधीनम् । आत्मनः स्वस्य रक्षणं सर्व्वविपद्भ्यस्त्राणं [illegible] इति शेषः । अत्रा-ह राजधर्म्मे च—'दण्डेन नयिता ज्ञेया लोकरक्षणकारिका' । एषा दण्डनीतिः । एतस्याः फलं प्रागुक्तम् । षड्वर्गैश्चतुरु-पायैश्च सर्व्वेषाम् आत्मरक्षणं कुर्य्यात् । तथाच राजधर्म्मे—

"आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च ।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः" ॥

षड्वर्गो षड्गुणा इति नीतिज्ञाः । शुक्राचार्य्य-कामन्दक-मते तु यथायथं दूतनियोजनादिभिरात्मरक्षणं कार्य्यम् । यथा—

"मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः ।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वैशिकस्तथा ॥
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा ।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः ॥
प्रदेष्टा नगराध्यक्षो दण्डपालस्तथैव च ।
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः ॥
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु ।
चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च ॥
पाषण्डादीनविज्ञातानन्योन्यमितरेषु च ।
मन्त्रिणं युवराजञ्च हित्वा स्वेषु पुरोहितम्" ॥

एतच्च [illegible] ॥ ८२ ॥



दण्डनीत्यामायत्तमात्मरक्षणम् ॥ ८२ ॥

महीपतेरात्मरक्षणं दण्डनीत्यधीनमिति निर्दिशति दण्डेति। दण्डप्रयोजिका नीतिर्दण्डनीतिः। तस्यां नीतावायत्तम् अधीनम्। आत्मनः स्वस्य रक्षणं सर्व्वविपद्भ्यस्त्राणं त्राण इति शिवः। अत्रा-इति राजधर्म्मे च —'दण्डेन सहिता ह्येषा लोकरक्षणकारिका'। एषा दण्डनीतिः। एतस्या लक्षणं प्रागुक्तम्। षड्वर्गैरुपायैश्च महीपाल आत्मरक्षणं कुर्य्यात्। तथाच राजधर्म्मे—

"आत्मा रिपुश्च कालश्चाप्युपायाः शास्त्रमेव च।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः।" ॥

षड्वर्गो षड्गुणा इति नीतिशास्त्रे। शुक्राचार्य्य-कामन्दक-मते तु यथास्थानं दूतनियोजनादिभिरेवात्मरक्षणं कार्य्यम्। यथा—

"मन्त्री पुरोहितश्चैव युवराजश्चमूपतिः।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा।
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः॥
प्रदेष्टा नगराध्यक्षो दण्डपालश्चतुर्दश।
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः॥
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु।
चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च॥
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि।
मन्त्रिणं युवराजञ्च हित्वा स्वपुरोहितम्" ॥

एतत्सर्व्वं शुक्राचार्य्यकामन्दकाद्युक्तम् ॥ ८२ ॥

दण्डनीत्यामायत्तमात्मरक्षणम् ॥ ८७ ॥

महीपतेरात्मरक्षणं दण्डनीत्यधीनमिति निर्दिशति दण्डेति । दण्डप्रयोजिका नीतिर्दण्डनीतिः । तस्यां नीतावायत्तम् अधीनम् । आत्मनः स्वस्य रक्षणं सर्वविपद्भ्यस्त्राणं त्राणं इति शिवः । अत्र इति राजधर्मे च —'दण्डेन सहिता ह्येषा लोकरक्षणकारिका' । यथा दण्डनीतिः । एतस्या लक्षणं प्रागुक्तम् । षड्वर्गैश्चोपायैश्च सर्वोपायैरात्मरक्षणं कुर्यात् । तथाच राजधर्मे —

"आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च ।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः." ।

षड्वर्गो षड्गुणा इति नीलकण्ठः । शुक्राचार्य-कामन्दकमते तु यथास्थानं दूतनियोजनादिभिरात्मरक्षणं कार्यम् । यथा —

"मन्त्री पुरोहितश्चैव युवराजश्चमूपतिः ।
पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वेशिकस्तथा ।
कारागाराधिकारी च द्रव्यसञ्चयकृत्तथा ।
कृत्याकृत्येषु चार्थानां नवमो विनियोजकः ॥
प्रदेष्टा नगराध्यक्षो दण्डपालस्त्रिपञ्चमः ।
षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः ॥
अटवीपालकान्तानि तीर्थान्यष्टादशैव तु ।
चारान् विचारयेत्तीर्थेष्वात्मनश्च परस्य च ॥
पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि ।
मन्त्रिणं युवराजं च हित्वा स्वेषु पुरोहितम्" ॥

एतच्च [illegible] ॥ ८४ ॥

दण्डभयादकार्य्याणि न कुर्व्वन्ति ॥ ८१ ॥

पणयो वृत्तिः। उपचयाऽपचयाभावः स्थानम्। अष्टवर्गो यथा—

"कृषिर्वणिक्पथो दुर्गः सेतुः कुञ्जरबन्धनम्।

खन्याकरबलादानं शून्यानां च निवेशनम्"॥ इत्यष्ट-

वर्गकम्। दण्डस्त्रिविधः। तदुक्तं —

"वधोऽर्थग्रहणञ्चैव परिक्लेशस्तथैव च।

इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः"॥

परिक्लेशो बन्धनताडनादिः। अन्यत् सुगमम्॥ ८०॥

प्राग्दण्डाभावे त्रिवर्गाभावमुक्त्वेदानीं दण्डभीतिरकार्य-

निवृत्तिं वक्ति। दण्डस्य दुष्टादिनिग्रहोपायस्य भयात् साध्वसात्

लोकाः अकार्य्याणि विधानविरुद्धानि नीतिधर्मगर्हितानि वा

कार्य्याणि नानुतिष्ठन्ति। दण्डप्रामाण्यं महाभारते राजधर्मे—

"दण्डेन नीयते चेदं दण्डं नयति वा पुनः।

दण्डनीतिरिति ख्याता त्रींल्लोकानभिवर्तते"॥

तथैव दण्डस्य महिमा श्रूयते श्रीमहाभारते। यथा राज-

धर्मे। संतापनादपि दण्डो दमयतामस्मीति। अन्यच—

"दण्डः संरक्षते धर्मं तथैवार्थं विशाम्पते।

कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते॥"

इति [illegible]। दण्डो नाम सामर्थ्ये अनुग्रहे वा [illegible]

[illegible]। दण्ड [illegible], दण्डार्थं। दण्डार्थेन वा।

[illegible] च, [illegible] वा। तेषां वृत्तिः॥ ८१॥

दुर्बलोऽपि राजा नावमन्तव्यः ॥ ८६ ॥

दण्डनीत्यादीनां विधानाधीनं प्रणयनं निरूपयति दण्डेति । षष्ठ्यादिपदेन आन्वीक्षिकी वार्त्ता त्रय्यादीनां संग्रहः । 'दण्डनीतिः शासनविद्या' इति नीलकण्ठभट्टः । दण्डनीतेर्निरुक्तिः प्राकृता । विधाने विशेषज्ञानेन सापराध-निरपराध-विवेकं समर्प्यते प्रयुज्यते इति सारः । 'दण्डो हि विधाने प्रणीयते' इति सूत्र-पाठे विधाने विशेषज्ञाने सदसद्विवेकरूपे सति दण्डः प्रणीयते निरूप्यते इत्यर्थः स्यात् । यद्वा विशेषज्ञाने सूक्ष्मविचारे दण्डः प्रयुज्यते इति ॥ ८५ ॥

शक्तिहीनस्यापि भूभुजोऽवज्ञां प्रतिषेधति दुर्बलेति । दुर्बलो हीनशक्तिः स्वाम्यमात्य-कोष-सुहृदादिशून्यो नृपो नावमन्तव्यः नावज्ञेयः । तथा च मनुः—

"यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसे"ति ॥

अन्यच्च—"राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम् ॥"

सुरेन्द्राणां शक्तिसमूहजत्वेनैव राजा सर्वापेक्षयापि माननीयः । अतो भूपो नावमन्तव्य । दुष्टं स्वल्पं बलमस्येति । "दुर्बले निर्बले स्यातां क्षीणमात्रविशेषे त्रिष्विति" इत्यमरः । राजेति । 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ' इति मेदिनी । राजृ दीप्तौ, राजति । 'कनिन् युवृषि' इत्यादिना कनिन् । बल प्राणने बलति । बल्यते वा । पचाद्यच् । 'कर्मणि' घञ् वा ॥८६॥

आत्मनि रक्षिते सर्वं रक्षितं भवति ॥८३॥

आत्मायत्तौ वृद्धि-विनाशौ ॥ ८४ ॥

दण्डनीत्यादि विज्ञाने प्रणीयते ॥ ८५ ॥

सर्व्वरक्षात आत्मरक्षणस्य श्रैष्ठ्य दर्शयति आत्मेति। स्वयं राज्ञि संरक्षिते निरुपद्रवस्थिते सर्वं राष्ट्रं सुरक्षितं भवति। असत्यासादनात्मा भूमिपालः। राज्ञि सोपद्रवे परिभूते जनपद-मराजकं स्यादिति। तदुक्तं रामायणे "नाराजके जनपदे" इति। अमायां दीपहीनकन्धार इव नृपविहीनं राष्ट्रं स्यात्। अन्यच्च सिद्धान्तशिरोमणौ 'भोज्यं यथा आज्यरसं विवर्णं राज्यं तथा राजविवर्ज्जितञ्चे'ति। अथवा लोके मानवानां सर्व्वरक्षात आत्मरक्षैव प्रबला भवति। प्राङ्मितत्तः आत्मशब्दः। 'रक्षित-मवितं गोपायितम्'। रक्ष पालने, रक्ष्यते। ततः क्त प्रत्ययः ॥८३॥

वृद्धिविनाशयोरात्माधीनत्वं वक्ति आत्मेति। आत्मनो नृपस्य आयत्तौ राष्ट्रस्य वृद्धिः प्रसारणं विस्तारः। विनाशः समुच्छेदः। एतौ द्वौ भूपाधीनौ भवतः। भीमकान्तादि गुणराजि-विराजिते राज्ञि राष्ट्रस्य वृद्धिर्भवति। भूपे नीतिहीने पान-द्यौतमृगयादि-व्यासक्ते निर्गुणे च तस्मिन् सुशासनाभावाद्राज्यहानिश्च भवति। राज्यवृद्धिर्यथा श्रीरामयुधिष्ठिराशोकादेः। राज्यहानं यथा वेण-रावणादेः। "आत्मा चित्तं, नीतिबलात् प्रजानां चित्तं दुःखमपि सुखं भवति। कुदेशोऽपि सुदेशो भवति। कलिरपि कृतं भवति" इति भारतव्याख्याने श्रीनीलकण्ठः। तस्मात् आत्मादि-गुणयोरस्याभ्यदेन सम एव आत्मानमिति प्रागुक्तम् ॥ ८४ ॥

दुर्बलोऽपि राजा नावमन्तव्यः ॥ ८६ ॥

दण्डनीत्यादीनां विद्यानामर्थेन प्रयोजनं निरूपयति दण्डेति । यज्ञादिप्रदेन चार्थाविद्या वार्ता कृष्यादीनां संग्रहः । 'दण्डनीतिः शासनविद्या' इति सोमदेवभट्टः । दण्डनीतेर्निर्दिष्टः प्राकृता । विद्यानि विधिप्रमाणेन आपराध-निरपराध-विवेके समर्थयति मनुष्यन्ते इति सार. । 'दण्डो हि विद्यानि प्रणायते' इति पाठ-पाठे विद्यानि विधिप्रमाणे सदसद्विवेकदर्पं प्रति दण्डः प्रणायते निरुप्यते इत्यर्थः स्यात् । यद्वा विधिप्रमाणे एतद्विचारे दण्डः मनुष्यते इति ॥ ८५ ॥

शक्तिहीनस्यापि भूभुजोऽवज्ञां प्रतिषेधति दुर्बल इति । दुर्बलो हीनशक्तिः स्वाम्यमात्य-कोष-राष्ट्रादिशून्यो नृपो नावमन्तव्यः नावज्ञेयः । तथाच मनुः—

"यस्मादेषां सुरेन्द्राणां मात्राभिर्निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा" हि ॥

अन्यच्च—"राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन् कुतो भार्या कुतो धनम् ॥"

सुरेन्द्राणां शक्तिमन्त्रूपत्वेनैव राजा मनीषिणामपि माननीयः । अतो भूपो नावमन्तव्यः । दुष्टं चास्य बलमस्येति । "दुर्बले निर्मितं स्याता मितभागाविभो विष्यति" इत्यत्र । राजेति । 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ' इति मेदिनी । राजृ दीप्तौ. राजते । 'कनिन् युवृषि' इत्यादिना कनिन् । बल प्र बलते । बल्यते वा । पचाद्यच् । 'कर्मणि' घञ् वा ॥८

नास्त्यग्नेर्दौर्बल्यम् ॥ ८७ ॥

दण्डेन प्रणीयते वृत्तिः ॥ ८८ ॥

वृत्तिमूलोऽर्थलाभः ॥ ८९ ॥

नृपस्य स्वाभाविकप्रतापं वर्णयति नेति। अग्नेर्वह्नेर्दौर्बल्यं शक्तिराहित्यं क्वापि नास्ति। यतः क्षुद्रोऽपि वह्नेर्विस्फुलिङ्गः तृणादिसंयोगेन महानग्निर्भवन् विशालं वनं दहति। तद्वत् क्षुद्रशक्तिरपि राजा प्रजापेक्षया प्रबलः अस्त्रनिहितशेषशक्तित्वात् साधनोपायबाहुल्याच्च। अग्निरिति। 'अग्निर्वैश्वानरेऽपि स्यात् चित्रकाख्यौषधौ पुमान्' इति रभसः। अगि गतौ, अङ्गति 'अङ्गेर्नलोपश्च' इति निर्नलोपश्च। दुष्टं बलमस्येति दुर्बलम्। तद्भावो दौर्बल्यम् ॥ ८७ ॥

योग्यदण्डदानेन वृत्तिप्रणयनं प्रदर्शयति दण्डेनेति। वृत्तिः वर्त्तनं जीविकाव्यवस्थितिरिति यावत्। सा च दण्डेन न्याय्यदण्डप्रयोगेन प्रणीयते प्रयोज्या भवति। 'स्थित्यै दण्डयतो दण्ड्यान्' इति रघौ। स्थित्यै लोकस्थित्यै लोकरक्षणायेत्यर्थः। 'दण्डः शास्ति प्रजाः' इत्यन्यत्र। 'वृत्तिर्व्यवहरणाजीवन-कैशिक्यादिप्रवर्त्तने' इति विश्व-मेदिन्यौ। यदि न्याय्यदण्डप्रणयनं नाप्रयोक्ष्यत् तदा प्रजासु परस्परविवादाज्जीविकाहानिरभविष्यदिति भावः। 'दण्डो यमे मानभेदे लगुडे दमसैन्ययोः' इति विश्वः। दण्ड निपातने, दण्डयति, दण्ड्यतेऽनेन वा। 'पुंसि घः'। 'पचाद्यच्' वा। अथवा दमेर्धातोरौणादिकात् डः। वर्त्ततेऽनयेति, वृतु वर्त्तने इत्यस्मात् क्तिन् ॥ ८८ ॥

अर्थमूलौ धर्म्मकामौ ॥ ९० ॥

अर्थार्ज्जनस्य वृत्तिमूलकत्वं निर्दिशति वृत्तिरिति। अर्थस्य धनादेर्लाभः प्राप्तिर्वृत्तिमूला भवति। वृत्तिः प्रजादीनामवस्थानम्। तदेव मूलं हेतुर्यस्याः लाभस्येति। यदि प्रजानां शान्तिमूला वृत्तिर्न भवति तदा अर्थार्ज्जन-क्रयविक्रयादेर्महती हानिः स्यात्। 'वृत्तिर्वर्त्तनजीवने'। वर्त्तनमवस्थितिः। जीवनं जीविका। यत्र जीविका नास्ति तत्र लोकक्षयः। लाभ इति। डुलभष् प्राप्तौ, लभ्यते। 'अकर्त्तरि' इत्यनेन घञ्। मूलमिति। 'मूलमाद्ये शिफाभयो'रिति मेदिनी। मूल रोहणे, मूल प्रतिष्ठायाञ्च। 'इगुपध' इत्यादिना तयोः कः स्यात्॥ ८९॥

धर्म्मकामयोरर्थमूलत्वं वक्ति अर्थेति। धर्म्मः श्रेयःसाधनकार्य्यम्। तेनैहिकं शिवम्। पारत्रिकी परमनिर्वृतिश्च। कामः अभिलाषः काम्येषु इच्छा वा। द्वावेतौ अर्थमूलौ अर्थकारणकौ भवतः। अर्थो मूलं ययोर्धर्म्मकामयोरिति बहुव्रीहिः। विनार्थेन तीर्थदानादिकार्य्यं देहहितसाधनञ्च न सम्भवति। अतोऽर्थः धर्म्मकामयोश्च मूलं प्रधानम्। असदुपायेनार्थार्ज्जनं तदशुभसूचकं भवति। तदुक्तं भारते विदुरनीतौ 'परित्यजेदर्थकामौ यौ स्यातां धर्म्मवर्ज्जिता'विति। धर्म्मेति। धर्म्मो लोकविधारकः। धृञ् धारणे, धरति ध्रियते वा। 'अर्त्तिस्तुसु' इत्यादिनौणादिकोमन्। कामेति। कमु कान्तौ, कमन कामः। काम्यते वा ततो घञ्। इच्छानतिक्रमे काममिति क्लीबं स्यात्। र्यद्यबाधितः' इति कामशब्दस्य क्लीबत्वं इष्टः॥ ९०॥

अर्थमूलं कार्यम् ॥ ८१ ॥

यदल्पप्रयत्नात् कार्यसिद्धिर्भवति स उपायः ॥ ८२ ॥

लौकिकानां कार्याणां [illegible] अर्थमूलकत्वं प्रदर्शयति अर्थेति। कार्यं क्रियते यत्। अर्थो धनधान्यादिः। तन्मूलं तत् प्रधानमित्यर्थः। धनेनैव पुनः कार्यसिद्धिरर्थ-लाभोऽवश्यम्भवतीति भावः। तथाहि, 'यस्यार्थास्तस्य [illegible] [illegible]'। 'धनेन धनवान् लोक' इति च [illegible]।

"नो दुर्लभं धनं क्वापि धनिनां धनधामनि।

सर्वकार्येषु जगति मूलमर्थं सदा विदुः" ॥

इति केषाञ्चिद्विदुषाम्। यथा 'धनेन हि सर्वाणि समस्तानि दुस्तरम्'। तथा अर्थेन सर्वाणि सकलकार्याणि सिध्यन्तीत्यर्थ-इति ॥ ८१ ॥

प्रागर्थमूलमुक्तोपायं निर्दिशति यदिति। येन यस्मात् प्रयत्नात् चेष्टनात् कार्यसिद्धिः कार्यनिष्पत्तिर्भवति स उपायः। नीतौ तु उपायाः सामादयश्चत्वारः। केषाञ्चिन्मते तु सप्तोपाया-स्तथाया—

"साम दानञ्च भेदश्च दण्डश्चेति चतुष्टयम्।

मायोपेक्षेन्द्रजालञ्च सप्तोपायाः प्रकीर्त्तिताः" ॥ इति।

"उपायः सामभेदादौ तथैवोपगतौ पुमान्" इति मेदिनी। उप-गतौ, उपायतेऽनेन 'हलश्चेति' घञ्। 'येनाप्यर्थेण कार्यं सम्पद्यते स उपाय' इत्यपरे। 'उपायाः साधनानि' इति वा। 'उपायो हि कार्यनिष्पादनयोग्यसामग्री' इत्यन्येऽप्याहुः। 'यदल्पप्रयत्नात्

उपायपूर्वं कार्य्यं न दुष्करं स्यात् ॥ ८३ ॥
अनुपायपूर्वं कार्य्यं कृतमपि विनश्यति ॥८४॥

कार्य्यसिद्धिरिति' क्वापि पाठः। तदा सत्यर्थं अन्यप्रयत्नेन कार्य्यसिद्धिः स्यादित्यर्थः। ८२ ॥

उपायसमवधाने कार्य्यसौकर्य्यं वक्ति उपायेति उपायपदार्थः प्रागुक्तः। स च पूर्वं प्राग् यस्य कार्य्यस्येति। तत् कार्य्यम्। दुष्करं दुःसाध्यं न स्यात्। तथाच तत्त्वकौमुद्यां मिश्राः—"सन्ति चोपायाः शतशः शारीरदुःखप्रतिकारायेषत् कराः भिषजां वरैरुपदिष्टाः" इति। यत् कार्य्यसाधने ये प्रयोजकाः सम्पादकसामर्थ्यविशेषा वा ते तत्र उपायत्वेन सूरिभिः कीर्त्तिताः। सति साधननिचये कार्य्यमनायासेन सम्यक् सम्पद्यते। दुष्करमिति। दुर् उपसर्गात् करोतेः 'ईषत् दुः सु' इत्यादिना खल्। यद्वा दुःखेन क्रियते दुष्टं करोतीति वा अच्। उपपूर्वात् इय गतौ, उपायतेऽनेन 'एरच्' इति घञ् ॥ ८३ ॥

उपायहीन कार्य्यस्य विनाशं वक्ति अनुपायेति। नास्ति उपायो यत्र इति। नि वा अनुपाय उपायाभाव। स पूर्वं यस्य कार्य्यस्येति। कृतमनुष्ठितं सम्पन्नमिति यावत्। अपि सम्भावनायाम्। विनश्यति कार्य्यं निष्फलतां यातीत्यर्थ। साधनाभावात् कार्य्यं बह्वायासेनापि न सम्पद्यते। कश्चित् "उद्यमेन हि सिध्यन्ति कार्य्याणि न मनोरथैः" इत्यादि। व्याकरण-शेषाद सुबोध.। 'कृत' गुणेऽनमद स्यादिदेशेन 'किमिन क्विप्' इति -

कार्य्यार्थिनामुपाय एव सहायः ॥ ८५ ॥

कार्य्यं पुरुषकारेण लक्ष्यं सम्पद्यते ॥ ८६ ॥

मेदिनी। विहिते विधानपूर्वककार्य्ये। 'विपूर्वो धाञ्, करोत्यर्थे' इति नियमात्। कृतमिति। डुकृञ् करणे, करोतेर्भूते क्तः। ८४ ॥

कार्य्यार्थिनामुपायप्राधान्यं निर्दिशति कार्य्येति। कार्य्यमर्थः प्रयोजनमेषामस्तीति कार्य्यार्थिनः। तेषां कार्य्यार्थिनां कार्य्यसाधने तत् सम्पादने वा उपाय एव सहायो विशेष-प्रयोजक इत्यर्थः। तस्मात् कार्य्यार्थिना पूर्वं तदुपयोगी उपाय सम्यक् एवाश्रयणीयः। 'अनुप्लवः सहायश्चानुचरोऽभिसरः' इत्यमरः। सह अयते एति वा, अय गतौ इण् गतौ वा। तयोरचा सिद्धम्। पूर्व्वसुक्तमन्यत् ॥ ८५ ॥

पुरुषकारेण कार्य्यसम्पादनं सूचयति कार्य्यमिति। पुरुषकारेण पुरुषसामर्थ्येन पौरुषेयेण कार्य्यं यल्लक्ष्यम् उद्देश्यभूतम् अभीष्टमिति। तत् सम्पद्यते इति। उद्यमोत्साहाध्यवसायादिगुणैः पुरुषेण स्वशक्तया सर्वं कार्य्यं क्रियते न तूद्यमादिशून्येन। यस्य तु तादृशः पुरुषकारः तदनुसारेण तस्य लब्धं कार्य्यं भविष्यति। एवं कार्य्यसम्पत्तिरपि तादृशी भवति। नीतिविदा मते पुरुषकारो दैवात् प्रबलः। यतो 'दैवेन देयमिति कापुरुषा वदन्ति।' अतो 'दैवं निहत्य कुरु पौरुषमात्मशक्तया' इति। अपरञ्च 'न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः' इत्यपि तत्प्राधान्यं कीर्त्तितम्। लब्धमिति। लभ प्राप्तौ क्त, लब्धम्।

पुरुषकारमनुवर्त्तते दैवम् ॥ ८७ ॥

'अचो यत्'। यत्र मत्त इति पाठस्तत्र तद्दशा सिद्धम्। 'मत्तं स्यादपदेशेऽपि शरव्येऽपि नपुंसकम्' इति मेदिनी। घञन्त-पक्षे रभसोऽप्याह 'संख्यायाश्च न वा मत्तं क्लीबं व्याज-शरव्ययोः' इति। ८६॥

दैवस्य पुरुषकारानुसारित्वं प्रदर्शयति पुरुषकार इति। दैवमदृष्टं प्राग्भवीयं कर्म वा। पुरुषकारं पौरुषं सामर्थ्यं पुरुषानुष्ठेयैहिकं कर्मेति यावत्। पौरुष प्राबल्यात्तमनुसरति दैवम्। 'पूर्व्वजन्मकृतं कर्म्म तद्दैवमिति कथ्यते' इति पौराणिकाः। 'अनलचण-करचरण-गतरेखादीनां ग्रहगत्यादिसूचित प्राचीनकर्मविपाकफलं दैवम्' इति ज्योतिर्विदः। अत्रापि दैवकालपुरुषकाराणां समुचितानां कार्य्यं प्रति कारणत्वमङ्गी कुर्वन्ति।—

"दैवं पुरुषकारश्च कालश्च पुरुषोत्तम।
त्रयमेतन्मनुष्याणां पिण्डितं स्यात् फलाफलम्" ॥ इति।
"दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते।
न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति" ॥

इति च। नीतिविदां मते पुरुषकारस्य श्रेष्ठताम्। अन्ये तु उभयो दैवपुरुषकारयोस्तौल्य वदन्ति। तथाहि 'एवं पुरुषकारेण विना दैवं न सिद्ध्यति'। अन्यच्च 'उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः'। न तु एकेन पक्षेण। यथा वा 'एकेन चक्रेण रथस्य गतिर्न भवेत्तथा पुरुषकारं विना दैवेन कार्य्यं

दैवं विना अतिप्रयत्नं करोति यत्तद्विफलम् ॥८८॥

सम्पद्यते। एतन्मते तु दैवं परोक्षम्। पुरुषकारस्तु प्रत्यक्षमेवातः परोक्षात् प्रत्यक्षं प्रबलमिति। चार्वाकशरणास्तु केवलं पुरुषकारं स्वीकुर्वन्ति। तथाच—

"यद् यज्जगति पश्यामि यत्तत् पुरुषचेष्टितम्।
शक्तिहीनैरनुमितं दैवमित्यपि केचन" ॥

स्थावराणां पुरुषाणां पुरुषकाराभावाद्दैवं तान् किञ्चिदुपकरोत्येव, जङ्गमानां पौरुषस्य सत्त्वान्न किमपि तान् उपकरोति। दैवमिति। देवादागतं दैवम्। 'तत आगत' इत्यणा सिद्धम् ॥ ८७ ॥

आस्तिक्यबुद्धः केवलपुरुषकारेण कार्यनिष्पत्त्यभावं वक्ति दैवमिति। दैवं विना दैवहीनं यदतिप्रयत्नं समधिकचेष्टां करोति तच्चेष्टनं विफलं वृथा निष्फलमिति यावत्। अनेन पूर्वसूत्रोक्तविषयस्य निरसनं स्यात् परमनेन कौटिल्यस्य नीतिविच्छिरोमणेरास्तिक्यं सूचितं भवति। पूर्वापरसूत्रयोर्विरोधपरिहारश्चेत्थम्। तत्र दैवं पौरुषमपेक्षते। न तु स्वतन्त्रं पौरुषाद्दैवं प्रबलमिति। दैवं दुर्बलं पौरुषं प्रबलमिति रहस्यम्। अस्मिन् सूत्रे तु भाव्यं दैवप्राधान्यमुक्तम्। पूर्वसूत्रे पुरुषकारस्य प्राबल्यं भारमिश्रमुक्तम्। यद्यपि पूर्वसूत्रे 'पुरुषकारोऽनुवर्तते दैवम्' इत्येवं पाठः स्यात्तदा सूत्रसङ्गतिः पाठक्रमेण स्वाभाविकी भवेत्। विगतं फलं यस्येति विफलम्। यतो प्रयत्नः, प्रयतनम्। प्रपूर्वाद् यतधातोर्नङ् ॥ ८८ ॥

धर्मोऽहमात्मन्य हृदिमें सम्पद्यते ॥ ९९ ॥
पूर्वं निश्चित्य पश्चात् कार्यमारभेत ॥ १०० ॥

इति चाणक्यसूत्रे कौटिल्यनामांके प्रथमोऽध्यायः ॥१॥

निश्चयस्य पुंसः [illegible] [illegible] [illegible] । [illegible] आत्मन्य ईश्वराविर्विहितस्य हृदि धर्मस्य [illegible] स्यात् । कार्ये [illegible] न [illegible] निश्चयोऽपि । '[illegible]' । '[illegible]' इत्यादि । '[illegible]' । [illegible] स्यात् ततः 'गुणेन' इत्यर्थेन च [illegible] ॥ ९९ ॥

कार्यारम्भात् प्राक् निश्चयस्य [illegible] पूर्वमिति । पूर्वं आदौ कार्यारम्भात् प्रागिति । [illegible] पश्चात् [illegible] [illegible] 'कार्यमारभेत' [illegible] [illegible] यत् [illegible] [illegible] इत्यादि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

द्वितीयोऽध्यायः।

कार्य्यान्तरे दीर्घसूत्रता न कर्त्तव्या ॥ १ ॥

न चलितचित्तस्य कार्य्यावाप्तिः ॥ २ ॥

पञ्चमी प्रथमान्तस्य निपातितः'। निश्चित्येति। निर् पूर्व्वात् 'चिञ् चयने' चिञ्धातोः क्त्वाच् प्रत्ययस्य ल्यप् ॥ १०० ॥

इति दर्शनभूतचाणक्यसूत्रव्याख्यायां श्रीईश्वरचन्द्रशर्म्मशास्त्रि-
कृतायां सारार्थदीपिन्यां प्रथमोऽध्यायः।

—०*०—

प्रथमेऽध्याये सुखादीनां धर्म्ममूलकादीन् विषयान् प्रदर्श्य विशेषनीति विषयप्रदर्शनार्थं द्वितीयोऽध्यायोऽयमारभ्यते।

आरब्धकार्य्यमध्ये दीर्घसूत्रतां प्रतिषेधति कार्य्यान्तर इति। कार्य्यान्तरे कार्य्यमध्ये आलस्याद्दीर्घसूत्रता दीर्घकालेन कार्य्यसम्पादकतेति। न कर्त्तव्या नैव विधातव्या। तेन कार्य्यनिष्पत्तिर्नस्यात्। यद्वा कार्य्यमेकं सम्पाद्य अन्यस्मिन् कार्य्ये विलम्बो नोचित इति। 'सूत्रं तन्तुव्यवस्थयो'रिति विश्वः। दीर्घं सूत्रं व्यवस्था यस्य सः दीर्घसूत्रः, भावे तल्, दीर्घसूत्रता। 'दीर्घसूत्रश्चिरक्रिय' इति। अतिविलम्बेन कार्य्यसम्पादनमिति। सुगममन्यत् ॥ १ ॥

अस्थिरचित्तस्य कार्य्यफललाभ-सम्भावनां प्रतिषेधति नेति।

हस्तागतावमानात् कार्य्यव्यतिक्रमो भवति ॥३॥
दोषवर्जितानि कार्य्याणि दुर्लभानि ॥ ४ ॥

चलितचित्तस्य चञ्चलमानसस्य विकृतचित्तस्य वा। कार्य्यावाप्तिः कार्य्यलाभो न स्यात्। मनसोऽस्थैर्य्यात् कार्य्यव्याघातः, तेन कार्य्यफललाभोऽपि न भवेदिति। सर्व्वं कार्य्यं मनसः स्थैर्य्य-साधनपूर्व्वमनुष्ठेयम्। मनःस्थैर्य्यं बुद्धेर्विकाशस्तेन कार्य्यदार्ढ्यं घटते। "अभ्यासवैराग्याभ्यान्तन्निरोधः" इति योगसूत्रं तत्सम्पादकम्। मनसो धैर्य्यसाधनविषये योगवाशिष्ठे बहव उपायाः प्रपञ्चिताः सन्ति। अत्र ते विशेषोपयोगित्वाभावान्नोक्ताः। चित्तम् —चितो संज्ञाने, चेतनम्। भावे क्तः, 'श्वीदितः' इति इण्निषेधः। अव-पूर्व्वात् 'आप्लृ व्याप्तौ' इत्यस्मात् क्तिन् ॥ २ ॥

करगतद्रव्यस्यावज्ञा-कारणात् कार्य्यवैपरीत्यं भवति हस्तेति। हस्तागतम्। करतले आगतमुपस्थितं यत् तस्यावमानादवज्ञाकरणात्, अनवधानतः हेयज्ञानकरणात् कार्य्यस्य व्यतिक्रमो वैपरीत्यम् अयाथार्थ्यं भवति। अतः करगतेऽपि कार्य्ये अन्यस्मिन् वा विषये समुपस्थिते मनः प्रणिदध्यात्, फलोदयपर्य्यन्तं तत्र प्रणिधानं कार्य्यमिति भावः। 'मनु बोधने' अव-पूर्व्वान्मनेर्ण्यन्ताद् घञ् परिभवार्थे। व्यतिपूर्व्वात् क्रमेर्घञ् विपरीतार्थे। तदुक्तम्—

"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
गङ्गासलिल-माधुर्य्यं समुद्रेणाम्भसा यथा" ॥

इति आख्यातचन्द्रिकायाम् ॥ ३ ॥



कालातिक्रमात् काल एव तत्फलं पिबति ॥७॥

जनपदः। कालः पूर्वाह्णादिः, तदानीं कार्य्योपलक्षितसमयो वा। एतौ वेत्तीति, तद् विद् जनः, स्वं कार्य्यम् अनायासेन साधयति सम्पादयतीत्यर्थः। तथाचोक्तं—

"देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा कार्य्यं समारभेत्" ॥

देशः, 'भवेज्जनपदो जानपदोऽपि जनदेशयो'रिति विश्वमेदिन्यौ। दिश् अतिसर्जने, दिशति। 'पचाद्यच्'। अथवा ततो दिश्यते इति घञ्। 'लोकानां कारणं कालो राजा कालस्य कारणम्' इति वामचन्द्राख्याख्याने जगद्धरः। 'कल संख्याने शब्दे च'। कल्यते, कर्म्मणि घञ्। कालयति सर्व्वम्, एयन्तात् पचाद्यच् वा ॥ ६ ॥

कालातिक्रमे कार्य्यहानिं वक्ति कालेति। कालस्य समयस्यातिक्रमादतिपातादतिसमयक्षेपादिति, स्वयं तत् समय एव तस्य कार्य्यस्य फलं शुभाशुभरूपं यत्तत् पिबति अपहरति यस्य कार्य्यस्य च एवोपयुक्तः कालः तस्मिन् तत् कार्य्यं विधेयम्। यथा यौवने उपयमः। वर्षासु कृषिः। रोगोत्पत्तिमात्रे योग्यौषधप्रयोगः। कार्य्यारम्भात् प्राक् यथाहो समयस्तस्योऽभिधेः इति भावः। किं वा कार्य्यं समारभ्य तदसमाप्तौ तत्फलं कालः पिबति। अत एव राजनीतावुक्तं—

"कः कालः कानि मित्राणि को देशः कौ व्ययागमौ।
इति विचिन्त्य मतिमान् कार्य्यं युक्त्या समारभेत्" ॥ इति।

अर्थं प्रतिज्ञातविशेषं न कुर्वीत सर्वक्रत्वेषु ॥८॥

[illegible] ॥ ९ ॥

[illegible]

देशकालविहीनं कार्य्यं सुसाधमपि दुःसाधम् ॥१०॥
परीक्ष्यकारिणि श्रीश्चिरं तिष्ठति ॥ ११ ॥

काश्मीरे एव माल्यम् प्राग्ज्योतिःपुरे, यथा वा गान्धारे एव द्राक्षोत्पत्तिर्न तु मद्रे । यथा तपवर्ण्णं शरदादौ न तु वर्षे महत्कार्ये वा । काले तत्तत्कार्य्योपयोगित्वमपि, यथा शिला शैशवे धैर्य्यं च न तु वार्द्धके, माधवे पिकरवो न तु मकरे । दानं चन्द्रसंक्रान्त्यादौ न तु पर्य्युदस्तकाले । अकारेण योग्यपात्रं समुच्चिनोति, तेन योग्यं मानुष्ठितं कर्म्म फलवत् । नायोग्येन । योग्यस्य कार्य्ये नियोगे तस्मिन् दानञ्च सफलमिति शेषः । यदा सद्यम् इन्द्रसूनुभिः धान्यादिभिः, पालितो हि सम्पन्नो देशः । दिश प्रतिसर्जने, दिशति । ततः पचाद्यच् । प्राङ्निगदितमन्यत् ॥ ८ ॥

देशकालविरहितकार्य्यस्यातिकष्टसाध्यत्वमाह देशेति । देशकालाभ्यां विरहितं कार्य्यं सुसाधमपि सुसाध्यमनायाससाध्यमपि दुःसाधमतिकष्टेन साधनीयं स्यादिति । यतोऽयोग्यदेशे काले आरब्धं कार्य्यं न फलाय भवतीति भावः । विहीनम् । ओहाङ् त्यागे क्तः । घु मा स्था इत्यादिना इत्वम् । दुःखेन साध्यते यत्तद्दुःसाधम् । सुगममन्यत् ॥ १० ॥

कस्मिन् मानवे रमा चिरं तिष्ठति तदाह परीक्ष्येति । परीक्ष्यकारिणि समीक्ष्यकारिणि प्रेक्षापूर्वकारिणि पुंसि यावत् । तादृशि मानवे श्रीः सम्पद्राज्यं च । चिरं सुदीर्घकं तिष्ठति । तदुक्तं सूरिभिः 'अपरीक्ष्य न कर्त्तव्यं कर्त्तव्यं सुप

भाग्यवन्तमप्यपरीक्ष्यकारिणं श्रीः परित्यजति ॥१४॥
ज्ञानानुमानैश्च परीक्षा कर्त्तव्या ॥ १५ ॥

इत्युक्तम्। उपतिष्ठन्ति स्वयमेवागच्छन्ति। तदुक्तं शुक्रदेवैः—'उत्साहिनं पुरुषसिंहमुपैति लक्ष्मी'रिति। सम्पत् सम्पत्तिरपीति। उत्तरार्थं 'सर्वोपायेन परिग्रहेत्' इति सूत्रे पाठान्तरमप्यस्ति। सर्वोपायैः परिगृह्णीयात् सर्वाः सम्पदः इत्यर्थः। पद गतौ, सम्पद्यते सम्पदनं वेति 'सम्पदादिभ्य' इति वार्त्तिकात् क्विप्॥ १३॥

यद्यपरीक्ष्यकारी सौभाग्यवान् स्यात्तदा तथापि श्री-रंशतोऽपि तदाश्रयं प्राप्नोति। भाग्यवन्तं सर्वोन्नतम् अपि अपरीक्ष्यकारिणम् अपरीक्ष्यकर्त्तारं श्रीः सम्पत् परित्यजति सन्त्यजतीति। अपि शब्दादभाग्यमप्यभाग्यं श्रीः परित्यजत्येव। अतः सर्वदा सर्वत्र परीक्ष्यैव कर्म कुर्यात्। तदुक्तं नीतिज्ञैः 'अपरीक्ष्य न कर्त्तव्यं कर्त्तव्यं सुपरीक्षितम्' इत्युक्तम्। भाग्यमिति। 'भाग्यं कर्म शुभाशुभम्' इति हेम। भज सेवायाम्, भज्यते 'ऋहलो-र्ण्यत्'। 'चजोः' इत्यादिना कुत्वम्। 'भागधेयं' इति क्षीरस्वामी। भाग्यं विद्यतेऽस्य मतुप्। 'श्रीर्वेषरचना शोभा भारती सरलद्रुमे। लक्ष्म्यां त्रिवर्ग-सम्पत्तौ' इति विश्वमेदिनीकारौ। 'श्रिञ् सेवा-याम्' सर्वैर्जनैः श्रयते इति 'क्विब्वचि' इत्यौणादिकसूत्रेण क्विप्॥ १४॥

विषय-परीक्षाया उपायमाह—ज्ञानेति। 'इन्द्रियार्थ सन्नि-

दुःसाधमपि सुकरं करोति ॥ १७ ॥

'स्थानेष्वेव नियोक्तव्या भृत्याश्चाभरणानि च ।
नहि चूडामणिः प्राज्ञैः पादादौ प्रतिबध्यते' ॥

अन्यच्च चाणक्यराजनीतौ—

'परीक्ष्य प्रथमं भृत्यान् उत्तमाधममध्यमान्' ।

इत्याद्युक्तं प्राग् ।

'प्राक् नियोजयेत् कार्य्ये ततो राज्ञ स्तयोगुणाः ।
यशश्चैव तथा स्वर्गः पुष्कलश्च धनागमः' ॥ इति च ।

'कुशलः शिक्षिते त्रिषु । क्षेमे च सुकृते चापि पर्य्याप्ते च नपुंसकम्' इति विश्वमेदिन्यौ । 'पर्य्याप्तः कुशलोऽभिज्ञ' इति च । शम् सम्यक्, कौ पृथिव्यां शलति, ततः पचाद्यच् । कुशान् लातीति वा कः । विज्ञये लक्षणा वा कौ शलति चालयति राजकार्य्याणि । अथवा 'कु पापपदार्थयोः' । बुद्धिवैभवात् कोः पापात् शलतीति च ॥ १६ ॥

योग्यजन-नियोगस्य फलमाह दुरिति । दुःखेनायासेन साध्यते सम्पाद्यते यत् तद् साधम् । कर्म्मणि साध्यं कार्य्यमिति । तादृशं कार्य्यं नियुक्तेन निपुणेनानायाससाध्यं कर्त्तुमर्हति । तथा च प्रधानं कठोरकर्म्माणि वा राज्ञा नियुक्त सुदक्षो लोक. स्थापदा न दुष्करं कष्मानायासेन सम्पादयिष्यतीति भावः । साध संसिद्धौ, दुःसाधनं, दुःसाध्यते वा घञा सिद्धम् । सुक

सिद्धस्य कार्य्यस्य प्रकाशनं कर्त्तव्यम् ॥ २१ ॥

ज्ञानवतामपि दैवमानुष-दोषात् कार्य्याणि दुष्यन्ति ॥ २२ ॥

"तथा शाश्वतलक्ष्मीकान् पुरोहित-समन्वितः।
श्रोत्रियांश्चैव सामन्तान् सीमापालान् तथैव च।
गृहं गत्वा प्रयाचेत यथा ते तुष्टिमाययुः॥"

तथा कीर्त्ति-सौशील्य-स्वास्थ्य-शिष्टाचरण-दाक्षिण्य-विद्याग्रहणादीनि समासाधनीयानि। यद्यपि परिपूर्वाद् ग्रहेः पत्नीपरिजनार्थता। तथापि स्वामित्वेन स्वीकारार्थत्वमत्र बोध्यम्। 'आदानमूलशापाः परिग्रहाः'। ग्रह उपादाने, परिगृह्यते, परिग्रहणम्। परिग्रहैरित्यार्थवज्ज्ञेयम्। 'ग्रह' इत्यप्। 'विभाषा ग्रह' इत्यप्रत्ययो वा ॥ २० ॥

सम्यक्के कार्य्ये तस्य प्रकाशः नासम्यक्के तदाह सिद्धस्येति। सिद्धस्य निष्पन्नस्य कार्य्यस्य कर्म्मणः। प्रकाशनं लोके प्रचारः। नासम्पन्नस्य प्रकाशः कर्त्तव्यः। तेन कार्य्यनाशः क्लेशः शत्रोः सन्धानलाभश्च। यतो जाते प्रकाशे पश्चात् कार्य्यं यदि विघ्नबाहुल्यात् शत्रोरन्वेषणाच्च न सम्पत्स्यते तदा कर्त्तुरसामर्थ्यमैकल्यञ्च स्यादिति भावः। सिद्धेति। 'सिद्धे व्यासादिके देवयोनौ निष्पन्नमुक्तयोः। नित्यप्रसिद्धे' इति हैमः। 'सिद्धे निर्वृत्तनिष्पन्नौ'। 'षिधु संराद्धौ' सिध्यति। 'गत्यर्था' इत्यादिना क्तः। 'प्रकाशः स्फुटहासयोः उद्योतेऽतिप्रसिद्धे च'। 'प्रकाशोऽतिप्रसिद्धे

दैवं शान्तिककर्म्मणा प्रतिषेद्धव्यम् ॥ २३ ॥

स्यात् प्रकाशातपयोः स्फुटे' इति विश्वः । 'काशृ दीप्तौ' प्रकाशयति । प्रपूर्वात् काशेः ल्युट् ॥ २१ ॥

ज्ञानवतां लोकानामपि दैवमपरिहार्य्यमाह ज्ञानेति । ज्ञानवतां प्रज्ञावतां विदुषाम् । अपि निश्चितम् । दैवं ग्रहवैगुण्यं उत्पातादि च । तच्च त्रिविधं, दिव्यं भौममन्तरिक्षञ्च । दिव्यम् अशनिपातादि । आन्तरिक्षं धूमकेतूद्गमादि । भौमं भूकम्पादि । मानुषं हिंसा-द्वेष-विरुद्धपक्षयन्त्राततायित्वादि । तयोर्द्वयोः कार्य्यप्रहाणादनुष्ठीयमानानि कार्य्याणि दुष्यन्ति विनश्यन्ति चेति । अतः कार्य्यनिष्पादने सततं विदुषामपि जागरूकत्वेन भाव्यम् । अज्ञानात्तु कार्य्ये दोषोऽवश्यम्भावीति । तदुक्तम् हद्दवाणचे—

"विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्म्मदोषांश्च नैव जानात्यपण्डितः ॥"

'ज्ञा अवबोधने' ज्ञायते इति जानातेर्ल्युट् । ज्ञानं विद्यते येषान्ते ज्ञानवन्तः तेषामिति । तच्च विषयेन्द्रियसन्निकर्षजनितम् । देवादागतं दैवम् । 'तत आगतः' इत्यण् । मानुष इति 'मनोरपत्यम्' । 'मनोर्जातावञ्यतौ षुक् च' । सिद्धान्तकौमुद्या बाल-मनोरमायामन्यत् ॥ २२ ॥

दैवं विघ्नं प्रशमनोपायमाह दैवमिति देवागतविपदि-भूकम्पाशनिपात-प्रबलप्रभञ्जन-ग्रहवैगुण्य-दुर्भिक्ष-महाम

कार्य्यं विपत्तौ दोषान् वर्णयन्ति बालिशाः ॥२५॥

प्रतिविधेयम्। यथा युधिष्ठिरादीनां कौरवेभ्य आत्मत्राणम्। मानुषीमिति। मनोरपत्यं मनुष्यः। 'मनोर्जातावञ्यतौ षुक् चेति' षुक्। स्त्रियान्तु 'हयगवय' इत्यादि-वार्त्तिकस्य प्रतिप्रसवेन ङीप्। 'हलस्तद्धितस्य' इति यकारलोपः। मनुषी, ततो 'टिड्ढा' इत्यादिना ङीपो मानुषी, जातिविवक्षायां वा ङीषः परत्वादनन्तरत्वाद् ङीन्। विपदम् विपद्यतेऽनया इति। विपूर्वात् पद्धातोः 'सम्पदादिभ्य'इति वार्त्तिकेन क्विप्, ततः स्त्रियाम्। कुशलस्य निपुणस्य भावः कौशलम्। शम शमनं कस्य वधं च, कुत्सितं शमनं संकरोति, ततः पचाद्यच्। 'पर्य्याप्तः कुशलोऽभिज्ञ' इति कोषः ॥ २४ ॥

कार्य्यं विघ्ने जाते तत् कर्त्तुर्दोषापादनं बालिशैः क्रियते तदाह कार्य्यमिति। अनुष्ठिते कार्य्ये कर्म्मणि विपत्तौ विघ्ने समुपस्थिते तत्कर्त्तुर्दोषान् कार्य्यफलानभिज्ञताम् बालिशा मूर्खा वर्णयन्ति कथयन्ति। न तु विद्वांस। यत

"गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥"

सज्जनास्तु मतिभ्रम-वश स्यादेव प्रायो दोषाननुसन्दधते। प्राकृतस्तु गुणदोषविवेके अधिकारिता नास्त्येव। तदुक्तं दण्डाचार्य्यैः —

"गुणदोषानशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु

नास्ति दैवात् कार्य्यविपत्तिः ॥ २८ ॥
न दैव प्रमाणानां कार्य्यारम्भः ॥ २९ ॥

कार्य्यमिति। विष्णुशर्म्मभिरप्युक्तं 'मातृजङ्घा हि वत्सस्य स्तम्भी भवति बन्धने' इति। वत्स इति। वद व्यक्तायां वाचि, वद स्थैर्य्ये वा, वदति सामर्थ्यम्। 'हृतृवदिहनि' इत्यौणादिकः सः। 'वत्सः पुत्रादिवर्षयोः। तर्णके नोरसि क्लीवम्' इति मेदिनी। 'पुत्रादौ तर्णके वर्षे वत्सो वत्सन्तु वक्षसि' इति रुद्रश्च। तृणभोजित्वात् तर्णको गोवत्सः। मातुरूधः इत्यत्राथ इति पाठान्तरं क्वापि दृश्यते ॥ २७ ॥

दैवात् कार्य्यं विपत्त्यभावमाह नेति। दैवाच्छुभादृष्टादिष्ट-सूचकं प्राक्तनकर्म्मणो वा। कार्य्येऽनुष्ठेयकर्म्मणि। विपत्तिः कार्य्यध्वंसस्तिर्नास्ति। यद्वा सत्वे प्रबलपुरुषकारे दैवात् कार्य्ये विपत्तिर्नास्ति। यत.—

"दैवं पुरुषकारेण दुर्बलं ह्युपहन्यते।
न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति" ॥

इति च। एवं पुरा ध्रुव-मार्कण्डेय-विश्वामित्र-चाणक्यादिभिः पुरुषकारप्राबल्यं प्रदर्शितम्। अन्यत् व्याख्यातपूर्वम्। 'अप्रयत्नात् कार्य्यविपत्तिर्भवे'दिति क्वचिदादर्शग्रन्थे सूत्रान्तरमस्ति। अन्य-सूत्रेण तस्य गतार्थत्वान्नेह व्याख्यायते ॥ २८ ॥

दैवप्रमाण-पुरुषाणां कार्य्यारम्भ-प्रतिषेधमाह नेति। दैवं प्रागुक्तम्। तदेव प्रमाणं येषां पुरुषाणां तेषाम्। कार्य्यारम्भः

य: कार्य्यं न पश्यति सोऽन्धः ॥ २१ ॥
प्रत्यक्ष-परोक्षानुमानैः कार्य्याणि परीक्षेत ॥ २२ ॥

कार्य्यादृष्टुर्दोषमाह य इति। यो नृपः कार्य्यं राज्यपालनादि कार्य्यं न पश्यति नावलोकयति, स्वयं तदनुचरो वा सोऽन्धः चक्षुर्विहीनः। यद्वा यो लोकः साधारणं कार्य्यं न पश्यति हितं च स्वानिष्टं स्यादतः सोऽन्धः। तथा चोक्तम् 'राजा पश्यति कर्णाभ्याम्'। 'राजानश्चारचक्षुषः' इति च। राजविषये तु कार्य्यावलोकने विश्वस्ताः सुयोग्याः कर्मकरा दूता वा एव चक्षुः। 'अन्धस्तु तिमिरे लोके चक्षुर्भिरपिधीयवत्' इति [illegible]। विद्वांश्च शास्त्रचक्षुषा पश्यति। तदुक्तं 'सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः' इति। अन्ध इत्युपचारात् कथ्यते। ततः यथायथम् ॥ २१ ॥

कार्य्यपरीक्षणस्य उपायानाह प्रत्यक्षेति। प्रत्यक्षं विषयेन्द्रियसन्निकर्षजनितज्ञानजनकं प्रमाणम्। अक्षमक्षं प्रति वर्त्तते इति प्रत्यक्षं प्रतिविषयमिन्द्रियम्। तत्र विषयेन्द्रियसन्निकर्षजन्यं ज्ञानम्। तथा च न्यायसूत्रम् 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं ज्ञानं प्रत्यक्षम्'। [illegible]करणकमनुमानम्। [illegible] परोक्षम्। यदा [illegible] प्रत्यक्षादिभिरुपायैः कार्य्याणि परीक्षेत इति

न परीक्ष्यकारिणां कार्य्यविपत्तिः ॥ ३३ ॥
परीक्ष्य तार्य्या विपत्तिः ॥ ३४ ॥

सूक्ष्मभावेनावलोकयेत्। तादृगवलोकने न कार्य्यहानिः। अक्षमिन्द्रियं प्रतिगतम्। 'अत्यादयः' इत्यादि वार्त्तिकात् समासः ॥ ३२ ॥

समीक्ष्यकारिणां कार्य्यं विपद्यभावमाह नेति। परीक्ष्य-कारिणां प्रेक्षापूर्व्वकारिणां समीक्ष्यकारिणामिति यावत्। कार्य्यं न च विपत्तिर्न कार्य्यहानिर्भवति। नापि प्रतिबन्धकोपस्थितिः। यथा परीक्ष्यकारिणां विक्रमार्कभोजाशोकानाम्। असमीक्ष्य-कारिणान्तु भवत्येव विघ्नः। यथा वेण-रावण-दुर्य्योधन-शिशु-पालानाम्। अत्र कोष-व्याकरणादि निगदव्याख्यातेन व्याख्या-तम् ॥ ३३ ॥

परीक्षया विपद्दूरणमाह परीक्ष्येति। परीक्षां विना आप-दुद्धार-सम्भावना नास्ति। यत्र विपत् सम्भाव्यते तत्रैव गत्वा स्वबुद्धेः शक्तेश्च परीक्षाप्रदर्शनं विधेयम्, न तु केवलं गृहे स्थित्वा तद्विमर्शनं युक्तम्। यथा रणभितगतस्यैव जय पराजयौ वा न तु गृहे स्थितस्य। अत परीक्षया विपत्तिर्विपत्तार्यां तरणीया भवति मार्गेनोपायेन। अत्र विपत्तिरिति पञ्चम्यर्थे प्रथमा। परीक्ष्य इति परीक्षया च अत्र। 'छन्दोवत् सूत्राणि भवन्ति' इति नियमात्। क्वचिदादर्शपुस्तके सूत्रमिदं नास्ति पूर्वेणैकार्थ-त्वादिति तदभिप्रायः ॥ ३४ ॥

स्वशक्तिं ज्ञात्वा कार्यमारभेत ॥ ३५ ॥

यः स्वजनं तर्पयित्वा शेषं भुङ्क्ते सोऽमृत-भोजी ॥ ३६ ॥

कार्यारम्भे स्वकीय-शक्तिज्ञानस्यावश्यकत्वमाह स्वेति । स्वस्यात्मनः शक्तिः सामर्थ्यं तत्कार्यं प्रति योग्यतेति यावत् । तज्ज्ञात्वा मानसे समालोच्य कार्यमारभेत । तदक्रमणं कुर्य्यात्, शत्रुः प्राप्नुयात् । यथागस्त्यस्य चुलुकेन जलधिपानम्, नैतदन्यस्य, तच्छक्तेरभावात् । यथा वा सेतुबन्धप्रबन्धः श्रीरामस्य नान्यस्य नरपतेः । ततः कार्यारम्भात् प्राक्,—

स्वशक्तेः प्राबल्य-दौर्बल्ये विचिन्त्य कार्यं समारभेत ।

राजनीतिपक्षे 'शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः' ।

'कोषदण्डबलं प्रभुशक्तिः' । 'विक्रमबलमुत्साहशक्तिः' ।

'पञ्चाङ्गमन्त्रो मन्त्रशक्तिः' । अन्यत्र 'शक्तिरस्त्रान्तरे गौर्य्या-मुत्साहादौ बले स्त्रियाम्' इति मेदिनी । शक्यते अनेन यया सा शक्तिः । शक्लृधातोः स्त्रियां क्तिन्' ३५ ॥

स्वजनतृप्तिसाधनपूर्वकमात्मभोजनमाह य इति । स्वस्यात्मनो जनाः कुटुम्बाः परिवाराः अतिथयश्च तान् तर्पयित्वा भोजना-च्छादनादिभिः परितोष्य । तदवशिष्टं भक्ष्यादि परिशेषं यो भुङ्क्ते अश्नाति, स एव लोकेऽमृतभोजी । केवलात्मतृप्तिजनक-भोजनस्य शास्त्रे निन्दनात् । तथा च 'अघं स केवलं भुङ्क्ते यः...

कार्य्यानुष्ठानादाय-मुखानि वर्द्धन्ते ॥ २० ॥

पचत्यात्मकारणात्। 'यो भुङ्क्ते स्तेन एव सः' इति च। आत्मनः शरीरे परस्य सुखदुःखाद्यनुभवे चाविशेषात्। अतः परतुष्टिपूर्वकमेवात्मप्रसाधनं कार्य्यम्। अन्यतिथि-पोष्य-दीनान्धादीनां भरणं प्रशस्तस्वर्गसाधनम्। तथा च स्मृतौ—

"भरणं पोष्यवर्गाणां प्रशस्तं स्वर्गसाधनम्।

नरकः पीड़ने चैषां तस्माद्यत्नात् बिभृयाद्गुणः" ॥ इति।

अभ्यागतादीनां त्यक्त्वा बिना यो भुङ्क्ते स पापभुक्। तादृग्भोजनं पापादानमेवास्ति। शास्त्रविहितोऽयं तेन सोपकारः ॥ १९ ॥

कार्य्याणामनुष्ठानेन धनादिरधिकमायमाह कार्य्येति। कार्य्याणां कर्मणाम् अनुष्ठानात् यथापूर्वं समारम्भकरणात्। आय-मुखानि [illegible]

[illegible]

नातिभीरोः कार्य्यचिन्ता ॥ १८ ॥

स्वामिनः शीलं विज्ञाय कार्य्यार्थी कार्य्यं साधयेत् ॥ १९ ॥

"प्राक् स्वनो मुहुर्दासश्च ततोऽश्च प्रत्ययो भवेत्।
प्रजा प्रजा यतः स्यात्तं तस्मादाहुर्मुखं बुधाः" ॥
'सुखानि' इति सूत्रपाठे धनादेरायजनितसुखानि स्फुरित्यर्थोऽवबोध्यः ॥ १७ ॥

अतिभयग्रस्तस्य जनस्य कार्य्यचिन्ताभावमाह भीतेति। अतिभीरोरधिकभयग्रस्तस्य पुंसः। कार्य्यचिन्ता कार्य्यानुष्ठानविषये मनसि कर्त्तव्यालोचनं न भवतीति शेषः। भीतेराधिक्याद्बोधमान्द्यम्। तथाच तादृशस्य पुंसः कार्य्यचिन्ता विरलेति भावः। भीरुरिति। 'भीरुत्रस्तं विनिद्दिष्ट' इत्यादरर्थोऽपि दोविति' इति त्रिकाण्डिनौ। ञिभी भये। बिभेति। 'भियः क्रुक्लुकनौ' इति क्रुः। 'क्रुकन्यो'ति वार्त्तिकात् सिद्धम्। चिन्ता। चिति स्मृत्याम्। चिन्तनम्। 'चिन्ति पूजि' इत्यादिना अङ् 'नातिभीरो'रिति सूत्रपाठेऽर्थस्तु सुबोध्य एवेति। १८।

प्रभोः स्वभाव ज्ञानपूर्व्वकं कार्य्यादिना कार्य्यसाधनमाह स्वामीति। स्वामिनः प्रभोर्मृदुकठोरत्वादिरिति यावत् शील-चरितमाचरणं स्वभावोऽभिप्रायमिति। विज्ञाय सम्यग्ज्ञात्वा। कार्य्यार्थी कार्य्यप्रार्थी कर्म्मकरः। तस्य तत् कार्य्यं कार्य्यं

[illegible] ॥ ४० ॥

[illegible] ॥ ४१ ॥

[illegible] ॥ ३९ ॥

[illegible]

[illegible]

आश्रितैरप्यवमन्यते मृदुस्वभावः ॥ ४२ ॥

"अर्थनाशं मनस्तापं गृहदुश्चरितानि च ।
वञ्चनाश्चापमानञ्च मतिमान्न प्रकाशयेत्" ॥

अन्यच्च—

"आयुर्वित्तं गृहच्छिद्रं मन्त्र-मैथुन भोजनम् ।
तपोदानापमानं नव गोप्यानि यत्नतः" ॥

अत्र 'भोजनम्' इतिपदे भेषजमिति पाठान्तरमस्ति । यथा वा सच्छिद्रे भाजने वारिरक्षणं दुरत्येव सत् । तद्वत् क्षुद्रे गुह्यवादप्रकाशे अनिष्टं भवत्येव । एवमविश्वस्तं नैव विश्वसेत् । तथा च भारते 'न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्' । गुह्यमिति । गुह संवरणे, गुह्यते, गूहनं वा । ततः 'शंसिदुहिगुहिभ्यो वा' इति काशिकातः क्यप् । क्षुद्रे दरिद्रे कृपणे निष्कृष्टेऽल्पे नृशंसयो'रिति हैम । 'क्षुदिर् संपेषणे' । ...त 'स्फायि-तञ्चि इत्यादिना रक् ॥ ४१ ॥

अनुगतैः कोमलस्वभावस्य प्रभोरवशीकरणमाह आश्रितै- ...ति । आश्रितैरनुगतैरनुजीविपरिजनैर्वा । मृदुस्वभाव- ...मलप्रकृतिविमलमतिनृपोऽन्य प्रभुर्वा । अवमन्यते अवज्ञा- ... । अथवा राज दृष्टिरनुगतैर्लोकैस्तिरस्कृतः निरुप्य नृपस्याव- ...न क्रियते इति तद्वत्स्थाय । अत स्वोचितशक्तिप्रकाशेन स्थातव्यम् । मृदुर्नम्रे च कोमले इति हैम । म्रद म्रदते प्रथिम्रदि इत्यादिना कु । मम्मटादयश्च ।

तीक्ष्णदण्डः सर्वैरुद्वेजनीयो भवति ॥ ४२ ॥

'उद खोदे' इति क्रयादिगणीयात् भवति । यत ऋकारवतो धातोरुपादाने सम्प्रसारणं न स्यात् । तदा रेफवतो औणादिके स्तोपन्यासो युक्तः । यतः 'त्रयाणां कुः सम्प्रसारणम्' इति सिद्धान्तकौमुदी मङ्गकृते नान्यथा ॥ ४२ ॥

कठोरदण्डप्रदानेन प्रजानां क्षोभाधिक्यमाह तीक्ष्णेति । तीक्ष्णस्तीव्रः कठोर इति । तादृग दण्डः दैहिकार्थिक-शासनं दमनश्चेति । तद् यस्यास्ति सः नृपः । सर्वैः प्रजावर्गैरन्यैश्च लोकैरुद्वेजनीय उपद्रवहेतुर्भवति । अतः सर्वथा अपराधिषु दम्यमानेषु तीव्रदण्डो न विधेयः । तदुक्तं रघौ 'स्थित्यै दण्डयते दण्ड्यान्' । अन्यच्च राजनीतौ । 'त्यजेत् स्वामिनमत्युग्रम् अनुग्रात् क्षपणन्त्यजेत्' । स च दण्ड स्त्रिविधः—

"वधोऽर्थग्रहणञ्चैव परिक्लेशस्तथैव च ।

इति दण्डविधानज्ञैर्दण्डोऽपि त्रिविधः स्मृतः" ॥

ब्रह्मबन्धूनान्तु बधो नास्ति, तदुक्तं भारते—

"वपनं द्रविणादानं स्थानाद्विवासनन्तथा ।

एषैव ब्रह्मबन्धूनां बधो नास्तीति दैहिकः" ॥

आततायिनान्तु बधः समुचितः । तदुक्तम् 'आततायिवधे दोषो हन्तुर्भवति कश्चन' । अन्यदर्थशास्त्रे पुष्कलमस्ति । 'दण्डो यमे मानभेदे लगुडे दम-सैन्ययो'रिति विश्वः । दण्ड निपातने, दण्डयति, अनेन वा । पचाद्यच्, दमेर्डश्च 'पुंसि' घप्रत्ययो वा ।

ततो यथार्ह-दण्डः स्यात् ॥ ४४ ॥

"तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके ।
क्लीबं यवाग्रजे पुंसि तिग्मात्मत्यागिनो त्रिषु" ॥
इति मेदिनी । तिज् निशाने, भजयति 'तिजेर्दीर्घश्च' इति क्स्नः । मर्व गतौ, इत्यतः पचाद्यचा सर्व इति ॥ ४६ ॥

तथा योग्यदण्डमपराधिष्वाह तत इति । यतः प्रजादण्डा-लोकोद्वेगो भवति । ततो यथार्हो यथायोग्यः, लघुगुर्वपराध-भेदेन दण्डो दमनं विधेयम् लघ्वपराधे गुरुदण्डः, निरपराधे दण्डो लघुदण्डो वा तथा गुर्वपराधे लघुदण्डः, गुर्वपराधेऽदण्ड-प्रभृतयोऽप्रयोज्याः । दण्डः शास्तिः । स च त्रिविधः प्रागुक्तः ।
उक्तञ्च—

"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत्" ॥

अपरञ्च—

"अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ।
अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्जयेत्" ॥

इति स्मृतौ । दुर्लिङ्गबन्धनौ च ।—

"दण्डः संयमने धर्मेन्द्रादौ विधायके ।
कार्ये संयमने दमनात् स्त्रियां दण्डः स्मृतः" ॥

सारं माहाजनः संग्रहः पीडयति ॥ ४५ ॥

"राजदण्डभयाल्लोकाः पापाः पापं न कुर्वते" ।
इत्यन्यत्तत्रैव, मानवे सप्तमाध्यायेऽपि । सोमदेवोऽप्याह 'चिकित्सागम इव दोषविशुद्धिहेतुर्दण्डः' । यो दण्डः अपराधिनां क्रियते स सर्वदोषविशुद्धेः हेतुः कारणम् । यथा चिकित्सागमः वैद्यकं सर्वदोषसन्निपातानां विनाशहेतुर्भवति, तथा दण्डः । तदुक्तं गर्गेण—

"अपराधिषु यो दण्डः स राष्ट्रस्य विशुद्धये ।
विना येन च सन्देहो मात्स्यन्यायः प्रवर्त्तते" ॥
"शूले मत्स्यानिवापक्ष्यन् दुर्बलान् बलवत्तराः" ।

इति मानवोक्तो मात्स्यन्यायः । सापराधे दण्डप्रणयनं विना भवेदिति । प्रागुक्तमन्यत् पदनिरुक्त्यादिकम् ॥ ४४ ॥

महाजन-संग्रहस्य सार-पीडनत्वमाह सारमिति । दीनस्य कार्य्यं यदि महाजनसंग्रहो भवेत्तदा कर्म्मणः सारं श्रेष्ठभागं पीडयति हरति, अपहन्ति च । महाजनस्यायं महाजनः । संग्रहः सम्मेलनम् । सूत्रस्यास्य पाठान्तरमस्ति, तद्यथा 'अल्पसारं श्रुतवन्तमपि न बहु मन्यते लोकः' । तथा च श्रुतवन्तं विद्वांसं सुधीरम् अल्पसारं सन्तमपि लोका न समाद्रियन्ते । अल्पोऽनधिकः सारः स्थिरांशो यस्य स तम् 'श्रुतं शास्त्रावधृतयोः' इत्यमरः । अस्यैव पाठो रुचिरतरः । 'सारो बले स्थिरांशे च' इति मेदिनी 'संग्रहो बृहदुद्धारे ग्रहसंक्षेपयोरपि' इति हैमः ।

अतिसारः पुरुषमवसादयति ॥ ४६ ॥

यः संसदि परदोषं वक्ति स स्वदोषबहुत्वं प्रख्यापयति ॥ ४७ ॥

मेदिनीकारोऽपि 'संवहो वहदुद्गरे मुष्टिसंश्लेषयोरपि'। छन्दोनस् सूत्रपाठो बोध्यः। सृ गतौ, सरति कालान्तरम्। 'सृस्थिरे' इत्यनेन घञ्। ग्रह उपादाने, संग्रहणम्। संपूर्वात् 'ग्रहवृदृ' इत्यादिना अप्। श्रुतमिति। श्रु श्रवणे, श्रवणम्। श्रयीतिः क्तः ॥ ४५ ॥

गुरुभारेण पुरुषस्यावसन्नत्वमाह अतीति। अतिभारः। कार्य्याधिक्यगुरुता, शक्तेरधिककार्य्यगुरुत्वेनावनमनं वा। पुरुषं जनमवसादयति, तच्छक्तिहानिं करोति। कार्य्यभारेण परिश्रान्तो भवति। गुरुत्वेनाधःपतनयोग्यता भार इति केचित्। 'भारः स्याद्वीवधे विंशौ पलानां द्विसहस्रके' इति मेदिनी। 'भारः सहस्रद्वितये पलानामपि वीवधे' इत्यजयः। 'भारो गुरुत्वे द्रव्याणां भार. स्यादवसादके' इति कश्चिदपि। भृञ् भरणे, भ्रियते। 'अकर्त्तरि च' इति घञ्। प्रागुक्तमन्यत् ॥ ४६ ॥

सभायां योऽन्यदोषं प्रकाशयति तस्य तेन स्वदोषख्यापनावसरमप्याह य इति। संसदि परदोषमन्यदोषकुत्सनं वक्ति सूचयति। स जनः स्वस्यात्मनो दोषबहुत्वे दोषाणां प्राचुर्य्यं प्रख्यापयति प्रकटयति। येन यस्य दोषः प्रख्याप्यते तेन स्वस्यापि

आत्मानमेव पीड़यत्यनात्मवतां कोपः ॥ ४८ ॥

निन्दावसरो विश्राम्यति । अतः परकीयदोषप्रख्यापनं न युक्तम् । तेनाशालित्वमपि वर्द्धते । तदुक्तमभियुक्तैः—

"यदीच्छसि वशीकर्त्तुं जगदेकेन कर्म्मणा ।
परापवाद-सस्येभ्यो गां चरन्तीं निवारय" ॥

गां दोषसूचकं वाक्यमिति । संसत् । सं परितः सीदन्ति अस्याम् । षद्लृ विशरणादौ, परिसदनम् । 'सम्पदादित्वात् क्विप्' । दोषः । दुष वैकृत्ये, ततोऽच् । संसदीति पदेन प्रकाशे इति व्यक्तम् । प्रयोजनविशेषे गुणदोषकथने परोक्षे न दोष इति सूच्यते ॥४७॥

अनात्मवतो कोपेन आत्मनो व्ययमाह आत्मानमिति । आत्मानं मानसम् । अनात्मवतां हीनजनानामप्रगल्भमनसां वा । कोपः क्रोधः इति । पीडयति व्यथयति दुःखयति च । अथवा अनात्मवतां क्षुद्रचित्तानां यथा कोपो रोषः आत्मानं स्वं मानसं पीड़यति नाशयति । न च क्रोधाद्दीपनेन कार्य्येऽधैर्य्यादात्मान-मपि हन्ति । पीड़यतीत्यत्र नाशयतीति पाठान्तरमादर्शपुस्त-केऽस्ति । अमर्षापिणो क्रोधः अधैर्य्यादविवेकाद्यात्मनाशकारो स्यात् । मतिमता कोपेन तादृश । यतः 'धीराः प्रकुपितस्यापि मनो नायाति विक्रियाम्' । अन्यच्च 'विकार हेतौ सति विक्रि-यन्ते येषां न चेतांसि त एव धीराः' इति । अधैर्य्यनात्मवन्तः मूर्खचित्ताः तेषां कोप आत्मानं व्यथयति । कुप क्रोधे, कोपनम् । तस्मिन् भावे घञ् ॥ ४८ ॥

नास्त्यप्राप्यं सत्त्ववताम् ॥ ४९ ॥

साहसे खलु श्रीर्वसति ॥ ५० ॥

प्रशस्तमनसो जगति सर्वप्राप्ति-सम्भावनामाह नेति। सत्त्ववतां मनीषिणां जनानां विशेषतः उद्योगि-जनानामप्राप्यम् अलभ्यं नैव विद्यते। तेषां प्रयत्नेन मनीषया च सर्वमेव लभ्यम्।

"सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः।

आत्मत्व-व्यवसायेषु चित्तेऽप्यसौ तु जन्तुषु" ॥

इति मेदिनी। सीदत्यस्मिन् गुणादयः। सद् धातोः 'अन्येभ्योऽपि दृश्यते' इति त्वन्। यत्नोद्यमाध्यवसायैर्मतिमतां सर्वे सुगमं भवति। केचिदाहुः 'यत्ने कृते यदि न सिध्यति कोऽत्र दोषः'। अस्यायमर्थः—यत्ने कृते सति यदि कार्यं न सिद्ध्यति तदा तस्मिन् यत्ने कोऽपि दोषो वर्त्तते, अत्र पुनर्यत्नो विधेयः ततः कार्यं सेत्स्यति। सत्त्ववतामित्यत्र 'सत्यवता'मिति पाठे त्वयमर्थः। सत्यवता सत्यशीलानां सत्यवादिनामिति ॥ ४९ ॥

कुत्र श्रीविराजते तदाह साहस इति। साहसे मानसोद्दीपनमूलकसामर्थ्य शारीरके वा खलु निश्चितम्। श्रीर्लक्ष्मीर्वसति नियतमधिष्ठानं करोति। तत्र केचिदुक्तम्। 'साहसाद् भजते लक्ष्मी'। पुरुषमिति शेषः। अन्यत्र-

"गुरु कृतात्मा हठमोद्गत्व

लक्ष्मी, स्वयं याति निवासहेतोः।"

साहसः। 'साहसन्तु दमे दुष्करकर्मणि अविमृश्यकृतौ धार्ष्ट्ये'-

[illegible] ॥ [illegible] ॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

नास्त्यनन्तरायः कालक्षेपः ॥ ५२ ॥

असंशयविनाशात् संशय-विनाशः श्रेयान् ॥ ५३ ॥

'उपसर्गाद्धति' इत्यादिना हृतो णत्वं इति। अर्थेत्याह: अर्द हिंसायाम्, अर्दनम्। अर्दयतेः ल्युप्रत्ययेनाप्तं इति ॥ ५१ ॥

कालक्षेपोऽन्तराय-सद्भावाद् भवति। यस्य कालक्षेपः समयातिपातो नास्ति सोऽनन्तरायः। अन्तरायः प्रत्यूहो विघ्नश्च। अनन्तरायः विघ्नहीनो जनः शीघ्रं कार्यं सम्पादयति। तत् फलञ्च लभते। अतः कार्यं विघ्नरहितं भवेत् समयक्षेपो न भवेत्तथैव यतितव्यम्। यदा योऽनन्तरायः पुमांस्तस्य कार्ये कालक्षेपो नास्ति। 'कालक्षेपं' इति पाठे, कालक्षेपं अन्तरायो विदधाति इत्यर्थः स्यात्। 'विघ्नोऽन्तरायः प्रत्यूहः।' अन्तर्मध्ये अन्तरस्य व्यवधानस्य वा अयनम्। अय गतौ, इण् गतौ च इत्येतयोर्धातोः अच् वा। क्षेप। 'क्षिप प्रेरणे' क्षिप्यते इत्यस्माद् धातोर्घञ्। ॥ ५२ ॥

असंशयविनाशाद्विनाशसम्भावनाभावात् [illegible] प्रतिपादयति। असंशयस्य विनाशात् सम्मुख[illegible] संशयस्य सन्दिग्धस्य विनाशः श्रेयान् इत्याशयः। अथवा नास्ति संशयो यस्मिन् इत्येव। निश्चितात् सन्दिग्धनाशः श्रेयान्। [illegible] सन्देहस्य विनाशात् [illegible] सन्देहस्य विनाशः श्रेयान्। [illegible] सन्देहे सति तत्र [illegible]। सन्देहे [illegible]

अपरधनानपेक्षं केवलमर्थदानं श्रेयः ॥ ५४ ॥

प्रवृत्तिर्भवति। 'विचिकित्सा तु संशयः'। एकधर्मिणि विरुद्धानेक कोट्यवगाहि ज्ञानं संशयः, यद्वा उभयकोटिस्पृक् विज्ञानम्। पिशाचो वा स्तम्भो वेति। शीङ् शयने, शेते। संपूर्वात् शीङः एरच्। नश अदर्शने, विनशनं विनाशः। विपूर्व्वात् नश्धातो घञ्। 'अतिशायने प्रशस्तः'। 'अतिशायने तमबिष्ठनौ'। 'प्रशादिगुणवचनादिष'। 'प्रशस्यस्य श्रः' ईयसुनि रूपम्। 'श्रेयो शुक्लो शुभे धर्म्मे' इति विश्वः ॥ ५३ ॥

स्वीयार्थस्य स्वेच्छया परहितार्थं दानमाह अपरेति। परस्य यद्धनं तस्यापेक्षामकृत्वा केवलं निःस्वार्थदानमात्रं श्रेयो शुभमिति। अपरस्य धनापेक्षा नास्ति यस्मिन्नर्थदाने तत्। एवं दानं श्रेयः श्रेष्ठं भवति। प्रत्युपकारापेक्षया दानं स्वार्थानुसन्धानपूर्वक दानञ्च न सम्यक् इति। तदुक्तं गीतायाम्—

"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।

देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्" ॥

एवं भारते च—

"दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।

व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः." ॥

श्रुतेश्च 'त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमि'ति। तैत्तिरीये 'दानेन द्विषन्तो मित्रा भवन्ति, दानेन सर्वं प्रतिष्ठितं, तस्माद्दानं परमं वदन्ति'। 'तस्मादेतत्त्रयं शिक्षेद् दमं दानं दयामि'ति। 'दान·

न्यायागतोऽर्थः ॥ ५५ ॥

तद्विपरीतोऽर्थाभासः ॥ ५६ ॥

नैकं कलौ युगे' इति स्मृतावपि। 'धनन्तु गोधने वित्ते' इति विश्वः। धन धान्ये, धनति। तत. अच्। 'अर्थ उपयाच्ञायाम्' अर्थ्यते। 'अकर्तरि च' इति घञ्। अर्थस्य तिस्रो गतयो भवन्ति। दानं भोगः संचयश्चेति ॥ ५४ ॥

अर्थस्य वैशिष्ट्यमाह न्यायेति। न्यायेन सुनीत्या समुचितोपायेन परोद्वेगाकरणेन। आगतं प्राप्तं समुपार्जितं यद्धनं तदेव सम्यगर्थः। आदर्शग्रन्थान्तरे अस्मात् प्राग् 'दानं धर्मः' इति पृथक् सूत्रितमस्ति। न तत् शोभनम्, तत्पूर्वसूत्रेण तस्य गतार्थत्वात्। 'अपर-धनानि निक्षेपुः केवलं स्वार्थम्' इति पूर्वसूत्रस्थानीयत्वेन सूत्रान्तरमादर्शग्रन्थान्तरे दर्शनात्। तस्यायमर्थः। अन्ये या धनानां स्वस्मिन् निक्षेपकरणं न्यासकरणं रक्षणमिति। तत् केवलं स्वार्थं स्वप्रयोजनपूरणमिति। यत्र तत् स्वरावधारणेनोपपन्नमस्ति। न तत्रैव समन्वयम्। लिङ्गपदेन यस्य यद्द्रव्यमस्ति तदवधारणात्। न्यायो नीतिः दर्शनं च न्याय्यमौचित्यमित्यपि इति प्राञ्चः। यथा 'विषयार्थनयोर्धनकारणवस्तुषु' इति मेदिनी। न्याय। परिन्यायिनां ईण् गतौ, नियमेन ईयते इति। इति घञ् ॥ ५५ ॥

सदुपायलब्धार्थभिन्नो योऽर्थस्तमाह तदिति। तस्मान्न्यायागताद्विपरीतोऽन्यथा प्रकारेण लब्धो योऽर्थो धनादि सोऽर्था

तद्विपरीतः कामाभासः ॥ ५८ ॥

कामार्थेति नीतिविदां त्रिवर्गः। 'धर्मकामौ पुरुषार्थौ' इति चार्वाकाः। तदेव कामशास्त्रकाराणां मतम्। 'धर्मार्थकामाः सममेव सेव्याः' इति कविसमयः। 'धर्मार्थकाममोक्षा इति चत्वारः पुरुषार्थाः' इति धर्मविदः। 'धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभः' इति गीतायाम्। 'परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ' इति भारते विदुरनीतौ च। धर्मविरुद्धार्थकामौ परित्यजेदित्यर्थः। मोक्षस्य नीतावनुपयोगित्वात्तस्यात्र नादरः। मुमुक्षूणां स श्रेयान्। धर्मविरुद्धे कामे इन्द्रियाणि भोगलौल्यात् चिरं विषयेषु प्रवर्त्तन्ते। तेनापदः सम्भवन्ति। 'कामः स्मरे इच्छायां पुमान्, रेतस्यपि निकामे च कामेऽपि स्यान्न-पुंसकम्' इति रभसः। कमु कान्तौ, कमनम्। ततो घञ् ॥ ५७ ॥

धर्मार्थप्रतिकूलं काममाह तद्विति। तस्माद्धर्मार्थानुकूलकामात्। विपरीतो भिन्नः धर्मार्थयोः पीडाजनको यः कामः स कामाभासः। यथार्थकामतुल्यो भवति। काम इवाभासते प्रकाशते न तु स्वाभाविकः कामः। तेन न स्वपरेष्टं स्यात्। स्वानिष्टकरे विषये इच्छा दुष्कामः। तथा परानिष्टकरे विषयेऽपि। कामाभास इत्युक्ते आपत्काले समुपस्थिते कामाभासोऽपि दुष्परिहरणीयः, सांसारिककार्यस्यानवस्थितेः। तथाहि—

ऋजुस्वभावः परिजनो दुर्लभः ॥ ५८ ॥

आततायिनि समुपस्थिते तदुच्छेदकामो न कामाभासः । आभास इत्यत्राङ् ईषदर्थे नतु सम्यगर्थे । यथाच,—

"अकामस्य क्रिया काचित् क्वचिन्नेह दृश्यते ।

यद्यज्जगति पश्यामि तत्तत् कामस्य चेष्टितम्" ॥

इत्युक्तमभियुक्तैः । भास दीप्तौ, आभास्यते । ततो घञा सिद्धम् ॥ ५८ ।

सरलप्रकृतयः परिजना जगति असुलभा इत्येतदाह ऋज्विति । ऋजुः सरलः कापट्य-शाठ्य-क्रौर्यरहित इति । ऋज्विति भावप्रधाननिर्देशो वा । स्वस्यात्मनोभावः स्वभावः । तादृशी प्रकृतिर्येषां परिजनानां ते । दुर्लभा दुष्प्राप्या भवन्तीति शेषः । परिजनाः कुटुम्बाः परिवारा इति । महतः सौभाग्यादेव ते क्वापि लभ्यन्ते । यस्य तु तादृशः स्वजनवर्गस्तस्य कार्यसिद्धिरवश्यम्भाविनी । सुतरां तादृग् श्रेयम् । यस्य त्वनीदृशः तस्य सर्वं विपदाप्पदम् । 'ऋज्जवजिह्मप्रगुणो' इति । अर्ज अर्जने, अर्जति । 'अर्जिदृशि' इति साधुः । ननु अपद्वादित्वात् कुः । 'अप दुः सुपश्य ' इत्युणादिसूत्रस्य प्रागेवभावात् । गुणाभावाश्च न कुप्रत्ययः । परितो जनाः परिजनाः पोष्यवर्गाः । तथा च स्मृतिः—

"माता पिता गुरुर्भार्या प्रजा दीनाः समाश्रिताः ।

अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्गा उदाहृताः" ॥ इति ॥५८॥

अवमानागतमैश्वर्यमवमन्यते साधुः ॥ ६० ॥
बहूनपि-गुणानेको दोषो ग्रसते ॥ ६१ ॥

अवज्ञया समागतार्थस्य साधोस्तत्रावमानमाह अवेति। अवमानेन परिभवेनावगमयति। तेनागतं प्राप्तमैश्वर्यं वा, साधुः सत्यपरायणः परिव्राड् वेति। अवमन्यते, स्वीयसम्मानहानात् तदवजानाति। यतः 'मानो हि महतां धन'मिति। अन्यच्च— 'प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम्'। सामान्यं वस्तु सतोऽवमन्यते साधुना। विशेषतोऽवमानादागतमैश्वर्यं राज्यमवमन्यते, साधुत्वनाशभयात्। 'अवमाननावशायहृन-मम्' इति। 'मनु बोधने' मन्यते। मनेरवपूर्वाद् घञ्। ईश्वरस्य भाव ऐश्वर्यम्। इत्यतः ईशेर्वरच्। 'गुणवचन' इत्यादिना ष्यञ्। 'साधुर्वार्धुषिके चारौ सज्जने चाभिधेयवत्' इति विश्वः। 'साध संसिद्धौ' साध्नोति हितम्। 'कृ वा पा' इत्यादिनोण्। ऐश्वर्यमणिमाद्यष्टौ शक्तय ॥ ६० ॥

दोषस्य प्राबल्यादनिष्टकरत्वाच्च बहून् गुणान् सोऽपहरतीति तदाह बहूनिति। प्रबल एको दोषो लोकप्रसिद्ध सन्। बहून् नानाविधान् शौर्य धैर्यादिगुणान् ग्रसते समाक्रमति। गुणः स्वोत्कर्षाधायकः। दोषो ह्यात्म मालिन्यकरः। एक एव दोषः सर्वगुणहानिकरः इत्यतः सर्वथा दोषः परिहार्यः। तदुक्तं कविना 'दारिद्र्यदोषो गुणराशिनाशी' इति। 'किं कुलेन विशालेन गुणहीनस्तु यो नरः' इति स्वाय मधुषाचके।

महता साहसं न परेण कर्त्तव्यम् ॥ ६२ ॥

कदाचिदपि चारित्रं न लङ्घयेत् ॥ ६३ ॥

"गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये।
स्तुतौ ना न स्त्रियां भेदे रूपाक्षरविलेखने" ॥

इति मेदिनी। अन्यच्च 'धनुर्वंशो विशुद्धोऽपि निर्गुणः किं करिष्यति'। गुण आमन्त्रणे, गुण्यते। ततो घञ्। 'बहु स्याद्यादि संख्यासु विपुलेऽप्यभिधेयवत्' इति विश्वः। बहि वृद्धौ, 'लङ्घिबंह्योर्न लोपश्चे'त्युमत्ययः ॥ ६१ ॥

महतो जनस्य परेण साहसकरणनिषेधमाह महतेति। महता शक्तिमता मतिमता च। परेण तादृशेन बलवता शत्रुणा सार्द्धम्। साहसं शक्तेरत्युद्यमम् अबुद्धिपूर्वकं करणं वा न कर्त्तव्यं नैव विधेयम्। तुल्यशक्तित्वात्तादृशसाहसकरणे स्वस्य हानिः पराजयोऽयशश्चापीति भावः। सूत्रमिदमन्यथा व्याख्यायते। परेण महात्मना साहसं न कर्त्तव्यमिति। स्वस्य मर्म ज्ञात्वा परममपि शत्रो रुद्घाटनं युक्तमेवेति। महसि भवं साहसम्। 'साहसन्तु दमे दुष्करकर्मणि। अविमृश्यकृतौ धार्ष्ट्ये' इति हैम.। महः शब्दात् 'तत्र भवः' इत्यण्। मह पूजायाम्, महति। 'वर्त्तमाने पृषद्बृहन्महत्' इति निपातनात् साधुः ॥ ६२ ॥

चारित्रलङ्घन-निषेधमाह कदाचिदिति। कदाचित् कस्मि-

न क्षुधार्तोऽपि सिंहस्तृणमत्ति ॥ ६४ ॥

यदपि काले लोभाद्रागात् कामाद्वा चरित्रं शौशील्यं औदार्यम् शरीरेन्द्रियसुखव्यवहारश्च। न लङ्घयेत् नापि परिहरेत्। चरित्रमेव सर्वकार्यसमुन्नतेर्मूलम्। तदुक्तं गुरोः 'सर्वदा सर्वयत्नेन चरित्रमनुपालयेत्'। 'शीलेन कुर्याद्वश'मिति च। चरित्रमेव चारित्रम्। 'निष्ठा च शीलं चारित्रं चरित्रस्तथा' इति रत्नकोषः। 'शीलं स्वभावे सद्वृत्ते' इति विश्वः। चारित्र्यलङ्घनेऽविश्वस्तः स्यात्। सच्चरित्रे सर्वं प्रतिष्ठितमिति रहस्यम् ॥ ६३ ॥

महाजनो विपत्तावपि न हीनतां याति तद्दर्शयति नेति। सिंहो मृगेन्द्रः इति। क्षुधार्तः क्षुधया अन्नयार्तः पीडितः। मांसं परिहरन् तृणं ग्रासं न चरति नैव भुङ्क्ते। अपिना क्षुधाधिक्यं सूचितम्। अत. सुजनो विपद्यपि सौशील्यं न लङ्घयेदिति पूर्वसूत्रानुबन्ध। तदुक्तं कविभि 'सम्पत्तौ च विपत्तौ च महतामेकरूपता' इति महामनस्त्वादपि स्वचरितं न लङ्घयेदिति रहस्यम्। यथा राजयुधिष्ठिरभोजनृपादय। 'सिंहः कण्ठीरवे राशौ नक्षत्रे च त्वरान्विते। सिंही तु कण्टकार्यां स्या'दिति मेदिनी। हिसि हिंसायाम्, हिनस्तीत्यच्। पृषोदरादित्वात् साधु वर्ण वदन वर्णन। ततो घञ। नापि गुणः संज्ञापूर्वकत्वात्। अन्यत् सुगमम् ॥ ६४ ॥

बालादप्यर्थजातं शृणुयात् ॥ ६७ ॥
सत्यमप्यप्रियं न वदेत् ॥ ६८ ॥

पापमिश्रं परिगणितम् । अन्यत्रोक्तं 'दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन्' इति । 'पिशुनं कुङ्कुमेऽपि च । कपिवक्त्रे च काके ना पृषत्कन्दरयोस्त्रिषु' इति मेदिनी । पिश् अवयवे, पिंशति । 'क्षुधिपिशिमिथिभ्यः कित्' इत्युनेनोनन् । 'दाराः कलत्रं भार्य्येति' । 'एकाभिधार्थवाचकत्वेऽपि लिङ्ग-वचनभेदः' । दॄ विदारणे, दारयति भ्रातॄन्, णिजन्तोऽयम् । 'दारजारौ कर्त्तरि णिलुक् च' इत्यतो घञ् । अन्यदाकरेऽस्ति ॥ ६६ ॥

शिशोः सकाशादपि सत्यार्थं सङ्ग्रहस्य श्रवणयुक्तिमाह बाला-दिति । बालाच्छिशोः सकाशात् । अर्थजातं विषयसमूहं शृणुयादाकर्णयेत् । तदुक्तं धीरैः 'बालादपि सुभाषित'मिति । सुष्ठु-सम्यग् हितं प्रीतिकरं वचो भाषितमुक्तं सुभाषितम् । अपि तु न केवलं विदुषः । यद्वा अपिरत्र निश्चयार्थे, अवश्यं श्रोतव्यमिति । अन्यत्रोक्तं —

'युक्तमुक्तन्तु गृह्णीयाद् बालादपि विचक्षणः ।
रवेरविषयं वस्तु किं न दीपः प्रकाशयेत्' इति ।

'जातं व्यक्तौघजन्मसु । क्लीबं त्रिलिङ्गमुत्पन्ने' । जनी प्रादुर्भावे, जायते । तस्मात् क्तप्रत्ययः । 'जनसन' इत्यादिनात्वम्, 'तितुत्र' इति नेट् ॥ ६७ ॥

लोकोद्वेगकर-सत्यकथननिषेधमाह सत्यमिति । अयर्हेयं

विपश्चित्स्वपि सुलभा दोषाः ॥ ७० ॥

सर्वदा जगति सत्यभाषणं दुर्लभमतो वह्निधूमयोः नियतसम्बन्धत्वेनैकेच्छायामपरस्मरणवत् विषयस्याभाव्याद् भाषणत्वेन सत्यभाषणे कदाचिदसत्यमपि समायात्येव। व्यावहारिके विषये सत्यानृतमिथुनीभावः नैसर्गिक एव। पारमार्थिके तु तदभावः। यद्वा सत्यासत्ययोर्नियतविषयसम्बन्धत्वेन विषयव्यवहारे एकेच्छायामपरस्य त्यागः सुदुष्कर इति नवीनाः सूरयः। आदर्शपुस्तकान्तरे तु 'नाल्पदोषाद् बहुगुणास्त्यज्यन्ते' इति सूत्रान्तरमस्ति। अस्यार्थश्च अल्पदोषाद्धेतोर्बहवो गुणा न त्यागार्हा भवन्ति। पूर्वोक्त सूत्रेणास्य गतार्थत्वान्नात्रोक्तम् ॥ ६८ ॥

विदुषामपि दोषस्यापरिहार्यत्वमाह विपश्चिदिति। व्यवहारकाले विपश्चित्सु मनीषिषु सुधीष्विति। दोषाः शरीरेन्द्रियमनसां वैकल्यानि। तेषामयथार्थमनृतत्वञ्चेति। यद्वा शारीरदोषाः आलस्याधिव्याधयः। इन्द्रियदोषाः आन्ध्यबाधिर्यादयः। मानसदोषाः क्रोधेर्ष्यासूयाकामादयः। विषयदोषाः प्रमाद-मोह-भ्रम-लोभजनकत्वादयः। विषयस्यास्थैर्यात् कालस्य विपर्ययात् विषयप्राचुर्याच्च व्यवहारकाले विद्वत्स्वपि दोषाः भवन्ति। अविद्वत्सु ते नियतं सुलभा एव। यथा ते दोषा अस्थैर्या हानिकरा मनुष्यस्यैव सदा वर्त्ति तथ्यम्। 'आकर्षणे क्रिया छर्दिर्भंशेचास्तु विपर्यति' इति रक्षितदेव। मज्ञ्६ निश्चिनोति, चेतयति, चिन्तयति वा, 'पृषोदरादित्वात्' विपश्चिदिति साधु. ॥ ७० ॥

नास्ति रत्नमखण्डितम् ॥ ७१ ॥
मर्य्यादाभेदकं न कदाचिदपि विश्वसेत् ॥७२॥

रत्नस्यापि विभक्ततामाह नेति। सद्रत्नमपि सर्वजात्युत्कृष्टम् अखण्डितं परिपूर्णं सर्वथा दोषशून्यं वा नास्ति। मालिन्यवक्रादिदोषास्तेष्वपि महार्घ-मणिषु सम्भवन्ति। अतो विद्वत्स्वपि तथैव दोषाः सम्भाव्याः। रत्नानां दोषो गुणश्चैषां परीक्षा मूल्यनिरूपणञ्चेति भोजराजकृत कल्पतरौ विद्यते। 'रत्नं स्वजातिश्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी। 'रमु क्रीड़ायाम्' रमयति। रमन्तोऽलमीयितन्यरौ वा। रमन्तेऽस्मिन् 'रमेस्तच' इति नप्रत्ययः। 'नेङ् वशि' इत्यादिना नेट्, 'नेरनिटि'। यद्वा बाहुलकात् क्नप्, तुक् चेति। व्यक्तमन्यत् ॥ ७१ ॥

कार्य्यमर्य्यादाहानिकारस्य विश्वासाभावमाह मर्य्यादेति। मर्य्यादा अवधिः संस्था निष्ठेति यावत्। तस्या मर्य्यादायाः कार्यनिर्देशस्य भेदकं हानिकारकम्। कस्मिन्नपि काले नैव कोऽपि विश्वसेत् विश्वासं कुर्य्यात्। यदि कोऽपि वारमेकं वारद्वयं वा कर्म-रीतिं न्याय्यादिकञ्च मङ्घयेत्तदा तं नैव विश्वसेत्। किन्तु कार्य्यविशेषे परीक्षेत। यतोऽयं न्याय्यपथं परिहृत्य वर्त्तते मनेति। 'संस्थातु मर्य्यादा धारणा स्थितिः' रित्यमरः। मर्य्या इति सीमार्थेऽव्ययम्। तत्र दीयते इति 'प्राग्वदङ्' ॥ ७२ ॥

अप्रियेण कृतं प्रियमपि द्वेष्यं भवति ॥ ७३ ॥

नमन्त्यपि तुलाकोटिः कूपस्योदक-क्षयं करोति ॥ ७४ ॥

अविमृश्य सहसानुष्ठितस्य कार्यस्य द्वेष्यत्वमाह अप्रियेणेति। अनभीष्टप्रकारेणापरीक्षितेनेति। कृतमनुष्ठितं सम्पादितं यत् कर्म। तत् प्रियमपि इष्टं चेदपि तदाऽप्रियानुष्ठितत्वाद् द्वेष्यं पुनः सन्दिग्धत्वेनाप्रियमशोध्यं स्यात्। अतोऽनुष्ठातुर्विचारकत्वेन प्रियत्वेन कृतकार्यस्य प्रीतिकरत्वमिति भावः। 'अप्रिये कृतम्' इति पाठस्तु पाठभेदोऽस्ति। तेनायमर्थः अप्रिये जनो कृतं यद्बहुतममपि कार्यं मन्दं स्यादिति। 'प्रियो हृदयोऽपि द्वेष्ये धर्मे' इति हेम। द्वेष्य द्वेष्यार्हं। द्विष् अप्रीतौ, तस्मात् प्रत्ययः। 'ऋहलोर्ण्यत्' इति ण्यत्। 'वृञ्' इति वा। 'द्वेष्ये त्वक्षिगतः' इत्यमरः। अक्षिगतोऽक्षिविषयं गत इत्यर्थः पाठेऽद्यादि ॥ ७३ ॥

तुलाकोटिर्धा नमन्त्यपि कथान् [illegible] कूपोदकस्य [illegible] [illegible] तुलाकोटि तुलादण्डस्य [illegible] [illegible] [illegible] कृपस्य [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तुलादण्ड [illegible]

सतां मतिं नातिक्रमेत् ॥ ७५ ॥

तेऽपि कूपोदकस्य शोषणं क्रमेण करोति । देशविशेषे देवमाढ़कभूमौ तुलादण्डस्य एकस्मिन् पार्श्वे जलसंग्रहपात्रम्, अपरस्मिन् पार्श्वे गुरुभारद्रव्यं विन्यस्य ग्रामवासिनः क्षेत्रे सलिलसेकार्थं तदुत्तोलनं कुर्वन्तीति । 'तुला सादृश्यमानयोः । गृहाणां दारुबन्धाय पीठिकायामपीष्यते' इति विश्वमेदिन्यौ । तुल उन्माने तोलयति । चौरादिकादच् । 'अतुलोपमाभ्याम्' इत्यादि निपातनाद् गुणाभावः । णिजभाव पक्षे तु 'इगुपध' इत्यादिना कः स्यात् । 'कोटिः स्त्री धनुषोऽग्रेऽस्त्री-संख्याभेद प्रकर्षयोः' इति मेदिनी । कोटिः । कूट कौटिल्ये, कोटयति । 'अचइः' इत्यौणादिकादिः । अथवा 'इञजादिभ्यः' इति वार्त्तिकादिञ् ॥७४॥

सज्जनानां मतिलङ्घने निषेधमाह सतामिति । सतां साधूनां समोच्चकारिणा प्रेक्षावतामिति यावत् । मतिं ज्ञानमुपदेशं मनीषां वा । नातिक्रमेन्नैव लङ्घयेन्नावहेलयेद् वेति । ये तु विद्याप्रज्ञापारदर्शितादिभिर्वस्तुतत्त्वमवबुध्यादेशं विदधति तेषामादेशं हेला प्रमादाविवेकादिभिर्नैव लङ्घयेत् । तदतिक्रमे तु स्वस्य महानिष्टं स्यादिति भावः । 'सन् साधौ धीरप्रशस्तयोः । मान्ये सत्ये विद्यमाने' इति मेदिनी । अन्यत्र च 'महाजनः । सभ्यसज्जन-साधवः' । सदिति । अस् भुवि, अस्ति । 'लटः शतृ' इत्यादि । 'श्नसोरल्लोपः' । 'धीः प्रज्ञा शेमुषी मतिः' । मन ज्ञाने, मननं मन्यतेऽनया वा । 'मतिबुद्धीच्छयाः' इति क्तिन् ।

गुणवन्तमाश्रित्य निर्गुणोऽपि गुणी भवति ॥७६॥
घोराश्रितमुदकं घोरमेव भवति ॥७७॥

'मत'मिति भिन्नपाठे साधूनां मतं नातिक्रमेदित्यर्थः स्यात् ॥ ७५ ॥

सतामाश्रयेणासतोऽपि सत्त्वं दर्शयन्नाह गुणवन्तमिति। निर्गुणो गुणहीनः। गुणा वैदुष्यशौर्यमहत्त्वादयः। तेभ्यो हीनो निर्गुणः। यद्वा नञत्रेषदर्थे। निर्गुण इति अनुदरा-कन्यावदल्पगुणयुक्त इत्यर्थः। गुणवन्तं गुणिनमाश्रित्यावलम्ब्य तद्गुणग्रहणादिना निर्गुणो गुणवान् भवतीत्यर्थः। गुणाः सत्त्वादय इति सांख्यज्ञाः। शुक्लादय इति शाब्दिकाः। श्वेतादयः इति शिल्पिनः। चतुर्विंशति संख्यका गुणा इति नैयायिकाः। सन्ध्यादयः षडिति स्मरति। धीरोदात्तादय इति कविसमयः। अन्ये तु चतुःषष्टिकलाविद्या अपि कामशास्त्र-मन्त्रशास्त्रोक्ता गुणत्वेन व्यवहरन्ति। 'गुणोऽज्या सूत्रतन्तुषु'।

'रज्जौ सत्त्वादौ सन्ध्यादौ शौर्यादौ भीम इन्द्रिये।
रूपादावप्रधाने च'ेति हैम।

गुण आमन्त्रणे गुणयति, गुणति च। घञ् यथा वा सिद्धम् ॥ ७६ ॥

ग्राम्य-सम्मेलननाम्न्यापि तच्छ्रयया ग्राम्यत्वमाह घोरेति। घोरं दुर्गं पय इति। तदाश्रितमुदकं वारि, तद्गुणं 'भयदम्—

अर्थे सामान्यैर्वैरिणा संसर्गो न कर्त्तव्यः ॥९०॥
आर्य्यार्थिमिव नीचस्य सम्बन्धः ॥९१॥

गुपद्रः। यदुक्तं महाकविना 'विषमप्यमृतं क्वचिद्भवे'दिति तदीश्वरेच्छयैव लौकिके व्यापारे। स्वरूपेण तु विषं मारक मेवान्यच। 'क्ष्वेडस्तु गरलं विष'मित्यमरः। 'कामोऽमृतौ महाकाले समये यमकृष्णयो'रिति। विषम्। विष्लृ व्याप्तौ, विषप्रयोगे वा, वेवेष्टि कायम्। ततः 'इगुपध' इत्यादिना कः। कालः। कल संख्याने शब्दे च, कल्यते। ततो घञ्। यद्वा कामयति सर्वमिति एतस्मात् 'पचाद्यच्' ॥ ८९ ॥

आर्थिककार्य्यविषये शत्रुसम्बन्धनिषेधमाह अर्थेति। अर्थसामान्यैर्धनसम्पादितकार्य्यैः। वैरिणा शत्रुणा सार्द्धं संसर्गः सम्मेलनं न कार्य्यम्। शत्रुणा सहार्थविनिमये कार्य्यगतार्थसम्बन्धे सामर्थ्यमध्यातमा [illegible] इत्यर्थः। 'अर्थसमादाने वैरिणो सङ्गं एव न कर्त्तव्य' इत्थं पाठान्तरमस्ति। तस्यार्थः सुगम इति। [illegible] इत्यमरः। वैरं वीरस्य भावः कर्म्म वा। [illegible] इति निर्देशात् घञ्। [illegible] 'न इति' [illegible]। अत्र हिकर्द्दंसेशनम्। ततो [illegible] न [illegible] ॥९०॥

[illegible] आर्द्र [illegible] पुत्रस्य। [illegible]

आत्मच्छिद्रं न प्रकाशयेत्॥ ८६॥

शत्रुं छिद्रे परिहरेत्॥ ८७॥

स्वस्य छिद्रप्रकाशेऽनिष्टभयात्तन्निषेधमाह आत्मेति। आत्मनो निजस्य छिद्रं दोषं परानुसन्धानपथं न प्रकाशयेत्। शत्रुषु त्वनिष्टकरणावकाशं नैव दद्यात्। तदुक्तं नीतिनिपुणैः 'नात्मच्छिद्रं परे दद्यात् परच्छिद्रं प्रकाशयेत्। गूहेत् कूर्म इवाङ्गानि' इति। मानवधर्मशास्त्रे सप्तमाध्याये कौटिलीयार्थशास्त्रे च परिवर्त्तितपाठः श्लोकोऽयं दृश्यते। तद्यथा—

'नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च।
गूहेत् कूर्म इवाङ्गानि यत्स्याद्विवृतमात्मनः'॥

'छिद्रं विवर-रन्ध्र-दोष-श्वभ्र-सुषिरा' इति। अन्यत् स्पष्टव्याख्यानम्॥ ८६॥

पुनर्योग्यकाले सम्प्राप्ते शत्रुत्यागमाह शत्रुमिति। शत्रुं अरातिं वैरिणमिति। तदीये छिद्रे दोषेऽनिष्टपदे विषये विवृतेति यावत्, प्राप्ते इति शेषः। परिहरेत्—त्यजेदित्यर्थः। 'प्रहरेदिति' पाठे तु व्यसने सम्प्राप्ते तं रिपुं प्रहरेत् विध्वंसं कुर्यात्। तथाचोक्तम् 'तमेव काले सम्प्राप्ते भिन्द्यात् घटमिवाश्मनि' इति। शद् शातने, शातयतीति शत्रुः। 'रुशातिभ्या'मित्यौणादिकात् क्रुन्॥ ८७॥

छिद्र-प्रहारिणो हि शत्रवः ॥ ८८ ॥

स्वहस्तगतमपि शत्रुं न विश्वसेत् ॥८९॥

शत्रूणामनिष्टसाधनकौशलमाह छिद्रेति। छिद्रेषु परानुसन्धेयदोषपथेषु। प्रहारिणः प्रहारशीलाः शत्रवो भवन्ति। ते च साक्षाद्वैरितासाधने बाधामश्रवादक्षमा भवन्ति। छिद्रे प्रहर्तुं शीलमेषामिति प्रहारिणः। यस्य तु शत्रवः सन्ति स सर्वदा जागरूकः स्यात्। केचित्तु छिद्रप्रहारिणः छिद्रान्वेषिण इत्येवमर्थं प्रोचुः। 'छिद्रं विवररन्ध्रवत्। गर्त्ते दोषे' इति हैमः। प्रागुक्तं पदनिरुक्त्यादि॥ ८८ ॥

हस्तागतशत्रौ तत्स्वभावक्रौर्य्याद्विश्वासाभावमाह। स्वेति। स्वस्यात्मनो हस्तागतं करायत्तमपि शत्रुमरातिम्। न विश्वसेत् नैव तस्मिन् विश्वासं कुर्यात्। निश्चित-प्रत्ययोविश्वासः। स्व इत्यधिकपाठ इति केचिदाहुः, हस्तस्य नियतं स्वदेहसम्बन्धात्। तदुक्तं पूर्वविद्भिः—

'न विश्वसेदविश्वस्ते विश्वस्ते नाति विश्वसेदिति'।

'हस्तः करे करिकरे सप्रकोष्ठ करेऽपि च। ऋक्षे केशात्परो व्राते' इति मेदिनी। हस्तः। हसे हसने, हसति। 'हसिमृग्रिण्' इत्यौणादिकास्तन्॥ ८९॥

स्वजनस्य दुर्वृत्तं निवारयेत् ॥ १०० ॥

स्वजनावमानो हि मनस्विनां दुःखमावहति ॥ १०१ ॥

आत्मीयानां दुर्वृत्ततावारणं मयशोजनमाह स्वेति। स्वस्य जनानां परिवाराणाम्। दुर्वृत्तता दुर्दान्तता गर्हिताचरणमिति। दुर्वृत्तमिति भावप्रधाननिर्देशः। दौर्वृत्यमिति। दुष्टं वृत्तमाचरणमस्येति वा। यदि स्वजना दुराचाराः स्युस्तदा स्वस्यापि हानिः स्यात्तस्मात्तेषामसदाचरणं निवार्यम्। पुत्रभृत्यप्रजानाम् अपराधेष तस्य निवृत्तिर्विधेया। तं निवारयेत् तस्य निवृत्तिं कुर्यात्। स्वजनस्य यो दुर्वृत्तः दुष्प्रवृत्तोऽनिष्टकारी, तं तत प्रतिरुन्ध्यात्। 'दुष्टो दुर्विनीतो दुर्दान्तो दुराचारश्च दुर्मद' इति। 'वृत्तं वृत्तौ वृत्ते चरित्रे। चरिते वर्तनेऽप्युक्तम्' इति हैम.। वृत्तम् वर्तते, तत् वर्तनं च स्वजनयो न स्यात्। १००।

आत्मीयजनानाम् अपमाननिवारणे हेतुं दर्शयन् प्रकारान्तरेणाह स्वेति। स्वस्य जनानाम् स्वजनानाम् अवमाननं तिरस्कारः हीनभावो यावत्। तेन च मनस्विना मतिमता दुःखावहतामिति। दुःखं मनस्तापम् आवहति आनयति। स्वजनानां तिरस्कारोऽपमान इति। अवधूतोऽवमतोऽपि। मनस्वी। प्रशस्तं मनोऽस्येति। आवहतीति, आङ्पूर्वात् वहेर्लट् निष्। १०१।

एकाङ्गदोषः पुरुषमवसादयति ॥ १०२ ॥

शत्रुं जयति सुवृत्तः ॥ १०३ ॥

गुणिष्वपि एकेन दोषेण पुरुषोऽवसन्नो भवत्यतस्तदाह एकेति। एकस्मिन् अङ्गे दोषः क्षतचिह्नाङ्गवैकल्यादिरूपः। स च पुरुषं मानवम्। अवसादयति गौरवहीनं करोति अवनमति च। अतो दोषमात्रं त्याज्यम्। तदुक्तं कविभिः 'एको हि दोषो गुणसन्निपाते' इति। सर्वथा दोषाद् गुणः श्रेयान्। अङ्गम्। अगि गतौ, अङ्गति। अच्प्रत्ययेन सिद्धम्। दुष् वैकृत्ये, दुष्यति 'पचाद्यच्'। पुर अग्रगमने, पुरति। 'पुरः कुषन्' इत्यौणादिकाद्रूपम्। 'अन्येषामपि दीर्घत्वे' पूरुषोऽपि। अथवा पूरी आप्यायने, पूरयति। बाहुलकात् कुषन्। 'पूरि स्थूलशरीरे शेते इति पुरुष' इति तत्त्वकौमुद्यां मिश्राः॥ १०२ ॥

सद्गुणावलीयुक्तस्य पुंसः शत्रुजयसम्भावनामाह शत्रुमिति। शत्रुमरिमरातिम्। सुवृत्तः सुकृती सद्वृत्तिसम्पन्नः कुशल इति यावत्। सु शोभनं वृत्तं यस्येति। जयति अभिभवति, उत्कर्षेण वर्त्तते वा। यद्वा वृत्तं वृत्तिः सम्वीतिस्तद्युतः। 'वृत्तं वृत्तौ दृढे मृते। चरित्रे वर्त्तुले च्छन्दः' इति हैमः। प्रागुक्तमन्यत्।—

'निरुत्साहो निरानन्दो निर्वीर्यो निर्गुणः पुमान्।
किं जेतु शक्नुते तेन तस्यात्मा चाप्यरक्षितः'॥

निकृति-प्रीया नीचाः ॥ १०४ ॥
नीचस्य मतिर्न दातव्या ॥ १०५ ॥

'नीतिशास्त्रविहीनो यः प्रज्ञावानपि हन्यते ।
परैः शस्त्रविहीनस्तु वीरायैरपि वीर्यवान्' ।

इति गुरुभिरुक्तम् । अतुलो यस्य गुणसम्पद्राशिरधिका स शत्रुजेता स्यात् १०३ ॥

दुष्कार्य-प्रियत्वं नीचानामाह निकृतीति । नीचा हीनाः क्रूराः शठा इति यावत् । ते स्वभावतः शाठ्य कापट्य प्रतारण प्रिया भवन्ति । तेषां तानि गर्हिताचरणानि रुचिकराणि स्युः । निकृष्टा कृतिः क्रिया परप्रतारणादिरूपा । यद्वा पराभीष्टस्य निकर्त्तनं निकृतिः । यथा मा स्वान उच्छिष्ट प्रियाः । तत्करा अन्धकारप्रियास्तथा परद्रोहनिकराः शठाश्चेति । 'निकृतिर्भर्त्सने क्षेपे शठे शाठ्येऽपि च स्त्रियाम्' इति विश्वः । कृती छेदने, कृन्तति । 'इक् कृष्यादिभ्यः' इतीक् । नीच इति निकृष्टामीं लक्ष्मीं चिनोति, चिञ् धातोः 'अन्येभ्योऽपि दृश्यते' इति वार्त्तिकाड्डः । १०४ ॥

हीनमानवस्य ज्ञानोपदेशे निषेधमाह नीचस्येति । नीचस्येति नीचाय हीनाय शठाय इति यावत् । सूत्रे छन्दोवद्वि-यमाच्चतुर्थ्यर्थे षष्ठी । अथवा दानविषेधाच्चतुर्थ्यभावः । यतो 'विवक्षातोहि कारकाणि भवन्ती'ति । 'मा प्रयच्छेश्वरे धन'-

नीचेषु विश्वासो न कर्त्तव्यः ॥ १०६ ॥

मितिवत्। मतिर्ज्ञानं सद्‌बुद्धिश्च। न देया नार्पणीया। अपात्रे दाने फलवैपरीत्यमनिष्टं भवतीति। गोत्तुराश्वनोपदेशवत्। मूर्खस्य नीचस्य बुद्धिर्विपयगामिनी। उक्तञ्च प्रजागरपर्वणि—

"अकामान् कामयति यः कामयानान् परित्यजेत।
बलवन्तञ्च यो द्वेष्टि तमाहुर्मूढ़चेतसम्" ॥

तत्रैवान्यच्च—

"अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च।
कर्म्म चारभते दुष्टं तमाहुर्मूढ़चेतसम्" ॥

'धीः प्रज्ञा शेमुषी मतिः' इत्यमरः। मनः ज्ञाने, मनने, मन्यतेऽनया वा ततः क्तिन् ॥ १०५ ॥

हीनेषु विश्वासाकरणमाह नीचेष्विति। नीचेषु क्रूर-शठ-वञ्चकेषु। विश्वासो निश्चित प्रत्ययः दृढ़ावधारणम्। न कर्त्तव्यः न विधेयः। तेषु विश्वासान्महानिष्टं स्यात्। परन्तु यदि शिक्षिताः परीक्षिता स्युस्तदा कार्य्यविशेषे नीचा अपि विश्वासार्हा इति। तदुक्तं भागुरिणा—

"शठोः सकाशतः प्राप्तं सेवार्थं शिष्टसम्मतम्।
परीक्षा तस्य कर्त्तव्या प्रसादः क्रियते ततः" ॥

'निकृतिः पामरो नीचः शठो हीनस्तथैव च' इति वैजयन्ती। नीचसम्पर्केनानाविधतो विपदापतति। तथा च 'खलः

सु-पूजितोऽपि बाधते दुर्जनः ॥ १०७ ॥
शिरसि प्रस्थाप्यमानो वह्निर्दहत्येव ॥१०८॥

करोति दुर्द्धर्षं नूनं फलति माधुर्यं इति। श्वस प्राणने, विश्वसनम्। ततो घञ् ॥ १०६ ॥

दुर्जनस्य स्वभावमाह त्रिति। दुर्जनः दुर्दान्तः क्रूर इति। स च सुपूजितः सम्यक्सम्मानितः मानदानैराप्यायितः। अपिः सम्भावनार्थे। बाधते अनिष्टमाचरति। उप कर्त्तारं पीडयति वा। तदुक्तं वृद्धैः 'दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन्' इति। दुर्जनः स्वभावस्य दुरतिक्रमणीयत्वेनाहिवद्दुग्धं पीत्वा गरलं वमतीति। 'पिशुनो दुर्जनः खलः' इत्यमरः। दुष्टोजनो दुर्जनः 'कुगति' इत्यादिना समासः ॥ १०७ ॥

पिशुनेषु सम्मानादिर्भूयस्त्वेऽपि अनिष्टाचरणमाह शिरसीति। यथा शिरसि मूर्द्धनि मस्तक इति। प्रस्थाप्यमानो धार्य्यमाणोऽपि वह्निरग्निरनलः। धर्त्तारमपि निश्चितं दहति। 'यतः 'अपि निर्वाणमायाति नानलो याति शीततां'मिति। तथा दुर्जनोऽपि सत्कृत उपकृतः सन् तदुपकर्त्तारं सम्यक्पीडयतीति पूर्व्वसूत्रानुषङ्गः। तदुदाहरणमुपन्यायमानं सूत्रमिदम्। 'अग्निर्वैश्वानरो वह्निः' इत्यमरः। वह्निः। वह प्रापणे, वहति हव्यम्। 'वह्निश्रिस्रुयु' इत्यादिना निर्निः। दह भस्मीकरणे दहति। ततो लट्तिप् ॥ १०८ ॥

कश्चिदपि पुरुषं नावमन्येत ॥ १०८ ॥
क्षमन्त इति पुरुषान् न बाधयेत् ॥११०॥

पुरुषावमानना प्रतिषेधमाह कमिति। कश्चित् पुरुषं मानवं वृथा हेलया, क्रोधेन वा। नावमन्येत तस्यावमाननमपमानं न कुर्य्यान्नविदध्यात्। कृतेऽवमानने सोऽप्येवं प्राप्ते छिद्रे समयेऽपकारं कर्तुमिच्छेत्। तदुक्तं नीतिज्ञैः 'वृथा विवाद वादश्च परीवादश्च वर्जयेत्'। सौशील्येन सर्वं वशीभूतं कुर्य्यात्। 'कदाचिदपि' इति ग्रन्थान्तरस्थः पाठः। तदालेनार्थभेदः। 'किमो विभक्त्यन्ताच्चिच्चना'विति कालापाः। किमो द्वितीयान्तादनिश्चितार्थे चिदिति ॥ १०८ ॥

कार्य्येषु क्षमाया औचित्यमाह क्षमन्त इति। परकृतानिष्टं सहन्तो इतिशब्दोऽवधारणे। न तु आक्रोशादनिष्टकारिणो मानवान्। बाधयेत् पीड़येद् व्यथयेच्च। परेणापकृते तस्यापकाराकरणं क्षमा। 'क्षमारूपं तपस्विनः' इति लघु चाणक्ये। 'क्षमा सर्वस्य भूषणम्' इति च वृद्धाः। वल्लभदेवोऽप्याह—

'क्षमया आर्जवेनैव दयया च मणीषया।
कौशलेन च लोकानां वशीकरणमुत्तमम्' ॥

यतो न वृथा परोपतापी भवेत्। 'क्षन्तव्यमिति पुरुषं न बाधेत' इत्येवं पाठान्तरत्वेनार्थभिन्नत्वमिति। 'क्षमा तितिक्षा पृथ्वी च योग्ये शक्ते हिते क्षमम्' इति धरणिः। क्षमूष् सहने,

चन्दनादपि जातो वह्निर्दहत्येव ॥ १११ ॥
भर्त्ताऽधिकं रहस्युक्तं वक्तुमिच्छन्त्यबुद्धयः ॥११२॥

चमते, चम्यते वा । 'पचादित्वादच्, घञ् वा । 'नोदात्तोपदेशस्ये'ति न वृद्धिः । यद्वा चमणं चमीति षित्वादङ् ॥ ११० ॥

चन्दनादपि जातो वह्निर्दाहकारित्वमाह चन्दनादिति । चन्दनाख्यनगजादपि सुशीतलाच्चात उत्पन्नो वह्निरनलो दहत्येव सन्तापयत्येव । वस्तु स्वाभाव्यात् । नाप्याकरगुणा अत्र तस्येन लभ्यन्ते । उपादानोपादेयत्वाभावात् । अथ मलयजेनानलस्य संयोगसम्बन्धः । न तु मृद्घटवदुपादेयोपादान भावः । एवमुपकृतः शठोऽपकारमाचरतीति पूर्वेण सम्बन्धः । यद्वा यस्माद्यदुत्पद्यते तस्य गुणस्तद्वत् यथा क्षीरगुणं दधि । 'गन्धसारो मलयजो भद्रश्रीश्चन्दन' इत्यमरः । चदि आह्लादे, चन्दयति । रम्याद्युट् । प्राङ्निरुक्तो वह्निरिति ॥ १११ ॥

स्वामिनो गुह्यविषय-प्रकाशे भृत्यादेः विनाशमाह भर्त्तेति । भर्त्ता स्वामिना नृपेण प्रभुणा वा । अधिकमतिशयं सुगुप्तं वक्तुं यद्रहसि निर्जने एकान्ते इति । उक्तं कथितमुपदिष्टम् । हन्तास्तम् अबुद्धयो मूढा विवेकहीनाः । वक्तुं कथयितुमिच्छन्ति । स्वीय बुद्धिमान्द्यादतिगोपनीयमपि विषयं प्रकाशयन्ति, तेनोभयोरप्यनिष्टं स्यादिति । 'भर्त्ताऽहितं रहस्युक्तं वक्तुमिच्छन्त्यबुद्धयः' इत्येवं पाठान्तरमप्यस्ति । तस्यायमर्थः—रहस्युक्तं विषयम्

अनुरागस्तु फलेन सूच्यते ॥ ११३ ॥
आज्ञाफलमैश्वर्य्यम् ॥ ११४ ॥

अबुधोऽज्ञः भेरी दुन्दुभीताड़ितमाघातजन्यं शब्दमिव सर्वत्र बहु मिच्छति बुद्धिहीनात्। भेरीताडित-शब्दः सकलश्रवणयोग्यो भवतीति भेय्युपादानम्। भर्त्तेति। डुभृञ् धारणपोषणयोः, विभर्त्ति लोकान् कर्त्तरि तृचा सिद्धः। 'रहस्या स्त्री नदीभेदे गोपनीयेऽभिधेयवत्' इति मेदिनी। रहसि। रह त्यागे, रह्यते। औणादिकादसुन्। यद्वा रमन्तेऽत्र 'देशेऽचं इत्यसुन्, हीऽन्तादेशश्च ॥ ११ ॥

विषयानुरागस्य तत्फलद्वारा सूचनमाह अन्विति। अनुरागो विषयेषु आसक्तिर्विषयबोधनस्पृहा। स चानुरागः यस्मिन् विषये यदा भवति तज्जनितफलेन सूच्यते अभिव्यज्यते। अन्ये तु तत्फलं विनानुरक्तिः कीदृशी तज्ज्ञातुं नैव शक्यतेऽतः फलसापेक्ष एवानुराग इति। 'हितेन सूच्यते' इत्येवं पाठे तदा, हितेन हितकरणेन तदनुष्ठानेन वा सूच्यते नतु मौखिककथनेनेति। 'अनुरक्तो गुणान् ब्रूते विरक्तो दूषणानि चे'ति वृद्धाः। 'अनुरक्त्यनुरञ्जनासक्ति राग प्रातय' इति। रञ्ज रागे, रञ्जनं रज्यते वा। ततो घञ् ॥ ११३ ॥

स्वामिन आदेशस्य फलमाह आज्ञेति। आज्ञायाः निर्देशस्यानुमतेः। फलं परिणामः। ऐश्वर्य्यं विभूतिः सम्पदिति।

दातव्यमिति बालिशः परिक्लेशेन दास्यति ॥ ११५ ॥

यद्वा ऐश्वर्यमिवैश्वर्यम्। यथा विभूतिलाभेन लोकाः परमसुखिनो भवन्ति तद्वत् स्वामिन आज्ञानुवर्त्तिनस्तादृशं फलं स्यादाज्ञापालनेन भाविसुखं पुष्कलमिति भावः। 'अज्ञाऽफलमैश्वर्य'मिति पाठे तु अज्ञस्याफलं ऐश्वर्यम् निर्दयं भवति। तदयं न स्यादिति। अथवा आज्ञा शास्त्रादेशः। शिष्टनिर्देशो वा। तदनुसारेण यः कर्म विदधाति तस्य कर्मफलमैश्वर्यं भवति। नान्यथाऽविधिनानुष्ठानेन। "आज्ञाफलमैश्वर्यम्" इति सोमदेवसूरिणाप्युक्तम्। यदाज्ञावहा लोकास्तदैश्वर्यस्य फलं स्यात्। यदादेशं लोका न मन्यन्ते तस्यैश्वर्यं निष्फलमेवेति च तस्मादन्यत्र सूत्रे उक्तं "राजाज्ञा हि सर्वेषामलङ्घ्यः प्राकारः" इति। आज्ञा। ज्ञा अवबोधने, आङ्पूर्वाज्जानातेः 'आतश्चोपसर्गात्' इत्यङ्। भिदम्। ईश्वरस्य राज्ञो भाव ऐश्वर्यम् 'गुणवचन' इत्यादिना ष्यञ्॥ ११४॥

मूढजनस्य दाने समधिकक्लेशमाह दातव्यमिति। बालिशोऽज्ञो मूढधीरिति। दातव्यमिदं कस्मै देयमिति मनसि कृत्वोक्ता च परं मौर्ख्यात् समधिककष्टेन मार्गाधिकचित्तेन च। पश्चात् स्वार्थबुद्ध्या वा दास्यति। न तु सामर्थ्येनावश्यकर्त्तव्यज्ञानेन। अत्र स्वादिधिकर्षोनत्वेन तादृगाचरणम्। 'बालिशस्तु शिशौ मूर्खे

मह्दप्यैश्वर्य्यमवाप्याधृतिमान् विनश्यति ॥११६॥

इति चाणक्यसूत्रे नीतिदर्शनात्मके द्वितीयोऽध्यायः॥२।

इति मेदिनी। वालिशः। वाड़ आप्लाव्ये, वाडनम्, डलयोरेकत्वम्। तत इन्। शो तनुकरणे, वालिं श्यति। 'आतोऽनुसर्गा'दिति कः। परिपूर्णात् 'क्लिश बाधने' ततो घञ्ञा सिद्धः॥ ११५॥

लब्धैश्वर्यस्याधैर्य्यादिनाशमाह महदिति। महत् श्रेष्ठमतुलं विपुलधनं वा। अवाप्य सम्प्राप्य। अधृतिमान् धैर्य्यस्थैर्य्यविहीनः। अपिना तद्रक्षणशक्तिरहितश्च विनश्यति। विनाशमायास्यति। धैर्य्य-वैदुष्य-संयमवतः पुंसः सम्पत् पश्चात् पुरुषान्तरेऽपि न नाशमुपयास्यति रक्षणदार्ढ्यादिति। 'विशालं विपुलं महत्' इत्यमरः। 'धृतिर्योगान्तरे धैर्य्ये धारणाध्वरतुष्टिषु' इति विश्वः। मह पूजायां, महति। 'वर्त्तमाने पृषद्बृहन्महत्' इत्यायौणादिकान्निपातः। धृञ् धारणे, धरणं धृतिः, ततः क्तिन्। तद् विद्यतेऽस्येति मतुप्। पद्यामजः सम्बन्धः। 'न कर्मधारया'दित्यादिन्यायस्य प्रायिकत्वा 'दधृतिमा'निति प्रयोगः साधुः। अत्र धृतिरित्युपलक्षणं, चरित-सुशिक्षा-दाक्षिण्यवैदुष्याणि ज्ञेयानि। अन्यद् व्याख्यातपूर्वम्॥ ११६॥

इति दर्शनभूतचाणक्यसूत्रव्याख्याया श्रीईश्वरचन्द्रशर्मशास्त्रिकृतायां सारार्थबोधिन्यां द्वितीयोऽध्यायः।

—०*०—

तृतीयोऽध्यायः ।

—•◆•—

धृत्या जयति रोगान् ॥ १ ॥

नास्त्यधृते रैहिकामुष्मिकम् ॥ २ ॥

द्वितीयेऽध्याये नयधीप्यात्मिक विषयोक्तानन्तरं [illegible]- प्रत्य कार्यफलमुक्ता तृतीयाध्यायारम्भे धृतिकरणमादिदेशकं, धृति जयकरणस्य फलमाह धृत्येति । धृत्या च [illegible] रोगान् व्याधीन् मानसानिति । जयति तान् पराभूतान् करोति । 'धृतिर्योगान्तरे धैर्ये धारणाध्यवृत्तिषु' इति विश्वः । [illegible] च "यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन ।

प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी" ॥ इति ।

'द्वितीयमधिकरणं धारयतीति धीतरं' [illegible] । [illegible] [illegible] द्वे विषये च [illegible] [illegible] [illegible] इति [illegible] । धृति [illegible] [illegible] तु [illegible] [illegible] [illegible] । धृति [illegible] तु [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] तत किम् ॥ १ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] ।

गुणवानपि क्षुद्रपक्षस्त्यज्यते ॥ ३ ॥

धैर्य्याभावात् कर्म्मासामर्थ्यं तेन तत्फलालाभः। ततः धर्म्म कर्म्मसु वैषयिककर्म्मसु च धैर्य्यं परं प्रयोजनम्। श्रीमद्भर्त्तृहरि णोक्तम्

'धैर्य्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी'ति। मनुना च 'धृतिः क्षमा दमोऽस्तेय'मित्यादिधर्म्मलक्षणे धैर्यम प्युक्तम्। तत्रैव—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।

एतत् सामासिकं धर्म्मं चातुर्वर्ण्येऽब्रवीन्मनुः" ॥

एतस्मानवसाधारणस्य धर्म्मलक्षणम्। परलोकप्रसङ्गात्तदत्रोच्यते इह भवम् ऐहिकम्। अमुष्मिन् भवम् आमुष्मिकम् ॥ २ ॥

गुणवतां क्षुद्रपक्षत्यागमाह गुणीति। गुणवान् शिक्षा शिष्टता-सौजन्ययुक्तः पुमान्। अपि निश्चितम्। क्षुद्रस्य नीचस्य दुष्टस्येति। पक्षयोर्द्वयोर्मध्ये एकतरः तदाश्रयः त्यज्यते परि ह्रियते। यतः क्षुद्र पक्षस्याश्रये महत्त्व-हानिरवश्यम्भवति। अयमेव तत्पक्षत्यागे हेतुः। तदुक्तं महाभारते—

"असतां सङ्गदोषेण सन्तो यान्ति च विक्रियाम्।

दुर्य्योधनप्रसङ्गेन भीष्मो गोहरणे रतः" ॥ इत्युक्तं प्राक्।

यथा वा क्षीरं स्वभाव-मधुरम् अम्लयोगाद्दधीभवति। अथवा क्षुद्रस्य जीवस्य पक्षः अन्यायभयात्राश्रयणीयः। गुणो विद्यते यस्येति मतुप्। 'क्षुद्रः स्यादधमक्रूर-कृपणाल्पेषु वाच्यवत्'

न दुर्जनैः सह संसर्गः कर्त्तव्यः ॥ ४ ॥
शौण्ड-हस्तगं पयोऽप्यवमन्येत ॥ ५ ॥

इति विग्रहः । क्षुदिर संचूर्णने, क्षुणत्ति, क्षुन्ते सा । 'स्फायि-तञ्चि' इत्यादिना रक् ।

'पक्षी मासार्द्धके गेहे पार्श्वमात्थ विशेषयोः' ।

इति मेदिनी ॥ ३ ॥

दुर्जनानां संसर्ग-निषेधमाह नेति । दुष्टा हीना नीचाः क्रूरा इति यावत् । तैः सह सार्द्धम् । संसर्गो मिलनं सम्बन्धो नैव कर्त्तव्यः । तदुक्तं सूरिभिः—

'दुर्जनेन समं सख्यं प्रीतिञ्चापि न कारयेत्' इति ।

एवमेवोक्तं भारते विदुरनीतौ—

'अधमान्न सेवेत य इच्छेद्भूतिमात्मनः' ।

अधमान् नीचान् क्रूरान् । भूतिं समुन्नतिम् । अधमलक्षणन्तु तत्रैवोक्तं—

'न श्रद्दधाति कल्याणं परेभ्योऽप्यात्मशङ्कितः ।
निराकरोति मित्राणि यो वै सोऽधमपुरुषः' ॥

परेभ्यः गुरुभ्यः । आत्मनि शङ्कितः विश्वासहीन इत्यर्थः ।

'पिशुनो दुर्जनः खलः' इत्यमरः । दुष्टोजनः । 'कुगति' इत्यादिना समासः ॥ ४ ॥

अधमस्य हीनसंयोगाद्धीनत्वमाह शौण्डेति । शौण्डः मत्त

मित-भोजनं स्वास्थ्यम् ॥ ७ ॥
भक्ष्यमप्यपथ्यं नाश्नीयात् ॥ ८ ॥

स्वास्थ्यरक्षोपायमाह मितेति। मितं परिमितम्। यस्य यादृक् क्षुन्निवृत्तिस्तदनुकूलभोजनमशनमाहार इति। तस्य तादृशं भोजनं स्वास्थ्यजनकम्। देहसुस्थत्वसम्वर्द्धकम्। स्वस्मिन् स्वभावे तिष्ठतीति स्वस्थः। तद्भावः स्वास्थ्यम्। स्वभावतो नैरुज्यम्। शरीरपोषकञ्चेति। तदुक्तं पूर्वाचार्य्यैः 'जीर्णे भोजनमात्रेयः'। चात्रेयर्षिरायुर्वेदस्य पूर्वाचार्य्यः। भुक्तद्रव्ये जीर्णे सति पुनर्भोजनं विधेयमित्यत्राह। 'अजीर्णे भोजनं विषम्'। अजीर्णेऽपरिपाके भुक्तद्रव्यस्य, पुनर्भोजनं विषवद् व्याधि द्वारा प्राणहारकम्। ततो मितं हितं मेध्यञ्च भोजनमुचितम्। धर्म्मशास्त्रे गीतायाञ्चाहारस्य सात्त्विक राजसिक तामसिकभेदेन त्रैविध्यमुक्तम्। तत्र मामान्येन सामिष निरामिषभेदेन द्विविधम्। *तयोर्निरामिषभोजनं प्रशस्तमायुष्करं गदहारकञ्च।* सामिषभक्षणं क्षिप्रं बलवर्द्धकम्। परं भक्ष्यद्रव्यस्य जीवदेहत्वेन तद्देहे रोगसम्भवात्तत्रापि रोगसम्भावना। 'मितभोजनः स्वादस्थ्य' इत्येवं सूत्रपाठे मिताहारी मितं भोजनं यस्य सः। स यदि कस्यश्चिदप्रकृतिस्थो रोगी स्यात्तदा मितभोजनः स्वादित्यर्थः। वायुपित्तश्लेष्मणां साम्ये स्वस्थोऽसाम्ये रोगीति। यथेच्छाहारान्द्रियभोगलोलुपो रोगी भवेदिति। ७ ॥

भक्ष्यद्रव्यस्याहितजनकत्वे तस्याशनायोग्यतामाह भक्ष्यमिति।

अजीर्णे भोजनं विषम् ॥ १० ॥

ऽस्मात्। व्याधानं व्याधिः। वि, आङ्पूर्वाद् दधातेरुपसर्गे 'घोः किः'। एवंविधमशनं परिहरेत्। तद्यथा 'बहुस्तोकमकाले वा ज्ञेयमतद्विषमाशनम्'। अकाले भोजनमत्यशेत्। तथा च—

"अप्राप्तकाले भुञ्जानोऽप्यसमर्थतनुर्नरः।
तां स्तान् व्याधीनवाप्नोति मरणञ्चाधिगच्छति"॥

अप्राप्तकालः कालादतिप्राक्। भुञ्जानोऽसमर्थ शरीरो भवति। तथा सति तां स्तान् व्याधीन् शिरोव्यथादीन् प्राप्नोति। तेषामाधिक्ये मरणमपि प्राप्नोतीति॥८॥

भुक्तापाके भोजननिषेधमाह अजीर्णेति। अजीर्णे भुक्तद्रव्यस्यापरिपाके सति यत् पुनर्भोजनन्तद्विषं विषमिव विषं गरलं स्यात्। तद् रोगद्वारा प्राणहारकं भवति। एतच्च लघुचाणक्ये उक्तम्—

"दूरधाता विषं विद्या अजीर्णे भोजनं विषम्।
विषं गोष्ठी दरिद्रस्य वृद्धस्य तरुणी विषम्"॥

एवं पानीयमलिनेऽपि 'अजीर्णेऽभोजनं वारि जीर्णे वारि बलप्रदम्'। अभोजनमपेयमित्यर्थः। कचिदादर्शे सूत्रान्ते विषमित्यत्र दुःखमिति पाठे तद् दुःखजनकमित्यर्थः। काले च तद् भोजनं नाकाले। तथा च

"सुप्तस्यजति पक्षेषु स्मृतोपसर्गेषु च।
काले वा यदि वाऽकाले सोऽन्नकाल उदाहृतः"।

ल्पादीनां भावं प्राहुराह—

"उद्गारशुद्धिरुत्साहो वेगोत्सर्गौ यथोचितः ।

लघुता क्षुत्पिपासा च यदा कालः स भोजने" ॥

जीर्णे अन्ने पुनर्भोजनस्य फलमाह—

"आहारः प्रीणनः सद्यो बलकृद्देहधारणः ।

स्मृत्यायुः शक्तिवर्णौजः सत्त्वशोभाविवर्द्धनः ।

यथोक्त गुणसम्पन्नमुपसेवेत भोजनम्" ॥ इति वैद्यके ।

'क्ष्वेड़स्तु गरलं विषम्' इत्यमरः । वेवेष्टि कायम् । विष्

...ी, विष प्रयोगे वा । 'इगुपध' इत्यादिना कः ॥ १० ॥

शरीरे सुप्रसृतस्य व्याधेरुपेक्षाकरणे निषेधमाह शरीर इति ।

...रे देहे तनौ चेति । वर्द्धमानो वृद्धिं प्राप्तः । उत्कटव्याधि·

...त । व्याधिर्धातु-वैषम्यजनितावस्था । नोपेक्षेत । नाल-

...हेलाहेलया वा तुच्छीक्रियेत । व्याधेः शरीरहानिकरत्वं

...के उक्तम्—

"धर्मार्थकाममोक्षाणामारोग्यमुत्तमं बलम् ।

रोगा स्तस्यापहर्त्तारः श्रेयसो जीवितस्य च" ॥

शीर्य्यते रोगादिना इति शरीरम् । शतो योगेनौषधादिना

...याधेरुपशमः कर्त्तव्यः । यतो 'व्याधितस्यौषधं पथ्यं' नीरुजस्य

...ौषधैः इति रुग्णार्थमौषधमुक्तम् । 'रोगव्याधिगदामयाः'

...मरः । व्याधेरुपशमोपायः सम्यगुक्तो वैद्यके । 'जीर्णशरीरे

शत्रोरपि विशिष्यते व्याधिः ॥ १२ ॥

दानं निधानमनुगामि ॥ १३ ॥

वर्द्धमानं व्याधिम्' इति पाठान्तरत्वे जीर्णे वार्द्धक्ये पतनवे देहे इति। सर्वथा व्याधिः परिहार्यत्वे जीर्णं इति विशेषणं स्वरूप-ख्यापकम्, तदाऽस्यन्तपरिहार्यत्वम्। गृ हिंसायाम्, गृणाति, गीर्यते वा। 'कृ गृ पृ कटि' इत्यौणादिकादीरच्। वर्द्धमानः। वृधु वर्द्धने, वर्द्धते। 'वर्द्धच्छेदन पूरणयो'रिति धातुः। ११ ॥

व्याधेरत्यन्तरधिकत्वं सूचयन्नाह शत्रोरिति। शत्रो रिपो-रपि व्याधिः रोगो महत्‌ इति। विशिष्यतेऽधिको भवति। शत्रुभि-र्बहिःस्थितैर्विवादे धनादेरपहरणं देशादिपदच्युत क्रियते। व्याधिस्तु देहस्थो प्राण-देह-धनादेः संहारक इत्यस्य वैशिष्ट्यम्। 'गतरूपा हि योगिनः' इति तदीय राजनीतायुक्तम्। व्याधि-र्वाग्रादेः स्मादित पैतृकनिमित्तम्। 'न च व्याधिसमो रिपुः' इति लघुचाणक्ये च। हितोऽल्पभोजनं योग्यकाले पानं पानम्, इन्द्रियेषु धैर्यञ्च त्वास्थ्यहेतु। प्राह निदानः शत्रुरिति। व्याधानं व्याधिः। विविधा बाधयाऽस्माद् वा, व्याङ्पूर्वाद्धाते 'उपसर्गे घोः किः' इत्यनेन किः ॥ १२ ॥

धर्मवित्तार्थं कारणं व्याचष्टेति दानमिति। दानं वेदोक्त-मुत्यस्य देयता धर्मेषु रतो वा पात्रपात्रे सम्यक् स्थाने। सर्वथा सत्पदानंहितार्थमस्य निधानमनुगामि अनुयायि स्यात्। निधन-

पटुतरे तृष्णापरे सुलभमतिसन्धानम् ॥ १४ ॥

विभवानुसारेण भवतीति । यद्वा निधानं धनाधारः । तथा च 'निधानं भूगतं सद्यः सर्वं समधिगच्छति' इत्यागमः । भागवते च 'एतन्नानावताराणां निधानं बीजमव्ययम्' इति । दानं हितकरमपि वित्तानुसारेण कर्त्तव्यम् । नाधिकं न वा अल्पम् । 'दानं गजमदे त्यागे पालनच्छेदशुद्धिषु' इति विश्वः । अन्ये तु 'निधानं निधनं कुल'मित्याहुः । 'निधनं स्यात् कुले नाशे' इति मेदिनी । निधीयते इति नि-पूर्वाद्धधातोर्ल्युट् ॥ १२ ॥

यस्मिन् जने कार्यातिसन्धानस्य सौकर्यन्तदाह पटुतरे इति । पटुतरे नानाकार्यनिपुणतरे विदुषि, तृष्णापरे लोभपरायणे ऽर्थगृध्नौ जने कार्याणामतिसन्धानमनायासेन कार्यसाधनच्छिद्रं तत्सिद्ध्यर्थमन्वेषणं वा सुलभमक्लेशकरमिति । पटतरः विशेषपटुर्दक्षः । ईदृशं जनं कार्यसहायत्वेनानुसन्दध्यात् । सहायवान् नृपः प्रबलः सहायहीनो विपन्नः । तथा चाह गर्गदेवः—

'मदहीनो यथा नागो दंष्ट्राहीनो यथोरगः ।
असहायस्तथा राजा तत्कार्यो बहुमतः से' ॥

'पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्' इति मेदिनी । पट गतौ, पटति । 'फलिपाटि' इत्यादौणादिकाडुः । पटिरादेशः येति केचित् । ञि तृष पिपासायाम्, तर्षणम् । 'तृषि शुषिरसिभ्यः कित्' इति न पत्ययः' स्त्रियां टाप् । 'सन्धानमभिषवे

तृष्णया मतिश्छाद्यते ॥ १५ ॥
कार्य्यबहुत्वे बहुफलमायतिकं वा कुर्य्यात् ॥१६॥

ष्टा संग्रामयोरपि' इति विश्वः। सम्बोध्यते इति। क्षुधात्-र्त्ता: आर्षं करणं च स्यात् ॥ १४ ॥

विषयलोलुपस्य बुद्धिमान्द्यमाह तृष्णयेति। तृष्णया विषयाभिकाङ्क्षयाभिलाषाधिक्येन च मतिर्बुद्धिर्हिताहित विवेकज्ञानं वा। छाद्यते आव्रियते पिधीयते च। तदुक्तं पूर्वसूरिभिः—

'लोभेन बुद्धिश्चलति लोभो जनयते तृषाम्।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः' ॥

अपरञ्च 'का तृष्णा चेत् परित्यक्ता को दरिद्रः क ईश्वरः'। परमप्येतद् बोध्यं लोके सन्तोषा अभ्युन्नतानां पण्डितानाम् एतया सह नियत हितकारित्वं स्यु। 'तृष्णा स्पृहा पिपासे' इत्यमरः। 'पिपासागर्द्धाभिकाङ्क्षातृष्णाशाये'ति च। त्रिष्य पिपासायाम् धातुः। तृषिशुषिरसिभ्यः किन्' इत्यौणादिकाः। मनसाम् मन्युं जनयति मतिः। मन्यतेः क्तिन्। १५ ॥

कार्य्याणामनेकत्वे अधिकफलस्य कार्य्यस्य तेषां मध्ये प्राग-नुष्ठानमुचितमाह कार्य्येति। कार्य्यस्य कर्म्मणः। बहुत्वे प्राचुर्य्ये युगपत् समुपस्थितेषु कर्म्मसु मध्ये यस्य कर्म्मणः फलम् आयतिकमुत्तरकालिकं बहुफलं स्यात्तदेव कार्य्य-

स्वयमेवासन्नं कार्य्यं निरोचेत ॥ १७ ॥
मूर्खेषु साहसं नियतम् ॥ १८ ॥

मादौ कुर्य्यात्। पश्चाल्लघुफलानां कार्य्याणामारम्भ इति। अत्र वाकारेण चिप्रफलदं वा इति सूचितम्। तथा च बहुषु कर्मसु एकपदे उपस्थितेषु यस्य कर्मणः फलाधिक्यं कार्य्यारम्भात् पश्चात् शीघ्रमेव फलं स्यात्तदेवाग्रे कुर्य्यादिति सारः। 'आयतिस्तु स्त्रियां दैर्घ्ये प्रभावागामिकालयो'रिति मेदिनी। यमु उपरमे आयंस्यतेऽनेनेति क्तिन्। आयास्यति वा आङ्पूर्वाद् यातेर्बाहुलकाड्डतिः। 'उत्तरः काल आयति'रित्यमरोऽपि ॥ १६ ॥

आसन्नकार्य्यावलोकने स्वस्यैव प्रयोजनमाह स्वयमिति। स्वयमात्मना, एवकारोऽन्यव्यवच्छेदकः। आसन्नं समीपे उपस्थितं कार्य्यं कर्म इति। निरोचेतावलोकयेत्। यस्य तु कर्मणो गुरुत्वं फलाधिक्यञ्चास्ति तत् कर्म, स्वावलोकनं विना यद्यसम्पाद्यं विफलं वा स्यात् तत् स्वयमेव पश्येत्। अन्यपरिदर्शने हानिः स्यादिति भावः। 'स्वयमेवावक्रान्त'मिति पाठे तु पराक्रान्तं परेणानुष्ठितं कर्म नृपः स्वयमेव पश्येत्। न सचिवादिभिरिति। निपूर्वा'दाचदर्शनालोचनयो'रिति ईचतेर्विधिलिङ्। स्वयमिति। सु-सुष्ठु अयते। अय गतौ, इत्यतोऽम्। अद गतौ, आमीदति स्म, आमस्यते वा 'गत्यर्थे' इत्यादिना क्तः ॥ १७ ॥

मूढलोकेषु अविवेकात् साहसाधिक्यमाह मूर्खेष्विति। मूर्खेषु अविवेकिषु अज्ञेष्विति। साहसमबुद्धिपूर्वकं करणम्।

मूर्खेषु विवादो न कर्त्तव्यः ॥ १९ ॥
मूर्खेषु मूर्खवत् कथयेत् ॥ २० ॥

नियतं सदैव तिष्ठति । बलवतो मूर्खस्य सदोद्यमशीलस्य साहसं नित्यं विद्यते यतः यमस्तुल्यकठिनकार्ये तेषां नियोगो विधेयः । 'साहसमत्र दृष्टं दुष्करकर्मण्यपि अविमृश्यकारी धार्ष्ट्यं' इति हैमः । 'धार्ष्ट्यं जडमूर्खयोः' इति विश्वः । मुह वैचित्त्ये, मुह्यति । 'मुहेः क्तो मूर्ख, इत्यौणादिकात् सिद्धः । साहसम् । सहसि बले भवमिति 'तत्र भवः' इत्यण् । यम उपरमे, नियं-स्यतेऽनेनेति यमः ॥ १८ ॥

मूढैः सार्द्धं विवादकरणनिषेधमाह मूर्खेष्विति । मूर्खेषु हिताहितविवेकशून्येषु जनेषु । विवादो विरुद्धाचरणं वैरता विपक्षेषु वैमनस्यञ्चेति । न कर्त्तव्यो न विधेयः । तैः सह विवाद-करणे महानिष्टपातागमो भवतीति भावः । ते च सदैव सदुक्तिः सुभा-षितं हितोक्तिश्च सर्वं प्रतिकूलं प्रायो मन्यन्ते भाषितास्ते विवाद-कथा । प्रागुक्तमन्यत् ॥ १९ ॥

यस्य यत् प्रियं भवेत्तं प्रति तादृगाचरणं कुर्यात् । तदेव-मत्र मूर्खेषु बालिशेषु अज्ञेष्विति यावत् । ते च यथावबुध्यन्ते यथावर्तन्ते यथेच्छन्ति तथैव तेषु कथयेत् वदेदिति । अथवा मूर्खा अज्ञत्वात् सूक्ष्मतत्त्वं हितञ्च न प्रतिपद्यन्ते । ततस्तेषु मार्दवेन कौशलेन च विषयकथनं युक्तम् । न तु सूक्ष्मरीत्या । उपदेशे तु तथैव पात्रयोग्यताविचारः । 'अहो मूढ यथाज्ञात-

आयसैरायसम्छेद्यः ॥ २१ ॥

नास्त्यधीमतः सखा ॥ २२ ॥

मूर्ख वैधेय बालिशाः' इत्यमरः। मुह वैचित्त्ये, मुह्यति। 'मुहेः खोमूर्च' इत्यौणादिकात् सिद्धम्। प्रागुक्तमन्यत् ॥२०॥

कठिनकार्य्यसाधने सुदृढविषयमेवाश्रयेत् तदेवाह आयसैरिति। आयसैर्लौहैरयस्कान्तादिनिर्म्मितक्रकचैश्च लौहश्छेद्यो द्विधाकरणीयः। न तु काष्ठादिना लौहश्छेदनीयः। तत्र तद्योग्यताविरहात्। 'आयासैरायसं छेद्यम्'। इति पाठे तु आयासैरधिकश्रमैरायसं च्छेदनीयम्। यथा 'कण्टकेन तु कण्टकम्' इति। न तत्र हेलया श्रमेण विना वा, स्वाभाविककाठिन्याल्लौहश्छेदनीयः। सूक्ष्मस्थूलकार्य्यसाधने सूक्ष्मस्थूलोपायौ युक्तौ। 'लोहो स्त्री शस्त्रके लोहं जोङ्गके सर्वतैजसे' इति मेदिनी। 'कालायसमायसी अश्मसारः' इत्यमरोऽपि। आयस इति। एति, अयते वेति एतेरसुन्। यद्वा अय एवायसः स्वार्थेऽण्। कालायस इत्यत्र तु 'अनोश्माय: सरसाम्' इत्यनेन टच्। सूत्रमदः पूर्वसूत्रोदाहरणभूतमिति केचित् ॥ २१ ॥

दुर्बोधस्य हीनमतेर्वा मित्राभावमाह नेति। अधीमतो बुद्धिहीनस्य निर्बोधस्य। सखा सुहृद् बन्धुरेति। नास्ति नैव विद्यते। धीमतः सुधियः सर्व एव लोका नैपुण्यान्मित्राणि भवन्तीति भावः। तथा च 'कृत्स्नो हि लोको बुद्धिमतामाचार्य्यः'। सुहृदपीति प्राञ्चः। 'धामिनो हि जगदगमानयन्ति' इति हृ-

धर्म्मेण धार्य्यते लोकः ॥ २२ ॥

दारुणकार्य्ये । अधीमन्तः स्वयं क्लिश्यन्ति परानपि तापयन्ति । अतस्तेषां कुतः सखित्वम् । 'नास्ति धर्म्मसमः सखा' इत्येवं पाठे तु धर्म्म-समो धर्म्मसदृशः सखा सुहृन्नास्तीत्ययमर्थः । तदुक्तं मानवे—

"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति" ॥

अपरञ्च 'धर्म्मः सखा परमहो परलोक याने' । 'धर्म्मान्न प्रमदितव्यम्' । 'धर्म्मेण पापमपनुदति' इति श्रुतिः । 'धर्म्मेण गमनमूर्द्ध्व'मिति कापिलाः । महाभारते 'धारणाद्धर्म्म इत्याहु-र्लोकचरितं चरेदि'ति च । धारणादिति । जगतो विधारणात् लोकस्थितिहेतुर्धर्म्मः । लोकचरितं लोकानां मानवानां यद् यथेष्टाचरणन्तस्यानुतिष्ठेत् । 'धीमान् पण्डिते च बृहस्पतौ' । धीर्ध्यानं, ध्यायति अनया, ध्यायतेः सम्प्रसारणञ्चेति वार्त्तिकात् क्विप् । 'हलः' इति दीर्घः । धीरस्यास्तीति मतुप् । धर्म्मः । धरति विश्वं ध्रियते च लोकैरिति धर्म्मः । धृञ् धारणे इत्यस्मात् 'अर्त्तिस्तु' इत्यादिना मन् । सखेति । समानः ख्यायते लोकैः 'समाने ख्य उदात्तः' इत्यौणादिकादिन् । सडिन्, टिलोपः । 'नौ ध्यां यलोपः' इत्यतोऽनुवर्त्तनाद् यलोपः । समानस्य सभावः ॥ २२ ॥

धर्म्मद्वारा भुवनधारकत्वमाह धर्म्मेणेति । लोको भुवनं

प्रेतमपि धर्म्माधर्म्मावनुगच्छतः ॥ २४ ॥

जीवनिवहस्येति। धर्म्मेण विश्वधारकेन धार्य्यते धारणं क्रियते। तथा च श्रुतिः 'धर्म्मो विश्वस्य जगतः प्रतिष्ठा' इति। अन्यत्र स्मृतौ 'धर्म्मो धरा धारकः' इति। धर्म्माभावे तु लोकस्थित्यभावात् सर्व्वोच्छेदप्रसङ्गः।

'स धर्म्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्चे'ति श्रीभगवच्छाङ्करभाष्ये। शान्तिपर्व्वणि च

'प्रवृत्तिलक्षणो धर्म्मः निवृत्तौ च व्यवस्थितः'।

यद्यपि निवृत्तिलक्षणधर्म्मो निर्व्वाणाभिमतस्तथापि तयोर्म्मध्ये प्रवृत्तिलक्षणधर्म्मस्य प्राथम्यं प्रवृत्तिपूर्व्वकत्वान्निवृत्तेः। अत्र नीतौ च प्रवृत्तिधर्म्मस्याग्रिमत्वं समुपयोगित्वञ्चेति।

"धर्म्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ'।

इति मेदिनी। प्रसङ्गादुच्यते एषः। प्रागुक्तमन्यत् ॥ २३ ॥

नापि जीवितान् प्रत्येव नियतं धर्म्मस्यानुसरणमपि तु प्रेतं प्रत्यपि तदाह प्रेतमिति। प्रेतं मृतात्मानं लोकान्तरगतमनु पश्चात् धर्म्माधर्म्मौ पुण्यपापकर्म्मणी गच्छतः अनुगतः। न केवलं जीवितान् प्रति। तदुक्तं महर्षिमनुना—

"मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ।
विमुखा बान्धवा यान्ति धर्म्मस्तमनुगच्छति" ॥

अयमर्थं तु धर्म्माधर्म्मयोरदृष्टरूपेणात्मसमवेतत्वात् क्रिमिव कार्ये परलोकेऽपि तौ चात्मानमनुगमिष्यतः। तथाहि—'यतो

दया धर्मस्य जन्मभूमिः ॥ २५ ॥

अभ्युदयनिःश्रेयससिद्धिः स धर्मः' इति काणादाः। 'चोदनालक्षणो-ऽर्थो धर्मः' इति जैमिनीयाः। 'दशलक्षणको धर्मः' इति मानवाः। 'वेद प्रणिहितो धर्मः' इति पौराणिकाः। तद्विरुद्ध-स्त्वधर्मः। स ऐहिकदुःखदायकः पारत्रिकनिर्वाणविघातकः। बौद्धार्हतादीनामपि ब्रह्मचर्याहिंसा वैराग्यकरुणामैत्र्यादिरूपो धर्मोऽस्ति। 'प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' इति मेदिनी। प्रेतः प्रकर्षेण इतः लोकान्तरं गतः। इण गतौ, पति। ततः क्तप्रत्ययेन सिद्धम्। पूर्वसूत्रमन्यत् ॥ २४ ॥

धर्मस्येह परलोककार्यसाधकत्वमुक्त्वा सम्प्रति तस्य दयाकारणत्वमाह दयेति। दयानुकम्पा परदुःखप्रहाणेच्छेति यावत्। धर्मस्याभ्युदयनिःश्रेयससिद्धिहेतोर्जन्मभूमिः। कर्मणः समुत्पत्तेर्भूमिराकरः। दयाया अभावे धर्माभावः। तदभावे च चित्तप्रसादनमैत्र्याद्यभाव। मैत्री करुणा मुदितादीनां सर्वधर्मेषु चित्तप्रसादनकारणत्वात्। चित्तप्रसादनश्च दया समाधिर्भवति। अतः सा प्रभवभूमिर्धर्मस्य। तथा च बृहस्पतिः—

"परे वा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा।
आत्मवद्वर्त्तितव्यं हि दयैषा परिकीर्त्तिता" ॥

'दयाभूतहितैषित्वम्' इति गोविन्दभट्टः। स्मृतौ च—

"कृपा दयानुकम्पा च करुणानुग्रहस्तथा।
हितेच्छा दुःखहानेच्छा सा दया कथ्यते बुधैः" ॥

धर्ममूले सत्यदाने ॥ २६ ॥

धर्मेण जयति लोकान् ॥ २७ ॥

[illegible]

मृत्युरपि धार्म्मिकं रक्षति ॥ २८ ॥

धर्म्माद्विपरीतः पापः ॥ २९ ॥

तदुक्तम् ईश्वरकृष्णेन "धर्मेण गमनमूर्द्धं गमनमधस्ताद्भवत्यधर्मेण" इति। धार्मिकान् धीमतो जनान् सर्वं विस्मरन्ति, स्मरिष्यन्ते च। धर्मेण लोकमिमं विजित्य ऊर्द्ध्वं स्वर्गादिषु लोकेषु गच्छन्ति। अधर्मेण नरकादिषु अधोगतिः लोकेऽपि वर्त्तते। 'लोको भुवने जने' इति हैमः। लोक दर्शने लोक्यते इति लोकः। यथा पितुः ॥ २७ ॥

धार्मिकस्य मृत्युतोऽपि रक्षामाह मृत्युरिति। मृत्युर्मरणम् निधनमिति। यथोक्तं। धर्मेण धार्मिकं जनं रक्षति पालयति। मृत्युरपि धार्मिकं हन्तुं न शक्नोति। धर्माचरणेन निर्दिष्टमृत्युकालमतीत्य दीर्घायुर्भवति। स्वर्गेऽपि गच्छति। अमृतकरतपोबलेनामर इव भवति। यथा मार्कण्डेयादि। 'मृत्युर्ना [illegible]' इति श्रुतिः। [illegible] मार्गेण प्राणवायोः गमनम् [illegible]। [illegible] मृत्युरिति। [illegible] 'भुक्तिमुक्त्यो [illegible]' इत्युक्त्या [illegible] ॥ २८ ॥

पापस्य धर्मविपरीतत्वमाह धर्मादिति। धर्मात् [illegible] पुण्यादिति। पाप [illegible] [illegible] [illegible] [illegible] [illegible]

यत्र यत्र प्रसज्यते तत्र तत्र ध्रुवा स्मृतिः ॥३०॥

दुरितक्षय'मिति। धर्मस्य च पापनाशकत्वम्। तथाच श्रुतिः 'धर्मेण पापमपनुदति'। स्मृतिश्च—'लिप्यते न स पापेन पद्मपत्रमिवाम्भसा'। 'पापं किल्विषं कल्मषम्' इत्यमरः। पा पाने, पिबति भक्षयति कर्त्तारम्। इत्यतः 'पानीविषिभ्यः पः'। 'भीमादित्वादपादाने' इति सिद्धम्। अथवा धर्मात्मककार्य्याद्विपरीतः विरुद्धाचरणशीलः। पापः पापीति। कलुषवान् पुरुषः स नित्यं धर्मविरुद्धाचरणं करोति। एतस्मिन् पक्षे पापमस्यास्तीति 'अर्श आद्यच्'। अन्यथा पापशब्दस्य स्वतः क्लीवत्वम् ॥ २८ ॥

कार्य्ये नियुक्तस्य पुंसः स्मृतेर्ध्रैर्य्यमाह यत्रेति। यत्र यत्र यस्मिन् यस्मिन् कर्म्मणि लोकः प्रसज्यते प्रसक्तो निरतस्तत्तत् कार्य्यसम्पादने समुद्यतो भवति। शुभे कर्म्मणि पुण्यस्मृतिः। अशुभे कर्म्मणि पापोचितस्मृतिश्च। तत्र तत्र कर्म्मणि ध्रुवा निश्चला चिरस्थायिनी स्मृतिः कार्य्यसम्पादन नैपुण्याद्भवति। तत्रैव कर्म्मणि निरतः स्यादनेन लोकोपकृतिः शाश्वती स्मृतिश्च स्यात्। अथवा प्रवृत्तिषु कार्य्येषु ध्रुवा अभ्रान्ता स्मृतिरावश्यकीति। यतः स्मृतिभ्रंशात् कार्य्यनाशो बुद्धिनाशश्च भवति। स्मृतेः संस्कारमात्रजन्यत्वात् कार्य्यसंस्कारः प्रयोजनम्। यद्वा स्मृतिः स्मारकमित्यर्थः।

'स्थिरे नित्ये निश्चिते च ध्रुवं ... तथैवा'।

इति हेमचन्द्रः। ध्रु स्थैर्ये, ध्रुव गतौ वा, ध्रुवति। 'इगुपधे' इत्यादिना कः। यद्वा कुटादित्वात् ङित्त्वम्। अथवा

महती प्रसज्येत ॥ ३१ ॥

लोके प्रशस्तः स मतिमान् ॥ ३२ ॥

च । 'अथवा रतिः' एवं पाठे तु रतिः सत्यामक्तिरित्यर्थः । केचित् सूत्रद्वयमिदमेकत्वेन पाठरीतिमङ्गीकुर्वन्ति । तथा च 'धर्मादिपरीतं पापं यत्र यत्र प्रसज्यते तत्र धर्मावनतिर्महती प्रसज्यते' । इत्थं पाठे सूत्रार्थः सुगमः ॥ ३० ॥

धर्मस्य महतीमवमानामाह महतीति । महती ज्येष्ठा प्रबलेति । यत्र धर्मविरुद्धं पापं प्रसक्तं तत्र धर्मस्यावमानना धर्महानिर्वा प्राधान्येन प्रसज्येत प्रसक्ता भवति । अतः पापप्रसक्तिर्यथा न भवेत्तथा यतितव्यम् । अन्यथा महादुरितपङ्के मनुजकुञ्जरो निमज्जत्येव । 'बृहद्विशाले पृथुलं महत्' इत्यमरः । मह पूजायाम् । 'वर्त्तमाने पृषत् महत्' इत्यौणादिकात् साधुः ॥ ३१ ॥

लोके मतिमतां श्रेष्ठत्वमाह लोके इति । लोके भुवने जनसमूहे । य प्रशस्तः कर्मदक्षो महामतिः स पुमान् धीमान् इति । सर्वत्र मतिमत्त्वं हि प्राधान्ये कारणम् । यतः 'भूतानां प्राणिनः श्रेष्ठा प्राणिनां बुद्धिजीविनः' इति विदाम्मतम् । श्रेष्ठा इत्यर्थः । अन्यत्रोक्तं नीतिनिपुणैः 'बुद्धिर्यस्य गरीयसी स बलवान् स्थलेषु क प्रत्ययः' । 'शस्तं क्षेमे प्रशस्ते च' इति हैमः । प्रकृष्टं शस्तः । शंसु स्तुतौ, प्रपूर्वात्तस्मात् क्तः । मतिमान् मतिर्बुद्धिर्विद्यतेऽस्येति मतुप् ॥ ३२ ॥

सज्जन-गर्हिते न प्रसज्येत ॥ ३३ ॥

उपस्थित-विनाशः प्रकृत्याकारेण कार्य्येण लक्ष्यते ॥ ३४ ॥

साधुजननिन्दितकार्य्यप्रवर्त्तनमाह सज्जनेति। सज्जनाः साधवः। बहवो विद्वांसो वा। तेषां गर्हिते विगीते निन्दिते वा कर्मणि। अन्यो हितेच्छुर्मानवो न प्रसज्येत। नैव तत्र निरतो भवेत्। तथा च स्मृतौ—

"विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमिच्छति" ॥

तत्रैव च, 'अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन्। प्रसक्तं श्चेन्द्रियार्थेष्विति'। अन्यद्धर्मशास्त्रे पुष्कलमस्ति। गर्हिताचरणे समाजेषु दुर्नीतिर्वर्द्धते। तद्वर्द्धने तत्रोपद्रवः स्यात्। सन् शिष्टोजनः सज्जनः। 'सभ्य-सज्जन-साधवः' इत्यमरः॥ ३३॥

वर्त्तमानकार्य्यस्य भविष्यति हानिर्हेतुमाह उपस्थितेति। उपस्थितानां वर्त्तमानावस्था प्राप्तानां विषयाणां यो विनाशः समुच्छेदो हानिश्च। यद्वा सम्प्रति यो नाशः तस्य प्रकृत्याकारेण विषयस्वरूपेण कार्य्येण तद्व्यापारेण वा लक्ष्यते दृश्यते। वाऽप्यनुमीयते। अत एव वस्तुनः सत्यं धर्महानिश्च कार्य्यं यथा न प्रसरति तथैवावस्थातव्यमिति पूर्व्वोत्तुपङ्गः। प्रकृतिराकारः। आकारः समुदाचार-स्वरूपम्। अन्यत् कार्य्यस्य पूर्वचिन्तया-

आत्म-विनाशं सूचयत्यधर्म-बुद्धिः ॥३५॥
नास्ति पिशुनवादिनो रहस्यम् ॥ ३६ ॥

आगतविनाशा च सम्पत्ति दर्शनेनापि अनुमेयम्। यथा गति निष्प्राणी, ध्यायते। ततः स मत्यर्थेन सिद्धम्। मम अदर्शने, विनाशे विनाशस्ततो घञ्। आकरणमाकारः कर्तरिघञ्। प्रक्रियते समाक्रियते उपव्याप्यते यया सा प्रकृतिः तेन स्वरूपमेव प्रकृतिः ॥ ३४ ॥

अधर्मबुद्धेः स्वस्यापि नाश कारणत्वमाह आत्मेति। आत्मनः स्वस्य वस्तु सत्यस्य वा। अधर्मबुद्धिः अधर्मजनककार्ये मतिः। सा तत्कार्यकर्त्तुर्हानिं समुच्छेदं वा सूचयति प्रकाशयति। यदा अधर्मसत्यस्य यथावस्थितवस्तुनस्य विरोधिनी बुद्धिः। सा निश्चय विनाशं प्रकटयति निश्चितमस्य। अतोऽधर्मबुद्धिः नाशकारणाय भवति। तदुक्तं—

"अधर्मेणैधते राजन् ततो भद्राणि पश्यति।
ततः सपत्नान् जयति समूलस्तु विनश्यति॥"

अन्यत्र मौलिकं धर्मबुद्धिपापबुद्धौ. कदाचो ध्यक्तलिङ्ग। विनाश. स्यादृदर्शनम् इत्यमर। नश अदर्शने. विनाशनम्। ततो घञ्। बुद्धिर्मनीषा धिषणा धीः. प्रज्ञा शेमुषी मतिरित्यमर.। सूचयति बोधयति वा स्मरति तत इत्यम् ॥ ३५ ॥

स्वमपकृतमात्मनश्च रहस्य नास्ति पाठकमाह नेति। पिशुनवादिनो दुर्जनस्य। पिशुना. खला. सूचका. । न तस्य वादिनो

मातापि दुष्टा त्यक्तव्या ॥ ४० ॥

तेषु जनेषु अतिकामो अत्यभिलाषः स्वार्थाय न कर्त्तव्यः। नच विधातव्यः। तेन ते विरक्ता द्वेषिणोवा स्युः। द्वेष्टारः सन्तोऽवश्यमनिष्टमाचरन्ति। यत्र स्वार्थाभिलाषाधिक्यं तत्रैव विवाद सम्बन्धच्छेदौ भवतः। 'अतिक्रमः' इति पाठेतु अतिक्रमोलङ्घनं उपात्ययो न कार्य्य इत्यर्थः। 'अतिक्रमोऽत्यये क्षच्छ्रेऽप्युत्पाते नाशदण्डयोः' इति धरणिः। 'कामः स्मरेच्छयोः पुमान्, इत्यमरः। कमु कान्तौ, काम्यते। घञा सिद्धम्। अतिक्रमणमतिक्रमस्ततोऽतिपूर्व्वात्क्रमेर्घञ्। तद्वा कर्मः स्मरार्थे तु काम्यतेऽनेनेति 'पुंसिसंज्ञायाम्' इति घः ॥ ३८ ॥

आत्मविनाशहेतुत्वे मातुरपि त्यागमाह मातेति। माता प्रसूतिः। यद्यपि सा प्रसूतिर्दुष्टा आततायिनी समपकारिणी सती। त्यक्तव्या दूरे स्थातव्या। न तु सम्बन्धात् च्युता भवति सम्बन्धस्य ध्रौव्यात्। अत्र त्यागपदेन दूरावस्थितिरेव ज्ञेया। सान्निध्येऽवस्थानेऽपकृति-सम्भवात्। अत्रापिशब्दादन्येषां त्यागे शङ्कावतारोनास्त्येवेति सूचितम्। हिताहितविवेकशून्यस्य गुरोस्त्यागमाह, तथाच 'गुरोरप्रतिपन्नस्य कार्य्याकार्य्यमजानतः। उत्पथप्रतिपन्नस्य परित्यागो विधीयते'। एवस्त्यागः स्थानान्तिर्व्वासन वा, न तु दैहिकवधादि। तेषां गुरूणां 'वधोनास्तीति दैहिकः' इति महाभारत-निषेधात्। एतत्तु नीतौ। धर्म्मकर्म्म-विषये ज्ञेयम्। 'माता गौर्दुर्गा जननी मही'ति हैमः। मात

स्वहस्तोऽपि विषदिग्धश्छेद्यः ॥ ४१ ॥
परोऽपि च हितो बन्धुः ॥ ४२ ॥

पूजायाम्, मन्यते। मा मानि च, मानि गर्भोऽस्यामिति। 'मान् मेट्' इत्यादौणादिकात्तृचा साधुः ॥ ४० ॥

विषाक्रान्तस्य स्वहस्तस्य प्राणनाशकत्वे च्छेदनमाह स्वेति। स्वस्यात्मनः। हस्तः करः पाणिरिति। विषेण गरलेन भुजगदष्टेन च। यद्वा ताहृश भीषण रोगेण। दिग्धः लिप्त इत्यः विषाक्रान्तः। धत्त्त्वेन्द्य मृतोऽस्यादिना छेद्यः कर्तनीयश्च। 'विषाक्ते दिग्ध लिप्तकौ' इत्यमरः। 'दिग्धोऽविषाक्तबाणे स्यात् पुंसि लिप्तेऽन्यलिङ्गकः' इति मेदिनी च। 'चतुर्थ्यौ वीरगलना' इति कविसमयः। का कथा परहस्तच्छेदे स्वहस्तस्यापि च्छेदः समुचितः। तच्छेदे शरीररक्षणस्या सम्भवति। स्वहस्तः पूर्वसूत्रस्य दृष्टान्तपरम्। दिह उपचये. दिग्धं। दिहे. क्तः ॥ ४१ ॥

गतोऽपि हितकारित्वं बन्धुत्वमाह पर इति। पर इतर, गतृणामाय। हितो हितकारी उपकारक। कार्यकाले, सुहृदपि च सुहृद्रूपवायकत्वात भाति च बन्धुमिदम्, तथाचोक्तं राजनीतौ 'परोऽपि हितवान् बन्धुः। बन्धुरप्यहितः परः। अहितो देहजो व्याधिर्हितमारण्यमौषधम्। एवञ्च सुधाजन. यस्यहृदपि याद मूढा दुर्जन शीर्घरेव।

नास्ति चोरेषु विश्वासः ॥ ४४ ॥

अप्रतीकारेषु व्यसनेषु अनादरो न कर्त्तव्यः ॥४५॥

शब्दप्रयोगो दृश्यते । औषधेरिदम् । 'औषधेरजातौ' इत्यण् । अन्याय फलपाकान्ता ओषध्यो भवन्ति । वैद्यके तु वटिका घृत-तैलासवारिष्टावलेह-चूर्ण-चक्रिका प्राश-प्रलेप-पाचनादीनामौषधशब्दवाच्यत्वम् ॥ ४३ ॥

अन्यमिति द्रव्यापहरणस्वाभाव्याच्चोरेषु विश्वासाभावमाह नेति । चोरेषु तस्करस्तेयकारकपाटच्चरेषु विश्वासो निश्चयप्रत्ययः । नास्ति न विद्यते । चोर-दस्यु-दुष्टेषु च कृते विश्वासे महानिष्टं स्यादितिभावः । तेषां न्याय्यान्याय्य विवेकाभावो विश्वासाभावे हेतुः ।

'चोरः पाटच्चरेऽपिस्याच्चोरपुष्प्यौषधावपि' । इति विश्वः । 'मानमनिश्चय विश्रम्भ-विश्वासाः' । 'समौ विस्रम्भविश्वासा'वित्यमरः । 'श्वस् प्राणने' विश्वसनमिति विपूर्वात् श्वस्धातोः घञ् । चुर स्तेये, चोरणम् 'अप्रत्ययात्' संज्ञापूर्व्वकत्वान्न गुणः । चौरेति पाठे पचाद्यचा सिद्धः । चुरा शीलमस्य 'छत्रादिभ्योणः' ॥४४॥

अप्रतीकार्य्यो व्यसन. सोढव्य इत्याहाप्रतीति । व्यसनेषु विपज्जनकदोषेषु अष्टादशप्रकारेषु च । अप्रतीकारेषु अप्रतिसमाधानेषु वैरनिर्यातनायोग्येषु वा । अनादरोऽपमानः हेयः परिभवो वा । न कर्त्तव्यो नैव विधेय. । यद्यपि समुपस्थितेषु व्यसनेषु प्रतीकर्त्तुं न शक्यते तदा तदर्थं समधिकोद्यमः कार्य्यः,

व्यसन-मना बाध्यते ॥ ४६ ॥

तच्च, सोढव्यम् । न तु हेलया तुच्छबुद्धया वा परिहारः । तेन काले भविष्यति महदनिष्टापातः स्यात् । 'अप्रतीकारेष्वनादरो न कर्त्तव्यः' इत्यमपि पाठान्तरमस्ति । तदा तदर्थः सुगमः । तेषु व्यसनेष्विति ऊह्यम् ।

'प्रतीकारो वैरशुद्धिर्वैरनिर्य्यातनञ्च सः' । इत्यमरः । प्रतिकरणं प्रतीकारः । ततः करोतेः घञ्प्रत्ययः । उपसर्गस्येत्यादिना दीर्घः । 'व्यसनन्त्वशुभेऽयत्नौ' ।

'दैवानिष्टफले पापे विपत्तौ निष्फलोद्यमे' ।

इत्यमरमेदिन्यौ च । असु दीप्तौ असु क्षेपणे, व्यस्ति, व्यस्यति वा । भावाद्यर्थे ल्युट् । दृञ् विदारणे, आद्रियते । ततोऽच् न आदरः अनादरः ॥ ४५ ॥

व्यसनस्यासाधुकार्य्यत्वेन क्लेशदायकत्वमाह व्यसनमिति । व्यसनं कामज-कोपजादिदोषः । तद्विद्यते यस्य मनसि स व्यसनमनाः पुरुषः । तेन व्यसनेन स बाध्यते । आपद्भिर्युज्यते । शिष्टोपदेशमसङ्गमानवो मनोविनयेन च व्यसनवारिधिकर्णधारो भवतीति । प्रागुक्तमस्यात् । 'व्यसनं मनागपि बाधते' इत्यं पाठान्तरमस्ति । तदाले मनागल्पमपि व्यसनं पुरुषं बाधते किं बहुभिर्व्यसनैः । ततोऽल्पमपि व्यसनन्ताज्यं विषवत् । यथा विषं स्वल्पमपि जीवनहरम् । 'किञ्चिदीषन्मनागल्पे' इत्यमरः । मन ज्ञाने, मननम् । मन्यतेराज् प्रत्ययः ॥ ४६ ॥

अजरामरवदर्थमाऽर्जयेत् ॥ ४७ ॥

अर्थवान् सर्व्व-लोकस्य बहुतमः ॥ ४८ ॥

अर्थोपार्ज्जने जरामरण-वर्जितपुरुष इव स्यात्तदाह अज-रेति। नास्ति जरा जीर्णता यस्य सोऽजरः। एवमेवामरः। मृतिरहितो देवः। ताविवार्थं धनम् आर्ज्जयेदुपार्ज्जयेत् संग्रहीयात्। अमामर्थ्यालस्यान्वितः सन् न किमपि न कुर्यादिति भावः। तदुक्तं विष्णुना

'अजरामरवत् प्राज्ञो विद्यामर्थञ्च चिन्तयेत्'। इति।

तादृशत्वे तु अप्याहतशक्तिरयममम्मवो देव इवार्थमनूहमर्ज्जयेदिति। आर्ज्जयेदिति। आङ्समन्तगर्थे। 'अमरवदर्थजातमर्ज्जयेत्' इदृशे सूत्रपाठे अर्ज्जयेत् समासादयेदित्यर्थः। 'कैशादौ विस्रसा जरा' इत्यमरः। जृष् वयोहानौ, जीर्यते अनया। 'षिद्भिदादिभ्योऽङ्'। स्त्रियामाप्। यद्वा जरणमिति भावे अङ्। 'ऋदृशोऽङि गुणः'। 'मरणं निधनं प्राणनाशः'। मृङ् प्राणत्यागे, म्रियते। 'न म्रियते' इत्यमरः। पचादित्वादचा सिद्धम् ॥ ४७ ॥

धनवतो बहूनां सम्मानभाजनत्वमाहार्थेति। अर्थोधनं तद्विद्यतेऽस्येति अर्थवान्। सर्वलोकस्येति। जातावेकवचनम्। सर्वेषां लोकानां मध्ये सतां मान्य। यद्वा अर्थवतः श्रेष्ठत्वे बहूनाम् असंख्यजनानां मनोऽभिमतः। तदुक्तं विष्णुना

'धनेन बलवान् लोको धनाद् भवति पण्डितः'। इति।

कस्यचिदर्थं स्वमिव मन्यते साधुः ॥५४॥
परविभवेष्वादरो नैव कर्त्तव्यः ॥ ५५ ॥

सज्जनस्य स्वार्थपरार्थयोर्व्याघाते तुल्यप्रतीतिमाह कस्यचिदिति। कस्यचिज्जनस्यार्थं धनम्। साधुः सज्जनो महात्मा महामतिरिति यावत्। स्वमिवात्मन इवेदं परकीयं वस्तु [illegible] स्वं मतिसम्भुत्। यथा स्वार्थहानौ दुःखं तथा परार्थहानावपीतरस्य दुःखं भवेत्। साधूनां विषये स्वं स्वपरभेदाभावः। तदुक्तम्

"अयं निजः परो वेति गणना लघुचेतसाम्"।

अपरञ्च "आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः"। असाधुश्च स्मात् परकीयद्रव्यं निजं मत्वा तदपहरणव्यापारादौ प्रवृत्तः स्यादिति। 'स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये [illegible] ऽस्त्रियां धने' इति मेदिनी। अत्र शब्दे वर्त्तते। 'स्वमोऽपि दृश्यते' इति [illegible]। साधुवार्धुषिके चारौ सज्जने चाभिधेयवत् इति मेदिनी। [illegible] वा कथा वा [illegible] ॥ ५४ ॥

[illegible]

परविभवेष्वादरो विनाश-मूलम् ॥ ५६ ॥

पलालमपि परद्रव्यं न हर्त्तव्यम् ५७ ॥

तदुक्तं लघुचाणक्ये 'परद्रव्येषु लोष्टवत्' इति । मानवमीतौ च 'परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम्' इत्यनिष्टजनकत्वमुक्तम् । 'विभवो धननिर्वृत्योः' इति हैमः । विपूर्वाद् भवते रचा विभव इति साधुः । 'आदृतौ सादरार्चितौ' इत्यमरः । दृङ् आदरे, आद्रियते । ततोऽप् ॥ ५५ ॥

परद्रव्ये लोभनिषेधमुक्त्वा सम्प्रति तस्य विषाद-पापजनकत्वेन विनाशहेतुत्वं वक्ति परेति । परस्य विभवे धने ऐश्वर्ये वा समादरोऽभ्यापहरण । आत्मनो विनाशस्य मूलं हेतुः । तथा चोक्तं कविना—

"यदप्रदेयं न हि तत् परेषाम्" ।

इति विज्ञाय मतिमान् सुखं तिष्ठेत् । एवं परदारेष्वपि विज्ञेयम् । परदारग्रहे रावणदुर्योधनकीचका निदर्शनम् । शिष्टं प्रागुक्तम् । 'मूलं शिफाद्ययोः' । मूलविभेर्दोऽन्तक ना भ' इति मेदिनी । मूल प्रतिष्ठायाम्, मूल रोहणे वा मूलति इगुपधत्वात् कः ॥ ५६ ॥

अतितुच्छमपि यत् परद्रव्यं तदस्य परानिष्टाभावेऽपि न हर्त्तव्यमित्याह पलालेति । पलालं निष्फलं धान्य तृणकाण्डं

परद्रव्यापवर्गमात्राद्द्रव्यविभागहेतुः ॥ ५८ ॥

न चोत्पातात् परं मूल्यभागः ॥ ५९ ॥

[illegible]

यवागूरपि प्राणधारणं करोति काले ॥ ६० ॥

नास्ति। यथा हि यमपाशेन निधनसमये तद्भटेन मृतप्राणा: नीयन्ते। तद्वच्चौर्यापराधेन राजपुरुषैर्नीयते। परमस्याधिक्यं यमपाशैर्वारमेकं नीयते चौर्यापराधेन प्रतिवारं वद्धा नेतुं शक्यते। अतोऽस्य श्रेष्ठत्वम्। चौर्यापराधे यशोज्ञानिरर्थनाश: शारीरिककष्टं कारालयभोगश्चेति विदितमस्ति सर्वेषाम्। यमपाशश्च—

"ततः सत्यवतः कायात् पाशवद्धं वशङ्गतम्।
अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्" ॥

इति भारते। काठकश्रुतावुक्तम् 'स मृत्युपाशात् पुरतः' इति। 'स्तेयं स्तैन्यश्च चौर्यं स्याच्चौरिका चौरिकेऽस्त्रियाम्' इति वाचस्पतिः। चौर्यापराधे दण्डविधिरस्यार्थशास्त्रेऽस्ति। चौरस्य कर्म चौर्यम्, ततः ष्यञ्। मृत्युः। मृङ् प्राणत्यागे, म्रियते। 'भुजिमृङ्भ्यां युक्त्युकौ' इति त्युक्। 'पाशस्तु मृगपक्ष्यादिबन्धने' इति हैमः। पश बन्धे, पाश्यते, चुरादौ। ततो घञ् ॥ ५८ ॥

समये अतिक्षुद्रवस्तुनापि जीवनधारणं सम्भवति तदाह यवागूरिति। यवागूर्यूषिका रोगि-पथ्यविशेष:। सा तु क्षुद्रा अल्पा अपि काले रोगपराभूत शरीरे अन्नाभावसमये वा। प्राणधारणं लोकानां जीवनरक्षणं करोति। अत. क्षुद्रोऽपि काले-महोपकारसाधनं विदधाति। तत्र हेयबुद्धिं न कुर्यात्। यद्वा

नीचस्य विद्या पापकर्मणा योजयति ॥६३॥

ऐहिकामुष्मिकं वृत्तम् ॥ ६४ ॥

हीनमतेः शठस्य विद्यायाः कार्य्यमाह नीचस्येति। नीचस्य हीनस्य प्राकृतस्येति यावत्। पापकर्म्मणा दुष्कार्य्येण चौर्य्यकापट्यादिभिर्वा। विद्या सत् शास्त्रपाठजनितं ज्ञानं सुशिक्षेति च। योजयति सङ्गमयति। अतो नीचेषु सुविद्याजनितं फलं दुर्लभम्। तथा च भागवते 'सरस्वती ज्ञानखले यथा सती' इति। न केवलं विद्यया नरो गौरवं याति। अपि तु शिष्टाचारसौजन्य-विनय-धर्म्मादिभिः प्रयोजनसिद्धिस्तत्र दृश्यते। 'नीचः प्राकृतस्तु पृथक् जनः' इत्यमरः। 'नीचस्य विद्याः पापकर्म्मणि योजयन्ति' ईदृशे पाठद्वैधे अर्थवैषम्यं नास्ति। विद ज्ञाने, इत्यसो क्यपा सिद्धम्। छान्दोग्ये सप्तमप्रपाठके सनत्कुमार नारदसंवादे नाना विद्या लिखिताः। शैवतन्त्रे चतुःषष्ठिकलाविद्याः समुद्दिष्टाः। विष्णुपुराण-याज्ञवल्क्यादयस्तूक्ता अष्टादशविद्याः। बौद्धग्रन्थे ललितविस्तरे चतुःषष्ठि-विद्याः सम्यगुक्ताः। एवमेव दशकुमारचरिते नानाविद्याः सम्यग्लिखिताः। साहित्यदर्पणकृन्मते अष्टादशभाषा इति ॥ ६३ ॥

शीलचरितस्य कार्य्यस्य वा फलमाह ऐहिकेति। वृत्तं चरितम्। यद्वा शीलत्वादनुष्ठितं कर्म्म। ऐहिकमैहलौकिकम्। आमुष्मिकम् आमुष्मिकं पारलौकिकम्। एतदुभय-

नहि धान्य-समोऽर्थः ॥ ६६ ॥

न क्षुधासमः शत्रुः ॥ ६७ ॥

धान्यस्य सर्व्वसस्य प्राधान्यकथनमुखेनाह नहीति । धान्येन व्रीहिना समस्तुल्योऽर्थो धनमन्यत् किमपि नहि विद्यते । सतुष यवादिषु धान्येन हि लोकानामन्नभूतेन प्राणधारणं भवति। अतस्तस्य श्रेष्ठत्वं सौलभ्यात् । तथाच रामायणे,—

"उत्पत्तिविंषमा यस्य नित्यं यस्य व्ययो भवेत् ।

सर्व्वसस्यप्रधानस्य धान्यस्य कुशलं वद" । इति साधूक्तम् । 'धान्येन धनवानिति' दीर्णाः । धान्येभ्यः धनानि सम्भवन्ति । तदुक्तं सूरिभिः—

"कन्नायत्तगतप्राणा न बुद्धिमन्नजीवनम्" ।

परागा परमं दुःखं' * * * ॥

महाभाष्ये तु 'गण सप्तदशानि धान्यानि' इत्युक्तम् । अमरव्याख्याने राजमुकुटैरपि सप्तदशप्रकारत्वं धान्यानामुक्तम्। रामायणे तु भरतं प्रति श्रीरामचन्द्रवाक्यम्—यथैव स्वर्णरत्नादिधारणेन सुचित्रस्तिर्न भवति । परं क्षेममसवेन तत् स्यादिति। 'धान्यस्तु व्रीहिधान्यार्कं' इति हैमः । धन धान्ये, धनति । धनमेव धानं धानं पोषणे साधुः । 'तत्र साधुर्य्ये यः' इति यत् । मम वैश्वर्यं मनति । ततः पचा सिद्धम् ॥ ६६ ॥

जीवनशक्तिप्रबलैम—क्षुधायाः शत्रुतो हि पाधिरगाम

इन्द्रियाणि जरावशं कुर्वन्ति ॥ ६९ ॥

तत्। यद्वा क्षुध् बुभुक्षायाम्, क्षुध्यति। अकर्मकत्वात् क्तः। 'वसति क्षुधोरि'त्यादिना इट्॥ ६८॥

इन्द्रियैर्लोकानां जरावशीभूतकरणमाहेन्द्रियेति। तानीन्द्रियाण्येकादश। तत्र चक्षुः कर्णं नासिका जिह्वात्वगाख्यानि ज्ञानेन्द्रियाणि पञ्च। वाक्पाणिपादपायूपस्थाभिधानानि कर्मेन्द्रियाणि च पञ्च। एकादशं मनः। इति सांख्यवृद्धाः। वेदान्तपरिभाषाकृन्मते नास्ति मनसः इन्द्रियत्वम्। इन्द्रस्यात्मनो लिङ्गं गमकमिन्द्रियम्। 'न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा' इति सांख्यसूत्रम्। अनेन मनसो व्यापकत्वनिरासः। अयञ्च सर्वतन्त्रसिद्धान्तः। तथा चाचार्यं वेदान्तसूत्रं 'नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वा अन्यथा'। तत्र काणादसूत्रञ्च 'आत्मेन्द्रियार्थसन्निकर्षे ज्ञानस्य भावोऽभावश्च मनसो लिङ्गम्'। एवमेव न्यायसूत्रञ्च 'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्'। एभि सूत्रैर्मनसो विभुत्वव्यापकत्वनिरासः। यत्तु सांख्यदर्शनभाष्ये विज्ञानभिक्षुणा 'तत्तद्विषयगोचरतया व्यापित्वमपि सिद्धम्' इत्युक्तं तत् सर्वतन्त्रसिद्धान्तविरोधादनादेयम्। तानीन्द्रियाणि मानवं जरया वशाधीनं कुर्वन्ति। इन्द्रियाणामेवास्य शक्तिक्षयाद् लोका जरया जीर्णतां यान्ति। अत [illegible]। यदा क्षुधया पीडितानीन्द्रियाणि, जरायत्तं कुर्वन्ति मानवमिति पूर्वसूत्राशयः।

सानुक्रोशं भर्त्तारमाजीवेत् ॥ ७० ॥
लुब्धसेवी पावकेच्छया खद्योतं धमति ॥७१॥

'इन्द्रियन्तु चक्षुरादिषु रेतसि' इति हैमः। इन्द्रियमिन्द्रलिङ्गमित्यादिना साधु.। 'पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा' इत्यमरः। जॄष् वयोहानौ. जीर्य्यति अनया। 'षिद्भिदादिभ्योऽङ्'। यद्वा जरणं जरा ततो भावे अङ्। 'ऋदृशोऽङि गुणः' ॥ ६८ ॥

उपायतः प्रभोराश्रये हितकथनमाह सानुक्रोशमिति। अनुक्रोशेन दयया सह वर्त्तमानं भर्त्तारं स्वामिनं प्रभुमिति। आजीवेत् जीविकार्थं समाश्रयेत्। तादृशस्य प्रभोराश्रये कार्य्यसम्पत् सफला स्यात्। निर्दयप्रभोराश्रये अवसन्ति सभयः कुतो वा जीविका। अतो धन दया गुणयुक्तस्य प्रभोराश्रयः श्रेयान्। दैवाद्यदि धनाभावो दया तु सुलभा तत.। एतत्प्रसङ्गादुक्तं नीतिविद्भिः—

"सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्य्यते"॥

अन्यच्च—'निर्गुणं परिहृत्यैव गुणवन्तं समाश्रयेत्'।
स्वामिलक्षणसंग्रहार्थं युक्तिकल्पतरौ आस्ति। क्रुश आह्वाने. अनुक्रोशत्यनेन इत्यर्थे घञ्। भर्त्तारं। डुभृञ् धारणपोषणयोः. बिभर्त्ति। तृन्. यथा शिवम् ॥ ७० ॥

लोभपरायणस्य या सेवा तस्या फलमाह लुब्धेति। लुब्ध

अगम्यागमनादायुर्यशः पुण्यानि क्षीयन्ते ॥ ७९ ॥

इत्येतच्छन्दोऽसमप्। दृश्यमकर्मापेक्षायाम्: स्यात्। वह प्रापणे, विशिष्टं वहनम् विवाहः। स च धर्मा मिदः। वैशिष्ट्यन्तु वेध-पतित्वपत्नीत्वप्रापकः शास्त्रीयनियमोक्तसंस्कारविशेषः। अन्यदर्थ्य-शास्त्रे ज्योतिःशास्त्रे चास्ति ॥ ७८ ॥

अनिष्टजनकत्वेन पुंसामगम्यागमने हानमायुरादेरिति। अगम्या असद्गमनीया मैथुनायोग्या धर्मशास्त्रे निषिद्धा दुहित्रादयः। तासां गमनाद्व्यवायकरणात्। आयुर्जीवनकालः। यशो लोकेषु सुख्यातिः, पुण्यं धर्मेण सुकृतिः। एतानि पुंसः क्षीयन्ते विनश्यन्ति।

"अनिग्रहाच्चेन्द्रियाणां नरः पतनमिच्छति"। इति श्रुतिः। यथा नाशादात्मनोऽपि नाश सम्भाव्यते। ततोऽगम्यागमनं सर्व्वथा परिहर्त्तव्यम्। अगम्या यथा, यमस्मृतौ—

"या याऽगम्या नृणामिह निबोध कथयामि ते।
स्वस्त्री गम्या च सर्व्वेषामिति वेद-निरूपिता ॥
अगम्या च तदन्या या इति वेदविदो विदुः।
शूद्राणां विप्रपत्नी च विप्राणां शूद्रकामिनी ॥
अत्यगम्या च निन्द्या च लोके वेदे प्रतिष्ठिते।
गुरुपत्नीं, राजपत्नीं सपत्नीं मातरं प्रसूम् ॥
सुतां पुत्रवधूं, श्वश्रूं सगर्भां भगिनीं सताम्।
सोदर-भ्रातृजायाञ्च भगिनीं भ्रातृकन्यकाम् ॥

शत्रु-व्यसनं श्रवण-सुखम् ॥ ७९ ॥

इति चाणक्यसूत्रे नीतिदर्शनाख्ये तृतीयोऽध्यायः ॥ ३ ॥

मन ज्ञाने, अभिमननम् । अभिपूर्व्वात् मनो घञ् । सुगममन्यत् ॥७७॥

परिषदि द्वेषात् शत्रोराक्रोशवचने निषेधमाह समिते । संसदि सभायाम् । शत्रु द्वेष्टारमरातिं न परिक्रोशेत् नापि तस्य क्रोधोद्रेकं कुर्यात् । तं प्रति रोषं शुश्रूषनञ्च न विदध्यात् । तत्र तादृशाचरणेऽतीव दुष्टः सन् छिद्रानुसन्धाता भवेदिति भावः । सभायां सौजन्य-शिष्टाचारप्रदर्शनेन कार्य्यसौकर्य्यं भवति । तादृश एव नियमः सभ्यानाम् । 'सभा-संसत्-समिति-परिषदः' । 'स्त्रियां सामाजिके गोष्ठ्यां द्युतमन्दिरयोः सभा' इति रभसः । सम्यक् सीदन्त्यस्यां विद्वांसो हितार्थम् । षद्-विशरणादौ, सीदति । सम्पदादित्वात् क्विपा सिद्धम् ॥ ७८ ॥

शत्रूणां विपद्वार्त्ताश्रवणं श्रवणसुखमिति तदाह शत्रुरिति । शत्रूणां वैरिणाम् अरातीनामिति । व्यसनं तेषां दुःखशोक-मापदः । तच्छ्रवणं चाकर्ण श्रवणस्य सुखं । सुखं प्रीतिकर-भावो जायते इति शेषः । तदात्वे सभायामेतानिष्टकारिणः ...ो, विपत् सञ्जायते । स तया अवसन्नो भवतीति वार्त्ता पापा-...: शुभकरी । प्रवृत्ति-वार्त्ता-समाश्रितानामियं रीति यत ...दा शुभवार्त्ता अमित्राणां च दुःखवार्त्ता प्रीतिकरीति । ...ति कोपादिकं सुगमम् ॥ ७९ ॥

चतुर्थोऽध्यायः।

—०॰०—

अधनस्य बुद्धिर्न विद्यते ॥ १ ॥

नीति-नौकर्णधारस्य कौटिल्यस्य महामतेः।
सूत्राणामाशुबोधाय टीका सारार्थबोधिनी ॥

इति दर्शनभूतचाणक्यसूत्रव्याख्यायां श्रीईश्वरचन्द्रशर्म्मविरचितायां सारार्थबोधिन्यां तृतीयोऽध्यायः।

—०॰०—

तृतीयेऽध्याये सामान्यविशेषप्रकारेण मुख्यविषयान् प्रसङ्गागतविषयांश्चोक्त्वा सुहृद्व्यवहारञ्चोपदिश्य सम्प्रति तुरीयाध्याये निर्धनस्यार्थचिन्ताव्याकुलचित्तस्य बुद्धिहानिमाह अधनेति। अधनस्य दीनस्य निःस्वस्य चेति। बुद्धिर्धीर्मतिः। न विद्यते न प्रसरतीति। अर्थाभावचिन्ताव्याकुलतया नियतं बुद्धेर्मान्द्यात्प्रतिभा नश्यत्येव। 'बुद्धिर्मनीषा धिषणा धीः प्रज्ञे'त्यमरः। पुष्कल-विभवे सति, परिधान-पान-भोजन-चिन्ताराहित्येन चोरनवनीत-हविर्भोजनेन च बुद्धेः प्राखर्य्यं सम्पद्यते। तथा च "सद्यः प्रज्ञाकरं दुग्धम्"। 'तथा धी-स्मृतिमेधाग्निबलाहितं शस्यते घृतम्'।

"नवनीतं हितं गव्यं वृष्यं वर्णबलाग्निकृत्"।

इत्यादि वैद्यके। दीनस्य तु तन्नोपयुज्यते धनाभावात्। अस्य सूच्छकटिके दैन्यवर्णनं। पदनिवृत्तिः प्राग्वत् ॥ १ ॥

हितमप्यधनस्य वाक्यं न शृणोति ॥ २ ॥

धनहीनः स्वभार्ययाप्यवमन्यते ॥ ३ ॥

दैन्यात्तस्य हितोपदेशकत्वेऽपि लोकानां वैमुख्यमाह हितमिति। अधनस्य निःस्वस्य दानस्येति। हितं वाक्यं सदुपदेशमुपकारजनकं यद्वक्तृकं न शृणोति नाकर्णयति। यतो दैन्यालोकस्य सामान्यदृष्ट्या निर्धनः तुच्छास्पदो भवति। अतस्तद्वाक्यं प्रियमिष्टमपि न शृणोति श्रुत्वा च हृदयङ्गमं नाव-धारयति। 'वाक्यन्तु कुत्सितं हीनं वचनार्हे च वाच्यवत्' इति व्याडिः। 'तिङ्सुबन्तचयो वाक्यम्' इति शाब्दिकाः। तिङ-न्तानां चयो यथा 'पचति पश्य' 'पचति भवति' पाको भवती-त्यर्थः। सुबन्तानां चयः। 'महतिविस्तमिदं हि महात्मनाम्' इत्यादि। महाभाष्यकारमते अत्र 'भवति' इत्यध्याहारस्याव-श्यकत्वाभावात् न वाक्यम्। अन्ये तु 'वाक्यं स्याद्योग्यताकाङ्क्षा-सत्तियुक्त-पदोच्चय' इत्याहुः। हितमिति। धाञ् धारण-पोषणयोः। दधातेः धाप्रते इति क्तप्रत्ययः। 'दधातेः हिः' इत्यनेन साधु। वच भाषणे इत्यतः। वचेः एयत् 'वचोः' इति शब्दसञ्ज्ञायाम् कुत्वम् ॥ २ ॥

धनाभावात् स्वजनैरवमाननमाह धनेति। धनेनार्थेन हीनो निर्धनः पुरुषः। स्वस्यात्मनः भार्यया पत्न्याप्यवमन्यते अवज्ञा-यते। पत्न्यादयः सर्वे सत्सु धनेषु सुखिनो भवन्ति। ते च धनिनं गृहपतिमाद्रियन्ते। धनाभावे सुखाभावादवमन्यन्ते च

पुष्पहीनं सहकारमपि नोपासते भ्रमराः ॥ ४ ॥

तदुक्तं कविभिः 'माता निन्दति, नाभिनन्दति सुतः कान्ता च नालिङ्गते' इति। धनाभावादित्यर्थः। फल-पुष्प-पत्रविहीनं महीरुहं यथा विहगा त्यजन्ति। यथा च शुष्कं सरः सारसाः परिहरन्ति तद्वद्धनहीन-मानवं कुटुम्बाः विजहति। अन्यच्चोक्तम् कविभिः 'असौ जोयादिकः सकलगुणहीनोऽपि धनवान्, बहिर्द्वारि यस्य तृण-लवसमाः सन्ति गुणिनः'। हीनः। ओहाक् त्यागे, हीयते। ततः आदिकर्मणि क्तप्रत्ययः, कर्मणि वा। 'घु मा स्था' इत्यादिनेत्वम्। 'ओदितश्च' इति नत्वम्। डुभृञ् धारण-पोषणयोः, भ्रियते भूर्यते वा। भृ भरणादौ, इत्युभयोर्णत्। यत्तु क्षीरस्वामिना 'संज्ञायां भृञ्' ऋदृलोर्ण्यता तत् साधितं तन्न, संज्ञायामर्थे 'समजनिपदः' इत्यादिना परत्वात् क्यपा भाव्यम्। संज्ञा पर्युदासस्तु पुंसि सावकाशो न तु स्त्रियाम्। यतः 'तदनुबन्धग्रहणे नातदनुबन्धकस्य' इति न्यायात् भृञ एव क्यप् स्यान्न तु डुभृञः ॥ ३ ॥

पूर्वसूत्रोदाहरणव्याजेन प्रयोजनसिद्ध्यभावे वस्तुपरिहारमाह पुष्पेति। पुष्पेन प्रसूनेन हीनं रहितम्। सहकारं सुगन्धिरसालवृक्षम्। यद्वा सामान्य चूततरुम्। भ्रमराः मधुलिहः। नोपासते कुसुमाभावात् तत्तरुसमीपं नोपसर्पन्ति। विशुष्कं सरः सारसाः। दृष्टान्तभूतं पूर्वसूत्रस्येदं सूत्रमिति। 'पुष्प विकाशे आर्त्तवे। धनदस्य विमाने च प्रसूने नेत्र-

नीचस्य विद्या नोपेतव्या ॥ १२ ॥

शास्त्रम्। वात्स्यायनादि प्रणीतं कामशास्त्रम्। पालकाप्यादेः हस्त्यायुर्वेदशास्त्रम्। शालिहोत्रादेः अश्वशास्त्रम्। गणितशास्त्रं तत्र कल्पसूत्र-ज्योतिषान्तर्गतम्। अन्यत् छान्दोग्य-प्रस्थानभेद-कामसूत्रव्याख्यानेषु पुष्कलमस्ति, दिङ्मात्रमत्र प्रदर्शितम्। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। अकि लक्षणे, अङ्क्यते अनेन। 'मानमिवर्णमि' इत्यादिना औणादिकात् साधुः ॥११॥

दुर्वृत्तत्वेन क्रौर्यादिना हीनजनस्य विद्योपगमने निषेधमाह नीचस्येति। नीचस्य हीनस्य पामरस्येति। विद्या शास्त्रपाठजनितं ज्ञानम्। यद्वा छान्दोग्योक्ता शैवतन्त्रोक्ता चतुःषष्टिकलादया। सा नोपेतव्या नैव शिक्षणीयाभ्यसनीयेति। तदुक्तं शास्त्रान्तरे:—

'धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा।

तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे' ॥

गीतायाञ्च—

"इदं ते नातपस्काय नाभक्ताय कदाचन।

न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति" ॥

एतत् धर्म-ज्ञानविषयमिति कश्चित्। तदैव कारक

'मतोऽन्यमानसा वापि दद्यात्मेनमाद्रियात्'।

इदमपि तत्त्वज्ञानविषयकमित्यन्ये प्राहुः। यद्यपि नीचादपि

म्लेच्छानामपि सुवृत्तं ग्राह्यम् ॥ १४ ॥

"चातुर्वर्ण्य-व्यवस्थानं यस्मिन् देशे न विद्यते ।
स म्लेच्छदेशो विज्ञेयो आर्य्यावर्त्तस्ततः परम्' ॥

भास्कराचार्य्यास्त्वाहुः—

'वर्णव्यवस्थितिरिहैव कुमारिकाख्ये
शेषेषु चान्त्यजजना निवसन्ति सर्व्वे' ।

अन्यत्रोक्तं—

"गोमांसखादको यस्तु विरुद्धं बहु भाषते ।
सर्व्वाचारपरिभ्रष्टो म्लेच्छ इत्यभिधीयते" ॥

केचित्तु विद्वांसः प्रोचुः म्लेच्छादिदेशविमर्शो धर्म्मादि विषये न तु नीति वार्त्तादौ । वाणिज्य-विद्याध्ययनाद्यर्थकेषु न देश-विचारः । तथा च नीचादप्युत्तमां विद्या'मिति । अपरञ्चोक्तं मनुना—'अब्राह्मणा दध्ययनमापत्काले विधीयते' इति च । सूतसंहितायाञ्च—

"ब्राह्मण्यां वैश्यतो जातः क्षत्ता भवति नामतः ।
अस्यामनेन चौर्य्येण म्लेच्छो विप्र प्रजायते" ॥

इति । 'शबरो म्लेच्छभेदे च' । 'किरातो म्लेच्छभेदे स्यात्' इति मेदिनी । 'पुलिन्दः कथ्यते म्लेच्छे' इति तारपालः । 'भेदाः किरात शबरा, पुलिन्दा म्लेच्छजातयः' इत्यमरश्च । एतेषां [illegible]ते एतएव म्लेच्छदेशत्वेन ख्याताः । म्लेच्छ अव्यक्ते शब्दे, [illegible]म्लेच्छति । अच्प्रत्ययेन सिद्धः ॥ १४ ॥

गुणे न मत्सरः कर्त्तव्यः ॥ १७ ॥

ध्यादपि काञ्चनम्'। अन्यत्र भारते यदुक्तं 'यत्रास्ते विषसंसर्गो-ऽमृतन्तदपि मृत्यवे' इति तत्गवककर्त्तकप्रियाचरणविषये धर्म-विषये वा मन्तव्यम्। स च गव्य-पापादिमिश्रितो धर्मोऽप्य-धर्माय भवतीति। 'पीयूषममृतं सुधा इत्यमरः। विषादिति। 'गरले विषमम्भसि च स्त्रियामतिविषायाम्' इत्युक्तविवेके। विषु-व्याप्तौ, वेवेष्टि कायम्। विष प्रयोगे वा, ततः 'इगुपध' इत्या-दिना कः। 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते। अया-चिते च मोचे ना' इति मेदिनी। न मृतं मरणमनेनेत्यमृतम् ॥ १६ ॥

गुणविषये मात्सर्य्यनिषेधमाह गुण इति। गुणे बुद्धेः प्राखर्य्ये विद्यादौ। यद्वा पुंसो विषयोत्कर्षे। मत्सरः मात्सर्य्योऽपरश्री-त्कर्षे द्वेषश्च। मत्सर इति भावप्रधाननिर्देशः, तेन मत्सरतेत्यर्थः। यद्वा तत्कार्य्यं मात्सर्य्यम्। न कर्त्तव्यो नापि विधेयः। तदात्वे शिष्टाहानिः समाजानिष्टं स्व मानसमालिन्यं चैरञ्च वर्द्धते। गुण दर्शने हर्षो विधेयः। यतः सर्व्वत्र गुणोऽर्हणीय हितकरश्च। उक्तञ्च कविभिः 'गुणैरुत्तमतां याति'। 'पदं हि सर्व्वत्र गुणै-र्निधीयते' इति च। 'मत्सरोऽन्यशुभद्वेषे तद्वत् कृपणयोस्त्रिषु' इत्यमरः। मदी हर्षे, माद्यति परक्षके। ततः 'ऋ-भू मदिभ्यः किम्' इति रसः।

"गुणो मौर्व्यामप्रधाने रूपादौ सूद इन्द्रिये।

अवस्थया पुरुषः सम्मान्यते ॥ १८ ॥

स्थान-एव नराः पूज्यन्ते ॥ १९ ॥

स्थानगौरवादि भवत्यादि समस्तासामपि वस्तुषु" ॥

इति मेदिनी । गुण आमन्त्रणे, गुणयति इति । ततो घञ् ॥ १७ ॥

अवस्थया पुंसो गौरवमाह अवस्थयेति । अवस्था दशा । कामकृतो धर्मो यौवनादिविशेषोऽवस्था चेति । यद्वा तया अवस्थया धर्मविद्यासामर्थ्यविशेषलक्षणया । पुरुषः पुमान् नर इति । 'पुरुषः आत्मनि नरि पुन्नागे च' इति कोषः । सम्मान्यते, पूज्यते मान्यवान् भवति । उक्तञ्च सूरिभिः 'अवस्था पूज्यते राजन् न शरीरं शरीरिणाम्' । यथा च सैन्य-भाण्डार-सचिव-कारणाच्च सामन्त-दुर्गं योग भेदादिभिः, राजेति सम्मान्यते लोके । तदभावे चावस्थामात्रतो राजा अवमान्यते । तदुक्तं—

“हस्ति-घोटक-सामन्त-नौका-दिगन्त साधनैः ।
राजा भवति लोकेऽस्मिन् न पुनर्वाक्यमात्रतः” ॥

इति । 'विशेषः कालिकोऽवस्था' इत्यमरः । अवपूर्वात्तिष्ठतेः अङ् । 'व्यवस्थायामिति' ज्ञापकात् । पुर अग्रगमने, पुरति । 'पुरः कुषन्' इत्यत्र न नियम् । अतः सततं सदवस्थायामवस्थेय भाव्यम् ॥ १८ ॥

योग्य स्थानाद्धिपतेर्गौरवकारणमाह स्थान इति । स्थाने स्वयोग्यायतनभूमौ । यस्य यदायतनं योग्यं निजस्थानं स्थानं तत्र तदेव शुभम्, यथा शैलगह्वरं सिंहस्य । नराणान्तु निर्मलचारि-

नास्त्यर्घः पुरुष-रत्नस्य ॥ २२ ॥

न स्त्रीरत्नसमं रत्नम् ॥ २३ ॥

करणमनायाससाध्यमभवेत् । क्वापि च नृपाकथन प्रतिज्ञाभङ्ग दोषोऽपि आपतति । इतश्च न्याय्यपथ-स्थितिर्मर्य्यादेति । 'मर्य्यादा धारणा स्थितिः' इत्यमरः । मर्य्या इति सीमार्थं अव्ययम् । तत्र दीयते । प्राग्वदङ् । अति पूर्व्वात् क्रमेविधिलिङ् ॥ २१ ॥

श्रेष्ठपुरुषस्य मूल्याभावमाह नेति । पुरुषरत्नस्य पुरुषेषु श्रेष्ठस्य उत्तमपुरुषस्येति यावत् । अर्घोमूल्यं नास्ति न विद्यते । अन्येषां रत्नानां रत्नवणिग्भिर्मूल्यं निरुप्यते पुरुषरत्नस्य तु केनापि मूल्यं निरुपयितुं न शक्यते वैदुष्यादिगुणस्यापरिमितत्वात् । 'मूल्ये पूजाविधावर्घः' इत्यमरः । अर्घ मह पूजायाम् अर्घ्यते अनेन । 'हलश्चेति' घञ् । ततो न्यङ्क्वादित्वात् सिद्धम् । अर्घिधातोर्वान्तरम् । तेन वा सिद्धम् । 'रत्नं सजाति श्रेष्ठेऽपि मणावपि नपुंसकम्' इति मेदिनी । रमु क्रीड़ायाम्, रम्यते । ततो णन्तः । अन्तर्भावितण्यर्थो वा । यद्वा रमन्तेऽस्मिन् । 'रमिस्त्च' इत्यौणादिकसूत्रात् । नेड् वशीत्यादिना नेट् । 'घेरनिटि इत्यादिना सिद्धम् ॥ २२ ॥

सर्व्वरत्न. स्त्रीरत्नस्य श्रेष्ठमाह नेति । स्त्रीरत्नम् । स्त्री. वरवर्णिनी । सैव रत्नाधिका । तदमूल्यम् । मूल्येन तादृश्याः वरवर्णिन्या दुर्लभत्वात् क्रय्यत्वाभावः । एतत्तुल्यं रत्नं भुवि

दुर्लभं रत्नम् ॥ २४ ॥

नास्ति । तथाच मार्कण्डेयपुराणे 'स्त्रीरत्नमति चार्व्वङ्गीद्योतयन्ती दिशस्त्विषा' । स्त्रीरत्नं स्त्रीषु श्रेष्ठम् ।—'जातौ यदुत्कृष्टं तद्रत्नम्' । 'विष्णुपुराणे महाकायाश्च चतुर्दशरत्नानि यथा—

'चक्रं रथो मणिः खड्गश्चर्म्म रत्नञ्च पञ्चमम् ।
केतुर्निधिश्च सप्तैवमप्राणानि प्रचक्षते ॥
भार्य्या पुरोहितश्चैव सेनानी रथकृच्च यः ।
पत्त्यश्वौ कलभश्चेति प्राणिनः सप्तकीर्त्तिताः ॥
चतुर्द्दशैतानि रत्नानि सर्व्वेषां चक्रवर्त्तिनाम्' ।

अन्यच्चोक्तं सूरिभिः —

"सर्व्वरत्नस्य रत्नस्य वेत्ता च भुवि विद्यते ।
स्त्रीरत्नस्य च तत्त्वज्ञा न सन्ति जगतीतले" ॥

प्रागुक्तमन्यत् ॥ २४ ॥

अथ, सततमौल्यमाह दुरिति । रत्नं मणि प्रभृति । तच्च स्वजाति-श्रेष्ठम् । तद्दुर्लभं भुवि । यद्दृष्टेन केनचित् कश्चित्लभ्यते । अपरञ्च रत्नस्य भोजराजाय-युक्तिकल्पतरौ गरुडपुराणे च वर्णितमस्ति । तथाचोक्तम्—

"परीक्षा परिशुद्धानां रत्नानां रचिताद्भुता ।
धारणं संग्रहो वापि कार्य्यः श्रियमभीप्सता ॥
शास्त्रज्ञाः कुशलाश्चापि रत्नभाजः परीक्षकाः ।
त एव मूल्यमात्राया वेत्तारः परिकीर्त्तिताः" ॥

अयशो भयं भयेषु ।२५ ॥

'रत्नं स्वजाति श्रेष्ठे स्यात् मणावपि नपुंसकम्' इति हैम-कोषे। रत्नरक्षणं धारणञ्च प्रशस्तं कीर्त्तितं राजवल्लभे। तथाच—

"धन्य' यशस्यमायुष्यं श्रीमद्व्यसनसूदनम्।
हर्षणं काम्यमोजस्यं रत्नाभरणधारणम्" ॥

तानि च सूर्य-चन्द्रकान्त-पद्मराग-नीलकान्तादीनि विविधानि। प्रागुक्तमन्यत् ॥ २४ ॥

सुधियां मानवानां लोकेषु श्रेष्ठ-भयमाह अयश इति। सर्व्वेषु भयेषु साध्वसेषु। यद्वा तज्जनकेषु विषयेषु। पुंसामयशो-ऽपकीर्त्तिः कुत्सायां भयं भीतिरेव महज्ज्ञेयम्। तथा च भारते—

"सम्भावितस्यापकीर्त्तिर्मरणादतिरिच्यते"।

अन्यच्च तत्रैव—

"अकीर्त्तिञ्चापि भूतानि कथयिष्यन्ति तेऽव्ययाम्"।

अपरञ्च—

"अपमानं तथा लज्जा बन्धनं भयमेव च।
रोग-शोकस्मृतिभ्रंशो मृत्युरष्टविधः स्मृतः ॥"

कालेऽपमानविशेषो मृत्युदेशो भवति। कविसमयश्च 'परी-वादस्तथ्यो हरति हि महिमानं जनरवः' इति। 'लोकवादो जनरवः परीवादापवादयोः'। अवैधकर्मानुष्ठाने अयशो मह-द्भवति। तदुक्तं महर्षिणा 'अयशो महदाप्नोति नरकञ्चाधि-

नक्षत्रादि-निमित्तानि विशेषयन्ति ॥३४॥

इति व्याडिरपि । 'सम्पत् समृद्धिः श्रीये'ति ।

'निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते' ।

इति पञ्चतन्त्रे । न्यायमते तु समवायिकारणासमवायिकारणाभ्यां भिन्नं तृतीयं निमित्तकारणम् । ञि मिदा स्नेहने, निमेद्यति । औतः क्तः । संज्ञापूर्वकत्वान्न गत्वम् । 'पताकानैगद निमित्ते' इति निर्देशाद्वेति माधुरमुक्तं व्याख्यासुधायाम् ॥११॥

कार्यारम्भात् प्राङ्-निमित्तसूचकहेतुमाह नक्षत्रादीति । नक्षत्रादि । अप्राकृताभिनवनक्षत्रदर्शनम् । आकाशे धूमकेतुः । गिरीणामावरणम् । साग्नि-धूमाङ्गारोद्गमः । ते आदयो येषां निमित्तानां, तानि निमित्तानि । कार्यानुष्ठानात्पूर्वं यादृग् निमित्तदर्शनं भाविकार्यफलं तादृगेवानुमेयम् । तानि परिणामसूचकानि विशेषयन्ति । विशिष्टत्वेन ज्ञापयन्ति । तद्यथा त्रिविधमद्भुतं दिव्यं नाभसं भौमञ्चेति । एवमद्भुतसागरे बार्हस्पत्यवचनम् । 'प्रकृतिविकृतमद्भुतमापदः । प्राक् प्रबोधाय देवा सृजन्ती'ति । विष्णुधर्मेऽपि भौमादिभेदेन कथनात्तदनुसृतम्

"भौमं चाल्पफलं प्रोक्तं चिरेण परिपच्यते ।
नाभसं मध्यफलदं मध्यकाले फलप्रदम् ॥
दिव्यं तीव्रफलं चैव शीघ्रकारि तथैव च" ।

घमद 'पुनश्चेय' व्यानिमित्ताचितृनक्षत्रबधे मत्स्येनाप्यसि ।

स्वभावो दुरतिक्रमः ॥ ३८ ॥

नीचे, दुष्यति । ततः क्तप्रत्ययः । चपावड योगः । सु-सुत्
चयति चपगताभित्यध्याहारोऽस्मा मिष्टम् ॥ ३७ ॥

अथ स्वभावस्यापरिहार्यत्वमाह स्वभाव इति । स्वस्यात्मनो भावः स्वभावः । यद्वा स्वो भावः प्रकृतिः स्वरूपं नैसर्गिकमिति यावत् । स च दुरतिक्रमः । दुःखेन महता प्रयासेनातिक्रमितुं शक्यः, तत्रैकापगमोऽशक्तिर्योग्या । तदुक्तम्—

"स्वभावो यादृशो यस्य न जहाति कदाचन" ।

अन्यच्च नीतिरत्नम्—

"न हि स्वभावो भावानां व्यावर्त्ये तौष्ण्यवद्रवेः" ।

सांख्यभाष्ये च—'स्वभावस्यानपायित्वाद् यावद्द्रव्य भावित्वा'-दिति । नीतिविद्भिरप्युक्तम्—

"स्वभाव एवात्र तथातिरिच्यते,
यथा प्रकृत्या मधुरं गवां पयः" इति ।

यथा पयसि माधुर्यमिक्षुरसे च । निम्बे च तिक्ततेति । अतिक्रमणम् । अतिपुष्पाकृसभावि इत्थ । अन्यविधो यथा—

निसर्गेण स्वरूपञ्चैवाऽपि भवति द्विधा ।
निसर्गः सहजाभ्यास जन्य संस्कार उच्यते ॥
सहजस्तु स्वतः सिद्ध स्वरूपं भाव इष्यते" ।

इत्युक्तलक्षणो । भास्कराचार्याश्च 'महता भूषणा

अपराधानुरूपो दण्डः ॥ ३८ ॥

स्वभावतो यतो विचित्रा बत वस्तुशक्तयः' इत्याहुः। अन्यच्च 'वह्निर्ज्वलनपेक्षो च स्वभावोऽयं प्रकीर्त्तितः' ॥ ३८ ॥

अपराधिषु यथायोग्यदण्डमाह अपेति। यस्य दण्डस्य यादृशोऽपराधस्तस्य तदपराधानुरूपो दण्डो योग्यत्वेन विधेयः। नतु गुर्व्वपराधे लघुदण्डः। लघ्वपराधे गुरुदण्डो वा। अथवा निरपराधे दण्डः प्रयोज्यः। सापराधे दण्डाभावः। तेन समाजेषु दुर्नीतिः संवर्द्धते। एतत्सर्व्वम् अर्थशास्त्रविरुद्धं ज्ञेयम्। सर्व्वथा दण्डाभावे लोके मानवानां मात्स्यन्यायः कदर्थितः स्यात्। अराजकञ्च राष्ट्रं भविष्यति। अतो दण्डः प्रजारक्षणे तत् स्थितौ सुशासने चातिप्रयोजनार्हः। उक्तञ्च मनुना—

"अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन्।
अयशो महदाप्नोति नरकञ्चाधिगच्छति" ॥

नीतिविद्भिश्च दण्डवैविध्यमुक्तम्—

"अर्थाऽर्थग्रहणञ्चैव परिक्लेशस्तथैव च।
इति दण्डविधानज्ञैः दण्डोऽपि त्रिविधः स्मृतः" ॥

परिक्लेशो बन्धन-ताड़नादिः। तत्रैव—

"दण्डः सुप्तेषु जागर्त्ति दण्डः संरक्षति प्रजाः"।

इति च। अन्यदर्थशास्त्रे, युक्तिकल्पतरौ, भार्गवनीतौ, भारते राजधर्मे चास्ति। राध संसिद्धौ, अपराधनमपराधः। तमनु यथा भवेत्। दमु उपशमे, दमनं दण्डः, पचमत्वात् डः ॥३८॥



गुरु यथानुवर्ति शिष्यः । [illegible] ।

[illegible]

[illegible]

स्नेहवतः स्वल्पोऽपि रोषः ॥ ५२ ॥

आत्मच्छिद्रं न पश्यति परच्छिद्रमेव बालिशः ॥ ५३ ॥

इत्यादिना साधुः। मान इति। मन सम्भलने, मन्यते, मनते वा। घञा सिद्धः। यद्वा ज्वलादिसूत्रात् णः ॥ ५१ ॥

वात्सल्ययुक्तस्य कोपः अल्पीयान् भवति स माहिताय तदाह स्नेहवतेति। स्नेहवतः वात्सल्यवतो दयाशीलस्येति। ताहशस्य पुंसः। रोषः कोपः क्रोधश्चेति। सद्भि निमित्तं स्वल्पः अल्पः क्षणस्थायी भवति। तस्य स्नेहस्वभावत्वात् स्नेह एवाधिकः स्यात्। क्षणेऽपि रोषे न प्रातिकूल्यं भवेत्। 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः। अन्यच—'कारुणिको वत्सलश्च स्निग्धः स्नेहपरायणः'। ष्णिह प्रीतौ, स्नेहनम्। स्नेह इति घञा सिद्धः। रुषः हिंसायां, रोषः। तत्र भावे घञ् ॥ ५२ ॥

मूढजनस्य स्वभावं परच्छिद्रान्वेषणे तत्परत्वमाह आत्मेति। आत्मनः स्वस्य निजस्येति। छिद्रं दोषः अपराध इति। यद्वा छिद्रं कार्यदोषः। बालिशो मूर्खः इति। न पश्यति नावलोकयति। परस्यान्यस्य छिद्रं दोषमपराधितावरणाय पश्यति। हिताहितविषये विवेकज्ञानाभावात् स्वदोषमनाच्छाद्य परदोषं प्रकटयति प्रायेणायम्। तदुक्तं विदुरः—

"खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति" ॥

सोपचारः कैतवः ॥ ५४ ॥

दण्डिनापि—

"गुणदोषानशास्त्रज्ञः कथं विभजते जनः ।
किमन्धस्याधिकारोऽस्ति रूपभेदोपलब्धिषु" ॥

कविसमये च—

"प्रभावयत्येव निजोक्ति-दोषा-
मन्योक्ति दोषान् तरलो करोति ।
चन्द्रराज्योऽप्ययमिति सुवाच्यः,
कार्णोऽपि हास्यास्पदतामुपैति" ॥ इति ।

'मालिन्यन्तु मिशी मूर्खे' इति मेदिनी । 'परच्छिद्रमेव पश्यति मालिन्य' इति पाठान्तरमस्ति, तत्र नार्थभेदः । छिद्र भेदने, ततो घञ् । यद्वा छिदिर् द्वैधीकरणे, छिद्रातीति । 'स्फायि तञ्चि' इत्यादिना रक् । प्राङ् निरुक्तमन्यत् ॥ ५३ ॥

धूर्त्ततायाः उपचारपूर्वकत्वमाह स इति । कैतवः शाठ्यं कापट्यमतिचातुर्यमिति यावत् । उपचारेण कमनीयवस्तुना सेवनम् । यद्वा काम्येन वस्तुना सह इति ज्ञेयम् । उपचारः सेवार्थिनोपयोगोपकरणम् । यन्तु 'निग्रह, सेवा व्यवहारः उत्कोच' इत्याह । तेन सह वर्त्तमानः सोपचारः । कैतवः प्रायेण तादृश एव स्यात् । 'कितवो धूर्त्तवत्सले वञ्चके कन-काह्वये' इति विश्वः । 'कैतवन्तु छले द्यूते कैतवे कितवे रिपौ' इति मेदिन्यपि । कितं वायति, ओवै शोषणे, कितनं वातीति वा ।

काम्यैर्विशेषैरुपचरणमुपचारः ॥ ५५ ॥

अत्युपचारः शङ्कितव्यः ॥ ५६ ॥

या गति गन्धनयोः। अनयोः 'आतोऽनुप' इत्यादिना कः। कितवस्य कर्म कैतवम्। 'युवादित्वादण्'। धूर्तेन मधुरभाषा रमणीयवस्तु प्रदर्शनेन च स्वकार्यसाधनं क्रियते इति भावः। 'नोपचारः कैतवः' इत्यपि पाठान्तरमस्ति। यत् कैतवं तदुपचारेण सहितं न भवति। परन्तु तत् सुकरार्थं सूत्रम् ॥ ५४ ॥

चोक्तोपचारशब्दं विशदयन्नाह काम्यैरिति। काम्यैः कामनान्वितवस्तुभिः यदुपचरणं लोकानां परितुष्टये स्वकार्यसाधनाय वा सेवनमसावुपचारः। तेनोपचारेण कितवः धूर्तानाम् अभियुज्य कार्यं निष्पादयति। यत्किञ्चित् फलमुद्दिश्य कार्यते कर्म क्रियते तत्काम्यम्। अन्यत्र च—

"काम्यन्तु कामनायुक्तं यत्कर्म क्रियते नरः।
करोति फलमिद्धार्थं तत्काम्यं परिकीर्तितम्" ।
"यद् यदि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम्" ।

इति मन्वादयश्च। कमु कान्तौ, काम्यते इष्यतेऽभीप्सितम्। यद्वा कामोऽस्ति अर्हेत्यर्शआद्यादिना यत्। अथवेदं पूर्वेण वैशद्यकरणमूर्तमिवाभाति। उपचारः। चर गतौ, उपपूर्वोऽत्र वर्तनेऽर्थ ॥ ५५ ॥

प्रभूतोपचारस्य सन्देहकारणत्वमाह अतीति। अत्युपचारः अतिरिक्त-कार्य-भाषण-प्रदर्शन-सामग्री। स परिमाणातिरेकात्

श्वो मयूरादद्य कपोतो वरः ॥ ५८ ॥

ष्यति काले विपुललाभात् । यदास्मिन् समये काकिनी पणस्य तुर्यभागः । साप्ताह्नः । तस्मात् महर्स्त काले भविष्यति न साम्प्रतम् । काकिन्युक्ता लीलावत्याम्—

'वराटकानां दशकद्वयं यत् सा काकिनी ताश्च पणश्चतस्रः' ।

सा तु श्रेयसो प्रशस्ता भवति । अन्यच्च—

"पणगण्डकयोस्तुर्य्ये उदमानस्य काकिनी" ।

इति रुद्रः । तथैव रभसोऽपि—

"पणोदमानगण्डानां तुर्य्यांशेऽपि च काकिनी" ।

कर्मनिपुणाः प्रोचुः । 'आगामिनि करणीयं यत्तदद्य कर्त्तव्य'मिति । तथाहि—

"श्वः कार्य्यमद्य कर्त्तव्यं पूर्व्वाह्णे चापराह्णिकम् ।

नहि प्रतीक्षते मृत्युः कृतमस्य नवा कृतम्" ॥

अन्यत्र पाठान्तरमेवमस्ति 'गौर्दुष्करा श्वसहस्रादेकाकिनी श्रेयसी' । सहस्रसारमेयेभ्यः एकैव गौर्धेनुर्दुष्टा यदप्यपि श्रेयसी श्रेष्ठा भवति । यद्वा दुष्कराश्वसहस्रादेकापि गौः प्रशस्ता स्यात् । श्व इति । आगामि दिनम् । अद्यः पृषोदरादित्वात् साधुः । काकिनी । कक लौल्ये, ककनं काकः । घञा सिद्धा । अण शब्दे, काकमनति । ततोऽण्या पृषोदरादित्वाच्च साधुः । अतिशयेन प्रशस्ता, 'प्रशस्य श्रः' । स्त्रियां ङीप् ॥ ५८ ॥

पूर्व्वसूत्रोदाहरणमुखेन तत् स्पष्टीकरणमाह श्व इति । श्वः



मतिमुल्लिङ्घन् जयति ॥ ६२ ॥

यद्यपकारिण्यि कोपः कोपे कोप एव कर्त्तव्यः ॥ ६३ ॥

सम्यक् स्वक्रोधस्य जन्मापि न भवतीति सूत्रार्थः । तेन विषयेषु सम्यक् क्रोधासक्त्याद्यभावविशिष्टस्य जन्माभावोऽपि सूच्यते । 'क्रोधो भामः क्रुधा रुषा' इति शब्दार्णवः । तस्मात्क्षतिमता सर्वक्षितक्रोधेन भाव्यम् । क्रुध कोपे, क्रोधनम् । ततो भावे घञ् ॥ ६१ ॥

क्रोधविरहितस्यान्यकार्यमाह मतिमिति । मतिम् चतुर्बुद्धिम् । उल्लिङ्घन् विद्या-धनार्जनादौ उदयम् पुरुषान् जयति । यद्वा मतिं लोकाभिमुखगामिनीं बुद्धिमुल्लिङ्घन् जयति, नाम अभिभवति क्रोधाभावादित्यर्थः । अनेन पूर्वसूत्रस्य दृढत्वं व्यज्यते । 'धीः प्रज्ञा शेमुषी मतिः' इत्यमरः । एवमिदं पाठान्तरं नास्ति । अत्र पाठे प्रयुक्तं चमत्कृतम् [illegible] ॥ ६२ ॥

अनिष्टाचरणशालिषु तदपाकरण [illegible] किंचि [illegible] यदीति । यद्यपकारिणि [illegible] कोपः । तदा तादृशे कोपकृत [illegible] । कोपे एव क्रोध एव कर्त्तव्यः । [illegible] । तदा [illegible] स्यात् । [illegible]

मतिमत्सु मूर्खमित्रगुरुवल्लभेषु विवादो न कर्त्तव्यः ॥ ६४ ॥

नास्त्यपिशाचमैश्वर्य्यम् ॥ ६५ ॥

हिंसितं प्रतिहिंसनम्' इति। यद्वा कोपोऽस्यास्तीति अर्शादित्वादच्। कोपे तद्युक्त-पुरुषे इति। 'कोप क्रोधामर्षरोषप्रतिघाः' इत्यमरः। द्वेषोऽनिष्टापमान-बुद्ध्या-चित्तोज्ज्वलनं कोपः। कुप क्रोधे, कुप्यति। ततो भावे घञ् ॥ ६२ ॥

श्रेष्ठैर्हीनैश्च सार्द्धं विवादकरणनिषेधमाह मतीति। मतिमत्सु धीमत्-कुशलेषु। एवं मूर्खोऽज्ञो मूढ़ इति। मित्रं सुहृत्सखिरिति। गुरुराचार्यः श्रेष्ठ-जनः। वल्लभः प्रभुः स्वामी। एषु जनेषु। विवादो विरोधः कलहो न कर्त्तव्यः। यद्वा मतिमत्सु मूर्खादिष्विति बोध्यम्। साकमेभिः कृते विवादे शिष्टाचारलङ्घनम् अनिष्टापातः, पराजयो गौरवहानश्चावश्यम्भावीति। 'मतिर्ज्ञानमभिप्रायः धीः प्रज्ञा बुद्धिरित्यपि' इति। 'वल्लभो दयितेऽध्यक्षे सल्लक्षण तुरङ्गमे' इति विश्वः। वल्ल संवरणे, वल्लते वल्लति च। 'रासिवल्लिभ्याश्च' इत्यभच्। अन्यत् प्रागुक्तमिति ॥ ६४ ॥

ऐश्वर्य्यस्य तामसिकभावयुक्तत्वमाह नेति। अपैशाचम् अतामसिकं सत्वान्वितम्। ऐश्वर्य्यं वैभवमतुलसम्पदास्ति। यथाहि यत्र धनादेः प्राचुर्य्यं लाभे अर्जने च तत्र क्रोध-काम-

नास्ति धनवतां कर्मसु श्रमः ॥ ६६ ॥

कापट्यादि-व्यवहार-वैधवाद्युक्तं नियतमिति । ऐश्वर्यस्य प्राचुर्ये सति भोगकामाभिमानलोभादीनामुद्दामत्वं तद् वैपुल्यम् । विभवे सति सहिष्णो जगति दुर्लभः । कामादीनामनौत्कट्ये परमवैभविको नास्ति परम परमा निर्हतिश्च सम्भवति । प्रभुत्व-बहुलत्व-नियन्त्रकारित्वादीनि कथमैश्वर्यपदेन व्यवहरन्ति । ईश्वरस्य धर्मो भाव शक्तिविशेषोऽलौकिको शक्तिर्वा । 'गुणवचन' इत्यादिना ईश्वरशब्दात् ष्यञ् । विघासः । घस भोजने । विगतमश्नातीति कर्मण्यण् । ततः पृषोदरादि । सामान्यभ्रष्टोऽयं निर्देशः । भावप्रधाननिर्देशात् । विघासत्वम् । तत्शून्यमैश्वर्यं नास्ति । 'नास्त्यविघासमैश्वर्य'मिति पाठभेदोऽस्ति. तेनैश्वर्यमविघासमसत्त्वम् नास्ति तत् पुष्कलमेवास्तीत्यर्थः ॥ ६५ ॥

धनिनां कर्मसु श्रमाभावमाह नेति । धनवतां धनिनां वैभवान्वितानाम् । कर्मसु गृहस्थ-व्यापारकार्येषु । श्रमः क्लेश-देहेन्द्रियमनसामवसादजनकव्यापारः । नास्ति न विद्यते । धनवन्तो जना धनवितरणपूर्वकं स्वयं कर्मकरैश्च सर्वमेव कार्यं स्वपरहिताय नियमं सम्पादयन्ति । कुतो धनिनां श्रमः क्लेशः कष्टं श्रमो ग्लानि तथा 'घर्मार्त्तस्त्यपासि' शीयानितः । श्रमेहेन्यर्थेति घञ् । कर्माणि । डु कृञ् करणे क्रियते । 'कृञः भावे कर्माणि च मनिन्' इत्यादिकान्मनिन् । कर्म व्याप-

नास्ति यानवतां गतिश्रमः ॥ ६७ ॥

क्रियायाश्चे'ति रुद्रः । 'नास्ति धनवतां सुकर्म्मसु श्रमः' इतं सूत्रपाठे सुगमार्थं तद्बोध्यम् । दीनानान्तु श्रमः सर्व्वकर्म्मसु । धनिनां तेषु सर्व्वमक्लेशकरम् ॥ ६६ ॥

शकटवतां मार्गश्रमाभावमाह नेति । यानवतां शकट-शिविका-पोतादिमतां जनानाम् । गतिर्गमनम् । तत्र श्रमः क्लेशो नास्ति । यानवन्तो हि तत्तद् यानमारुह्य जले स्थले नभोमण्डलेऽनायासेन यान्ति । अतस्तेषां गमने श्रमाभावः । यानानि सपद-निष्पद-जलग-स्थलग-नभोगभेदेन बहूनि सन्ति । तथा च कामसूत्रव्याख्याने यशोधरोयेऽप्येवमुक्तम् । 'सजीवानां निर्जीवाना यन्त्राणां यानोदकसङ्ग्रामार्थं घटनाशास्त्रं विश्व-कर्म्मभिः प्रोक्तम्' । तत्र सजीवानि शिविकाश्वगोमहिषाजोष्ट्र-शकटादीनि । द्विपद निष्पद-यानविषये युक्तिकल्पतरौ वर्णित-मस्ति । पुष्पकविषयस्तु श्रीभोजराजीयसमराङ्गन सूत्रधारे सम्यग् श्रङ्कितोऽस्ति । विश्वकर्म्म-प्रोक्तं वायु-पारदादि परिचालितं यन्त्र-दिदानीं नोपलभ्यते ।

"जलगं स्थलगं यानं याप्ययानन्तथैव च" ।

इति वोपालितः । अन्यच्च नृपस्य दुर्भिक्षे आश्रयणीयानि—

"शकटः शाकिनी गावो यानमास्कन्दनं खनम् ।
अनूपः पर्व्वतो राजा दुर्भिक्षे नवहृत्तयः" ॥

यस्मिन् कर्मणि यः कुशलः स तस्मिन्नियो-
क्तव्यः ॥ ६८ ॥

चलाऽहमयं निगलं कलत्रम् ॥ ६९ ॥

इति । सममित्यत्र । 'धनमिति' कुत्रचित्पाठः याति धर्मेणेति । या प्रापणे, इत्यस्मात् 'करणाधिकरणयो'रिति ल्युट् ॥ ६७ ॥

योग्यकर्मणि कुशलस्य नियोगमाह यस्मिन्निति । यस्मिन् कर्मणि कार्ये । यः पुमान् कुशलो दक्षो निपुण इति । कार्यि-समयोः जनस्तस्मिन् कार्ये, पाण्डव-माणिक्य-विचार परिदर्शन-पत्रोहर-द्वारपाल-कोष-वाणिज्य वार्त्तादिषु । नियोक्तव्यः प्रयो-क्तव्यः । यथायस्य स्थाने नियोगे योग्यस्य चास्थाने नियोगे कर्म्महानिरविचारस्य ख्यादिति । 'स तस्मिन् नाध्यक्षे' इति पुस्तकान्तरे पाठान्तरमस्ति । तस्य त्वनावश्यकत्वमवभाति । 'कुशल, [illegible] [illegible] [illegible] च सुकृत चापि पर्य्यायो च मङ्-गलम् इति मेदिनी [illegible] [illegible] [illegible] [illegible] [illegible] राजकार्य्याणि [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] पद-पदयो' । [illegible] [illegible] [illegible] [illegible] [illegible] इति च । कुशान् [illegible] इति [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] राजकार्य' [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] नियोक्तव्य [illegible] ॥ ६८ ॥

कलत्रस्य [illegible] [illegible] [illegible] [illegible] [illegible]

अप्रमत्तो दारान् निरीक्षेत ॥ ७१ ॥

महामतीनां प्रेक्षापूर्व्वकारिणामिति । दुष्कलत्रम् । दुष्टं दुःशील-स्वभावं कलत्रं भार्य्येति यावत् । शरीरं कायं सा कर्षयति । क्लेशोद्वेगरोगादिभिः । शरीरकर्षणं करोति । तदुक्तं लघुचाणक्ये—

"दुष्टा भार्य्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः" ॥

अन्यच्च तत्रैव—

"माता यस्य गृहे नास्ति भार्य्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम्" ॥

कलत्रस्य पतिशरीरार्द्धरूपत्वात्तस्या दुःशीलत्वेऽवश्यं शरीरकर्षण-सम्भावना बलवतीति । तथा च चाणक्यराजनीतौ 'अर्द्धं भार्य्या शरीरस्ये'ति । स्मृतौ च—

"शरीरार्द्धं स्मृता जाया पुण्य-पाप-फले समा" ।

'कलत्रं श्रोणिभार्य्ययोः' इति कोषः ।

"मनस्वि-गर्हितं मार्गं समारोढुमसाम्प्रतम्" ।

इति कविसमयः । प्रमत्तः मत्तो विद्वान् भवेदिति । अत्र मत्त-स्विपदोपादानेनान्यथा शरीरकर्षणमतिसुकरमिति सूचितम् । शीर्य्यते रोगादिभिरिति शरीरम् । शृणातेर्धातोः 'कॄ शॄ पॄ' इत्यादिना ईरन् ॥ ... ॥

धैर्य्यमाश्रित्य स्त्रीणां सन्दर्शनं कार्य्यमित्याह एति अप्र-मत्तः स्थिरमानसः सन् । एकाग्रमना दारान् नारीं स्त्रियं ...

गुरूणां माता गरीयसी ॥ ७४ ॥
सर्वावस्थासु माता भर्तव्या ॥ ७५ ॥

भावे ल्यप्'। [illegible] ॥ ७३ ॥

सर्वेषु गुरुजनेषु जनन्या गरीयस्त्वमाह गुरूणामिति। गुरूणां गुरुजनानां पितृ-पितामह-शिक्षकोपाध्यायादि-गुरुवर्गाणाम् मध्ये माता जननी प्रशस्तिः। गरीयसी श्रेष्ठतमा भवति। तदुक्तम् —

"पितुरप्यधिका माता गर्भधारण-पोषणात्।
अतो हि त्रिषु लोकेषु नास्ति मातृ-समो गुरुः" ॥ इति

स्मृतौ च—

"सर्वेषामपि [illegible] गर्भधारा गरीयसी"।

अत्र गर्भधारा जननी। दशमासमात्रानि च गर्भे धारकत्वेन स्तन्य-दातृत्वेन च जनकतो जननी श्रेष्ठा। लोकेषु इति श्रेष्ठ-स्थापनाय। मर्त्यलोकेषु च स्नेह-कारुण्य-धर्म-क्लेश-पालन-त्यागाधारभूत-जननी-तुल्यो गुरुः कोऽपि न विद्यते। अतोऽस्या गरीयस्त्वं तथ्यमेव। जनयित्री प्रसूर्माता जननी इत्यमरः। 'गुरु गीष्पति पित्राद्यौ' इत्यमरः। गॄ शब्दे, ग्रणाति। 'कृ ग्रोरुच्च' इत्युः। मा माने, माति गर्भोऽस्यां 'नप्तृ नेष्टृ' इत्यौणादिकसूत्रात्साधु. ॥ ७४ ॥

सकलदशासु कालेषु च गुरु-श्रेष्ठत्वाज्जनन्याः पालनमाह

वैरूप्यमलङ्कारेण च्छादयेत् ॥ ७६ ॥

सर्व्वावस्थास्विति। सर्व्वाः सकलावस्था दशाः सुखदुःखमयास्तासु। सुखदुःखसङ्कुलजीवनव्यापारेषु च। समधिकमारीदुर्भिक्षकष्टदशामापन्नेषु वा। माता प्रकृतिः भर्त्तव्या। वस्त्राभूषणादिभिर्यत्नतः पालनीया सेव्या चेति। तदुक्तं धर्म्मशास्त्रकृद्भिः—

"वृद्धौ च मातापितरौ साध्वी भार्य्या सुतः शिशुः।
अप्यकार्य्यं शतं कृत्वा भर्त्तव्या मनुरब्रवीत्"॥

अपित्यक्तवत् सततं पालनीया, नहि दुःखमयं स्वं जीवनं दृष्ट्वा सा परिहार्य्या। कौर्म्मे उपविभागे—

"गुरूणामपि सर्व्वेषां पूज्याः पञ्च विशेषतः।
तेषामाद्यास्त्रयः श्रेष्ठाः तेषां माता सुपूजिता" इति।

वह्निपुराणे च

'मातृभ्योऽन्योनदैवोऽस्ति तस्मात् पूज्या सदा सुतैः'।

सर्व्वेति। सृ गतौ, सरति। 'सर्व्वनिघृष्व' इत्यौणादिकसूत्रात् सिद्धम्। चयस्येति। चयपूर्व्वात् स्याधातो रङ। व्यवस्थायामिति व्यापकात् ॥ ७५ ॥

भूषणादिभिः सौन्दर्य्यप्रकाशमाह वैरूप्यमिति। अलङ्कारेण अम्बराभरणादिना देहस्य वैरूप्यमसौन्दर्य्यमसौष्ठवं मालिन्यमिति यावत्। छादयेत् आवृतं विदधीत इति। यस्य तु स्वाभाविक-सुषमा नास्ति तस्य वसनभूषणादिना शरीरसौन्दर्य्यं वर्द्धयिष्यति। यस्य स्वाभाविकसौन्दर्य्यं विद्यते तस्यालङ्कारादेः सामान्यप्रयोजनम्। महाकविरपि आह 'किमिव हि मधुराणां

सर्व्वेषां भूषणं धर्म्मः ॥ ७८ ॥

विप्राणां ब्राह्मणानां भूषणमिति। भूषणमण्डनमलङ्कारः। वेदाः ऋगादयः। ऋक्-साम यजुरथर्व्वाणश्चत्वारः। 'यत्रार्थवशेन पादव्यवस्था सा ऋक्'। 'गीतिषु सामाख्या'। 'शेषे यजुः'। 'शान्ति-पौष्टिक-नीत्यादिप्रत्यायकमथर्व्व'। सामान्यतः चतुर्षु वेदेषु त्रयीति समाख्या। एतैरेव स्वाध्यायादिभिः विप्रा अलङ्क्रियन्ते। नान्यैरम्बरभूषणालङ्कारैः। उक्तञ्च मनुना—

"वेदमेव सदाभ्यसेत् तपस्तप्स्यन् द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते"॥

अनधीयानो विप्रः काष्ठमयवारणवत् चर्म्ममयमृगवच्च भवति। वेद इत्युपलक्षणं याज्ञवल्क्याद्युक्त-चतुर्दशविद्यायाध्येतव्याः। प्राग् वेदानधीत्य पश्चाच्चतुर्दशविद्या अध्येतव्याः। महाभाष्ये चैषां पाठः स्वाभाविक उक्तः—'तस्माद् ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येतव्यो ज्ञेयश्चेति'। 'यज्ञकर्म्मरतो विप्रो धर्म्म-ज्येष्ठः कठो द्विजः' इति त्रिकाण्डशेषः। सा पूर्व्वा. विप्राति धर्म्मान्। 'आनयोपसर्ग' इति च ॥ ७८ ॥

सकलमनुजानां सर्व्वजनानां सर्व्वेषामिति। सर्व्वेषां लोकानां भूषणं मण्डनमाभरणमिति। धर्म्मो लोकानां विधारकः। 'वेद-प्रणिहितो धर्म्मो ह्यधर्म्मस्तद्विपर्य्ययः' इति भागवते। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः' इति काणादाः। मनुना च—

"अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।

साधुजन-बहुलोद्देशः ॥ ८२ ॥

पञ्च यत्र न विद्यन्ते न कुर्य्यात्तत्र संस्थितिम्" ।

अपरञ्च 'स्वभिदेशमनुपल्लवं मनुपल्लवं समाश्रयेत्' ।
मनुपल्लवं शिष्य-भ्रातिव्याधिरोपयोगि-देशविशेषः । 'उपद्रवो रोगारम्भे उत्पाते क्लेशदायके' इति । दु द्रु गतौ, उपद्रवणमुपद्रवः । 'समियुद्रुदुवः' इत्यनेन घञ् । यद्वा 'ऋदोरप्' इत्यनेन सिद्धम् । दिश अति सर्जने, दिशति । ततः पचाद्यच् । यद्वा दिश्यते इति घञा सिद्धः ॥ ८१ ॥

विशिष्टदेशमाह साध्विति । यत्र साधवः सज्जनाः प्राज्ञा इति यावत् । ते च बहवः सन्ति । तस्मिन् जनपदे वर्त्तन्ते । स नद्यम्बु-वृष्ट्यम्बु-सम्पन्नव्रीहि-पालितो देशः प्रसिद्धो निरुपद्रवः सम्यग् निवास-योग्यः । 'स देशो यत्र निर्वृतिः' इति राजनीतौ । स च भारतवर्षादिः, एतल्लक्षणं प्रागुक्तम् । देव मातृकाऽदेवमातृकादि भेदेन द्विविधो देशः पुनस्त्रिविधः जाङ्गलोऽनूपः साधारणश्च । स च पुनर्मध्यदेशोदीच्यदेश-प्राच्यदेश-दक्षिणापथ-विन्ध्यवासि देशादिभेदेन बहुप्रभेदो निगदितो मत्स्यपुराणे शक्तिसङ्गमतन्त्रे च । निर्जीविक-देशनिवासे निषेधमाह—

"ऋणदाता च नृपतिः श्रोत्रियः सजला नदी ।
एते यत्र न विद्यन्ते न कुर्य्यात्तत्र संस्थितिम्" ॥

मन्त्रसाधका आहुः—

"माता च चिन्मयी देवी पिता देवो महेश्वरः ।

न राज्ञः परं दैवतम् ॥ ८४ ॥

दीप्तौ, राजति । 'कनिन् यु वृषि' इत्यौणादिकात् कनिन् । सर्वकालमिति 'कालाध्वनोरत्यन्तसंयोगे' द्वितीया । सर्वस्मिन् काले इति सूत्रार्थः ॥ ८३ ॥

भूलोके नरेषु नृपस्य देवत्वमाह नेति । राज्ञो नृपात् परं नृलोके श्रेष्ठमन्यत् दैवतं देवता आराध्यं सेव्यञ्च न विद्यते । तदुक्तं नीतिशास्त्रज्ञैः—

"बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।

महती देवता ह्येषा नररूपेण तिष्ठति" ॥

अपरञ्च—

"यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे ।

मृत्युश्च वसतिः क्रोधे सर्व्वतेजो मयो हि सः" ॥

येतु राजसेवा निरतास्ते नितरां सुखिनो भवन्ति । राज्ञोऽनिष्टकारिणो दुःखिनः स्युरितिनिश्चितम् । राज्ञा तु पुत्रनिर्विशेषेण प्रजाः पालनीयाः । तदुक्तं मार्कण्डेयपुराणे 'प्रजाः पुत्रानिवौरसान्' इति । अपरञ्च वाराहे—

"प्रजा येन प्रमोदन्ति येन तुष्यन्ति ब्राह्मणाः ।

एवन्ते पुत्र कर्त्तव्यं मम प्रिय-हितैषिणा" ॥

'प्रमोदन्ते' इति वा पाठः ।

अयमर्थः भारतीयशान्तिपर्व्वणि, शुक्रनीतौ, मानवधर्म्मशास्त्रे अन्यान्यशास्त्रे च वर्णितमस्ति । देवतेति स्वार्थे तलादेशः । अतः

रिक्तहस्तो न राजानमभिगच्छेत् ॥८६॥

गुरुञ्च देवञ्च ॥ ८७ ॥

शून्यहस्तस्य पुंसो नृपसन्निधाने गमननिषेधमाह रिक्तेति। रिक्तं शून्यं द्रव्यरहितमिति। तादृशः हस्तो यस्येति विग्रहः। सः राजानं नृपं नाप्यभिगच्छेत् न तं सेवेत, साक्षात्कारं न विदध्यादिति। तदुक्तं ब्रह्मपुराणे —

"रिक्तपाणिर्न सेवेत राजानं देवतां गुरुम्"।

सफलहस्तस्य नृपादिदर्शने झटित्येव तेषां प्रीतिस्तत्फलं तत्फलमिव कार्य्यफलं शुभदर्शनञ्च भवतीति भावः। अन्ये तु—

"रिक्तपाणिर्न पश्येच्च शिशुं देवं गुरुं नृपम्"

इत्याहुः। 'रिक्तपाणिना नृपो नाधिगन्तव्य' इत्थं पाठान्तरे रिक्तपाणिना फल-धनादिरहितकरेण जनेनेत्यर्थो बोध्यः। 'रिच वियोजनसंपर्चणयोः' रिच्यते। ततः क्तप्रत्ययः। नात्र तुच्छार्थबोधको रिक्तशब्दः ॥ ८६ ॥

यथा भूपालसविधौ गमनं रिक्तकरस्य प्राग् निषिद्धं तथा गुरुदेवयोरभ्यर्णेऽपि प्रतिवार्य्यते गुरुञ्चेत्यनेन। गुरुं दीक्षयितारं ज्ञानदातारं कुलगुरुं वा। पितरौ च। दण्डिनं सन्न्यासिनम्। धर्म्मोपदेष्टारं शीलवन्तञ्च। अन्यत्र स्मृतौ—

"वित्तं बन्धुर्वयः कर्म्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो ह्युत्तरोत्तरम्" ॥

एतद्वचनोक्तमुत्तरोत्तरं प्रबलं पूर्व्वपूर्व्वं प्रतीति प्रत्येतव्यम्। साधु-

कुटुम्बिना भेतव्यम् ॥ ८८ ॥

गन्तव्यञ्च सदा राजकुलम् ॥ ८९ ॥

विप्र-नृप-परिव्राड्-महाजन-तत्त्वदर्शिनोऽपि मान्या अरिक्त-पाणिना सेव्याश्चेति। पूर्वं सामान्यत उक्ता अकारेण एतौ विशेषयति। अथ दैवं ननु भागधेयम्। देव एव दैवः। देवतावत् स्वार्थिकः प्रत्ययः ननु देवादागतं दैवमिति, तस्या-दृष्टार्थबोधकत्वात् ॥ ८७ ॥

परिवारयुक्तस्य भयमाह कुटुम्बिनेति। बहुकुटुम्बेन पुंसा। भेतव्यम्। स तेभ्यः कुटुम्बेभ्यः भीतः स्यात्। यतः सर्वेषां कुटुम्बानां मनःप्रसादकरणं जगति दुर्लभम्। कः कदा केन क्रुद्धो भवति तद्ज्ञातुं न शक्यते। अतस्तेभ्यः भेतव्यम्। 'कुटुम्बं पोष्यवर्गे च' इत्यमरमाला। 'कुटुम्बिनो भेतव्य'मिति क्वचिदर्थः पाठोऽप्यस्ति, तदा तु हेत्वर्थे पञ्चमी बोध्या। यद्वा 'भीत्रार्थानां भयहेतुः' इत्यादिना पञ्चमी। अन्यद्वयमुक्तं विद्यार्थिविषये 'षड्-विध गणाद्बालो मिष्टापात्र विषादिव' इति। यद्वाह 'कुटुम्ब-व्यापृतेन तत्पोषणे समर्जनीय वाधम'। तस्यार्थं साधु मन्ये। 'कुटुम्बा परिवाराय स्वजना बान्धवास्तथा' इति ॥ ८८ ॥

कार्यसिद्ध्यर्थं सकल-समये राजसंसदि गमनाधिक्यमाह गन्तव्यमिति। राजकुलम्। राज्ञा महाभुजा कुलसमयोध-स्तत्परिषदः। ननु गोत्रम्। सदा आकार्यसिद्धे सर्वस्मिन् गन्तव्यम्। यद्वा राज्ञाममात्यादीनां सन्निधानम्। तथाहि

जनपदार्थं ग्रामस्त्यज्यते ॥ ८३ ॥

विशेषतोऽशान्तस्य क्रुद्धस्य राज्ञो दर्शनं न समुचितम्। 'न चक्षुषापि राजधनं निरीक्षेत्' इत्येवं पाठे तु राज-धनस्य चौर्य-हरणादेः का कथा तत्सम्बन्ध्या चक्षुषापि नावलोकयेदिति। तद्-दर्शने राजपुरुषाणां शङ्का भविष्यते। नियमपूर्वकं नृपदर्शनं प्रीतिकरं हितप्रदञ्च। 'ईक्षणं चक्षुरक्षिणी' इत्यमरः। चक्ष धातोः चष्टे, चक्षतेऽनेन वा चक्षिङ्धातोः 'चक्षेः शिच्च' इत्यौणादिकमुसिः। शित्वादसार्वधातुकत्वाच्चक्षिङः स्थाने ख्याञ् न भवति। इह दर्शनालोचनयोः, निरुपसर्गादीक्षतेरात्मनेपदम् ॥ ८२ ॥

जनपदमाश्रित्य ग्रामत्यागोपदेशमाह जनेति। जनपदो नाम जनैरुषितो वाणिज्य-शिल्पादि सम्पन्नो देशः। तदभावे ग्रामोऽल्प-जननिवासस्थानम्। समग्रबलपौरुष-सुखापणादि-भूषितम्। त्यज्यते परित्यज्यते। येनाल्पलाभो तदर्थं त्वल्पस्य त्यागो हि साम्प्रतम्। तदुक्तम्—

"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्" ॥

इति वृद्धचाणक्ये। ग्रामलक्षणन्तु—

"तथा शूद्रजन-प्राया सुसमृद्धकृषीवला।
क्षेत्रोपभोग्यभूमध्ये वसतिः ग्रामसंज्ञिका" ॥

इति मार्कण्डेयपुराणे। 'भवेज्जनपदो जानपदोऽपि जनदेशयोः' *निगमः। जनः पद्यते यत्र सः। 'ग्रामः स्वरे संवसथे

पुत्रा विद्यानां पारं गमयितव्याः ॥ १०० ॥

एवं कुर्वन्ति । जननकालीन-ग्रह-नक्षत्रादि-संस्थान-वैकल्यात् कोऽपि तादृगनुकरणं न करोतीति । येतु पुत्रा विद्या-विनय-धर्मसम्पन्नास्तेऽनुकुर्वन्त्येव । सर्वकर्मसु पित्रादीननुसृत्य समनुगच्छन्ति । अन्ये यथा. पुत्रा अविनीताः पितरं नानुयान्ति । एतच्च धर्मशास्त्रकृता—

"येनास्य पितरो याता येन याता पितामहाः ।

तेन यायात् सतां मार्गः ·· "।

अन्यत्रोक्तम्—

"सुतः पितृगुणं धत्ते धत्ते मातृगुणं सुता" ।

अत्र सांख्याचार्याः—'पितृतः स्नायुस्थि मज्जानः, मातृतो मांस-लोहित-लोमानि पुत्रे संक्रामन्ति' । अन्यत्र च 'कारणगुणा हि कार्यगुणानारभन्ते' इति पितृगुणा पुत्रे संगच्छन्ति । 'मातो-मातुश्च तुल्ययोः' इति विश्व । पा रक्षणे. पाति । 'अनु सेवायाम्' इत्यौणादिकसूत्रात् साधु ॥ ९९ ॥

तनयानां विद्यापदवीं प्रापयितव्याः पुत्रा इति । विद्यानाम् सर्वशास्त्राणां [illegible] पारं [illegible] विनयसमुद्र-पारगामिनो गमयितव्याः प्रापयितव्याः । तत्र न्यायवैशेषिक-पातञ्जल-सांख्यमीमांसा [illegible] विद्या च [illegible] इति दर्शन-दर्पणकारौ । [illegible] विद्या इति [illegible]

नानपत्यस्य स्वर्गः ॥ १०४ ॥

या प्रसूते भार्य्या ॥ १०५ ॥

अधमोऽश्रद्धया कुर्य्यादकर्त्ताश्चरितं पितुः" ॥

"पात्रे त्यागी गुणे रागी भोगी परिजनैः सह ।

शास्त्रे बोद्धा रणे योद्धा पुरुषः पञ्चलक्षणः" ॥

पुरि स्थूलशरीरे शेते यः स पुरुषः । पुर अग्रगमने, पुरति । 'पुरः कुषन्' इति कुषन् ॥ १०३ ॥

अपत्यहीनस्य स्वर्गलाभे प्रतिबन्धकमाह नेति । अपत्यं पुत्र-कन्ये स्तः । नास्ति अपत्यं यस्य सोऽनपत्यः तस्यानपत्यस्य पुंसः । अत्र यथासंख्य सम्बन्धः । तस्य सन्ततिरहितस्य जनस्य स्वर्गावासिर्न भवति । न पतति वंशो येन जातेन तदपत्यम् । श्रुतावुक्तम् 'अनपत्यस्य गतिर्नास्ति पतितस्य तथैव च' इति । 'अपत्यं तोकं तयोः समे' इत्यमरः । तयोः सूनुकन्ययोः । पत्-ऌ गतौ, पतति । बाहुलकाद् य । अघ्न्यादिर्वा । सत्पुत्र-जनन-प्रशंसामाह पुराणे

"भार्य्यामूलाश्च पुत्राश्च भार्य्यामूला गृहास्तथा ।

भार्य्यामूलं सुखं प्रभवेत् गृहस्थानां गृहे सदा" ॥

इति ॥ १०४ ॥

भार्य्याया विशिष्टत्वमाह येति । या नारी एवं तनयं प्रसूते सूयते वा सा भार्य्या पाणिगृहीतीत्यर्थः । तदुक्तं धर्म्मशास्त्रकृद्भिः —

तीर्थं समवाये पुत्रवतीमनुगच्छेत् ॥१०६॥

"न भार्य्यया विना पुत्रो न पुत्रेण विनान्वयः" ।

अन्वयोऽत्र वंशः ।

अन्यच्च नीतौ—

"भार्य्यामूलं सदापत्यं भार्य्यामूलञ्च मङ्गलम् ।
भार्य्यामूलश्च संसारो भार्य्यामूला च सद्गतिः" ॥

'भार्य्या जायाथ' इत्यमरः । पाणिः गृहीतोऽस्याः 'पाणिगृहीती भार्य्यायाम्' इति वार्त्तिकम् । डुभृञ् धारणपोषणयोः, भृ भरणादौ वा । भ्रियते भूर्य्यते च तयोर्ण्यत् । अन्यदर्थशास्त्रेऽस्ति ॥१०५॥

तीर्थसमूहे सनयवतीं पश्चात्कृत्य पुंसो गमनमाह तीर्थेति । तीर्थानां तैर्थिकानां ज्ञानिनां समवाये सम्मेलने पुत्रवतीमपत्यवतीं स्त्रियम् अनुपश्चात्कृत्य गच्छेत् । यद्वा तीर्थानां धर्म्म-सभा-महोत्सवानां समूहे । अथवा तीर्थानां काशी-प्रयागादीनां निकटे पर्वादौ तामनु पत्यादिः गच्छेत्, शुद्धाम्नायारिणीनां सुतवतीनान्तु पत्या पित्रा सुतेन च वा सह धर्म्मसेवे, महोत्सवे, श्मशाने, मारीभये, महाविप्लवे, नगर-ग्रामदाहे, संग्रामे च गमनं निर्बाधम् । तेषु स्पर्शादिदोषोऽपि नास्ति । तथा च स्मार्त्तैर्बृहस्पतिः

"तीर्थं विवाहे यात्रायां संग्रामे देशविप्लवे ।
नगर ग्रामदाहादौ स्पृष्टास्पृष्टिर्न दुष्यति" ॥

सतीर्थाभिगमनाद् ब्रह्मचर्यं नश्यति ॥ [illegible] ॥

अपरस्मृतौ—

"दाने विवाहे यज्ञे च संग्रामे देशविप्लवे ।
आपद्यपि हि कष्टायां सद्यः शौचं विधीयते" ॥

"दीर्घकाले शिलापृष्ठे नौकायां गजवाजिनि ।
सभायां सङ्ग्रामायां स्पर्शदोषो न विद्यते" ।

इति स्मृतिः । 'नौकायां रथ-वाहने' इति पाठान्तरमप्यस्ति । 'यानादेरुपलक्षणत्व'मिति सामवस्मृतिव्याख्याने कृष्णभट्टः । अन्यच्च स्मृतौ

"देवयात्रा विवाहेषु यज्ञप्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते" ॥

"ग्रहे सम्पर्के आचारे प्रवाहे च नदीकम् ।
नद्यां तीर्थयात्रायां पथि शूद्रदानाचेत्" । इति च ।

[illegible]

[illegible]

नास्ति देहिनां सुखदुःखाभावः ॥ ४ ॥

वाक्यं न शृणोति । नाकर्णयति । एवं बुद्धेर्विपरीत्येऽपि हित-जनकं सद्वाक्यं न शृणोति । उक्तञ्च—

"दीपनिर्वाण-गन्धञ्च सुहृद्वाक्यमरुन्धतीम् ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति प्रमत्तकाः" ॥

अत्र 'प्रमत्तकाः' इत्यत्र 'गतायुषः' इति पाठान्तरमस्ति । यच्च 'विनाशकाले विपरीत-बुद्धिः' । अपरञ्च—

"प्रायः समासन्न विपत्तिकाले
धियोऽपि पुंसां मलिना भवन्ति" ।

पथोऽनपेतं पथ्यम् । 'धर्मपथ्यर्थन्यायादनपेते' इत्यनेन यत् । 'पथ्या स्त्री हरितक्याञ्च पथ्यं हिते त्रिषु' इति मेदिनी वाक्यम् । उच्यते इति वच् धातोर्ण्यत् । 'चजोः' इति सूत्रेण कुः । 'वचोऽशब्दसंज्ञायां' इति वचेः कुत्वनिषेधात् वाच्यमिति । शब्दसंज्ञायान्तु कुप्रत्ययाद् वाक्यम् ॥ ३ ॥

शरीरभाजां मनुजादीनां सुखदुःखयोरवश्यम्भावित्वमाह नेति । देहिनां शरीरधारिणां जीवानामिति । सुखमनुकूल-वेदनीयम् । दुःखं प्रतिकूलवेदनीयम् । एतयोरभावः कदापि नास्ति । काले कस्मिन् सुखं कस्मिन् वा दुःखमस्त्येव । देहस्य तयोः स्वाभाव्यात् । कविसमयश्च—

"अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते" ॥ इति ।

उपकारोऽनार्य्येष्वकर्त्तव्यः ॥ ७ ॥
प्रत्युपकारभयादनार्यः शत्रुर्भवति ॥ ८ ॥

अनार्य्याणां हीनजनानामुपकारकरण-निषेधमाह उपेति । अनार्य्येषु शबरकिरातपुलिन्देषु । यद्वा नीच-पामर-लम्पट-चौरेषु । उपकारो हिताचरणमिति । अकर्त्तव्योऽविधेयः । यतस्ते तु क्रूराः मूढाः स्वभावतो द्वेष्टारश्चेति । तेषां हितानुष्ठाने विपद्गतेष्वपि मार्गयास्तां प्रत्युपकारकरणम्, परमहिताचरणं करिष्यन्त्येव । अतस्तेषूपेक्षामाचरेत् । ननु मैत्री-करुणा-मुदिता । अनार्य्याः—

"भेदाः किरात शबर-पुलिन्दा म्लेच्छजातयः" ।

इत्यमरकोशः । अन्ये तु 'कुमारिका खण्डवहिर्देशजाः सर्वस्व-स्वाविरहिता अनार्य्याः' इत्याहुः । अन्यत्पूर्ववदुक्तम् । परस्परो-पकार्य्योपकारित्वं विना सामाजिकोन्नति कार्य्यमसिद्धिः स्यात् । अह यतो भवति । अस्तु योग्यो वा । 'आत्मनोऽर्थम्' इत्यादिना सिद्धम् । कार्य्यविकर्त्ताऽनार्य्य । कुत्रचित् 'उपकारो नास्तिकानादरेषु कर्त्तव्य' इत्यपि पाठान्तरमस्ति । तदा तु कार्य्यावस्थाविशेषे दयया तदुपकारः कर्त्तव्यो नापि सर्व्वदा इत्यर्थः ॥ ७ ॥

अनिष्टफलमाश्रित्य प्रत्युपकारभयजन्यानर्थो भवेत् करोति इत्यत आह प्रत्येति । उपकर्त्तारं विपद्गतार्थः प्रत्युपकारं प्रति-सहायकत्वमिति यावत् । तदुदाने प्रत्युपकारकरणमला-

न कदापि देवता अवमन्तव्या ॥ १० ॥

न चक्षुः सर्वं ज्योतिरस्ति ॥ ११ ॥

चतुर्विधः। धनदानेन, परित्यागेन, प्रियवाक्येन, इष्टचिन्तया चेति ॥ ८ ॥

देवानां गुरूणाञ्चापमाननकरणनिषेधमाह नेति। कदापि कस्मिंश्चित्काले देवता देवा अमराः। तादृशा लोकाश्च। न नावमन्तव्याः। अत्र देवता इत्युपलक्षणम्। अन्ये तत्तुल्या श्रेष्ठा तादृशानि कार्याणि च सेव्यानि। कदापि गुरवोऽपि न नावमन्तव्याः प्रमादादज्ञानाद्वा गुरूपदेशश्च न लङ्घितव्यः। देवतादृश-लोक-तत्कार्याणामवमाननं कदापि न कार्यमिति भावः। तत्करणे स्वस्य परस्य च हानिः स्यात्। तथा च 'न च देवात् परं बलम्' इति। 'न कदापि देवतान्यवमन्तव्यानि' इति पाठे तु देवाः सर्वे गुरुजनाश्च। एतेषां ये चादेशाः यानि च कार्याणि तानि नावज्ञातव्यानीति। तदाज्ञैव सुधियां सदाचरणीयानि स्यात्। देवगर्हणे स्वस्य नाशः ॥ १० ॥

[illegible] नेति। चक्षुर्मयं [illegible] च [illegible] तत्त्वं [illegible] यदु [illegible] तु [illegible] च [illegible] [illegible] [illegible] इति

न नग्नः प्रविशेज्जलम् ॥ १५ ॥

सम्प्रति विषयान्तरमवतारयन् सलिले मूत्रत्यागपरिहारमाह नेति। अप्सु सलिलेषु। स्वभावतः स्वच्छे वारिणि मूत्रं प्रस्रावः उपस्थ-निर्गतवारि। न कुर्य्यात्त्यजेदित्यर्थः। तदुक्तं धर्म्म-शास्त्रकृता मनुना—

"न मूत्रं पथि कुर्व्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां नच पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन"। इत्यादि।

देहनिर्गतदुष्टपदार्थत्वेन च जलं दुष्टं विषाक्तं भवति। तत्पाने रोगोत्पत्तिः स्वास्थ्यनाशश्च। एवं राजमार्गे देवालये गोगृहे परिषदि वासगृहे श्मशाने तीर्थे विचार-विद्यागारे मूत्रं न त्यजेत्। नच तद्वेगधारणं कुर्य्यात्। तद्वेगधारणे रोगसम्भावना प्रबला। दण्डायमानस्य वारिपाने मूत्रत्यागे च मुष्कस्थौल्यरोगो भवति। गोमूत्रस्य निक्षेपे मूत्र-दुर्गन्धमयस्थाने तद्विषदोषं नश्यति। मूत्र प्रस्रवणे, मूत्रयते। ततो घञ्। अप्स्विति। आप्ऌ व्याप्तौ, आप्नुवन्ति आप्यन्ते वा। 'आप्नोतेर्ह्रस्वश्च' इति क्विप्। ह्रस्वत्वञ्च ॥१४॥

अपरिहिताम्बरस्य जलप्रवेशे जलजन्तुदंशनभयात्तन्निषेधमाह नेति। नग्नो विवसनो जलं वारि। न तस्मिन् विशेत् नापि निमज्जेत् अवगाहेत। तादृशजनस्य जलावमज्जने जलजीवै-राक्रमणसम्भवः सलिलस्वच्छतापि विनश्यति। एवं नग्नः सन्

यथा शरीरं तथा ज्ञानम् ॥ १६ ॥

यथा बुद्धिस्तथा विभवः ॥ १७ ॥

मार्गे गमनं भोजनं शयनमपि न कुर्यात् । 'नग्नो दिग्-क्षपणयोः पुंसि त्रिषु विवाससि' इति विश्वः । कौर्मे च –

"न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ।
नच मूत्रं पुरीषं वा न चै संस्पृष्टमैथुनम् ॥
नोच्छिष्टं संस्पृशेन्नित्यं न नग्नः स्नानमाचरेत् ।
न गच्छेत् न पठेद्वापि न चैव स्वशिरः स्पृशेत्" ॥ इति ।

चोनमर्थो मोढ़ः नग्नत्वं । धर्मसंकल्पाभाव स । 'चोदितव' इत्यनेन मतं स्यात् ॥ १५ ॥

शारीरिकशक्त्यनुसारि ज्ञानमाह यथेति । यथा यादृशं शरीरं देहस्तत्सामर्थ्यं च तादृक् । तथा ज्ञानमपि विषयेन्द्रियसंनिकर्षजन्यं यथार्थं लोकस्य भवति । शरीरपरिमाणाधिकं न वा न्यूनम् । यथा ज्ञानं वृद्धि । शरीर पुष्ट सत्येव तुल्ये ज्ञानमपि प्रसर पुष्ट भवति । [illegible] च ज्ञानस्य तथैव प्रकाशते [illegible] नाना विधम् । यथा [illegible] । [illegible] विज्ञानम् । [illegible] ज्ञानम् । [illegible]

अग्नावग्निं न निक्षिपेत् ॥ १८ ॥

लोकानां बुद्ध्यनुसारेण विभवः स्यादित्याह यथेति। बुद्धिः धीशक्तिर्मनीषेति। सा यस्य यादृशी भवति, प्रखरा मलिना वा। तस्य विभवः सम्पत्तिर्विपुलधनं लोके तादृशं भवति। मतिमान् स्वमति-प्राखर्य्यात्तद्बलेनाधिकं धनमर्जयति। मति-हीनः सञ्चितमपि वित्तं परिहरति। तदुक्तं कौटिल्यैरस्यावसाने—

'बुद्धिरेव जयत्येका पुंसः सर्व्वार्थसाधिनी।

यद्बलादेव किं किं न चक्रे चाणक्यभूसुरः' ॥ इति।

शिक्षासौशील्य-सत्सङ्गैः लोकस्य बुद्धेः प्राखर्य्यम्। तेन धन-मानादेरागमः सुकरः स्यात्। मूढस्य न तत् स्यात्। 'बुद्धि-र्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः' इत्यमरः। बुधिर् बोधने, बुध्यते अनया इत्यतः क्तिन्। विपूर्व्वाद् भवते रचा विभव इति ॥ १७ ॥

प्रज्वलिताग्नौ पुनरग्निनिक्षेपस्य निषेधमाह अग्नाविति। अग्नौ वह्नौ वैश्वानरे च। प्रज्वलिते पुनरग्निनिक्षेपणं वृथा भवति। तद्द्विगुणः सन् स्वस्यान्यस्य च दाहं करिष्यतीति। यद्वा जले जलप्रक्षेपवत्तस्य वैयर्थ्यञ्च। अथवा पानोन्मत्तस्य रागा-न्धस्य च पानमाहार्य्यं क्रोधवर्द्धनञ्च यथा नोचितन्तथा पुनरग्ना-वग्निक्षेपो नोचित इति। 'अग्निर्वैश्वानरो वह्निः' इत्यमरः। अग्निः। अगि गतौ, अङ्गति। ततोऽङ्गेर्नलोपश्च। इत्यौणा-दिकान्निर्नलोपश्चेति। क्रुद्धस्य क्रोधशान्तये, सुरासक्तस्य च तन्निवृत्त्यै सदा यतितव्यं न तद्वर्द्धनाय। तदुक्तम्—

अन्नदानं भ्रूणहत्यामपि मार्ष्टि ॥ २१ ॥

लोकानां पूजनीयाः अर्हणीयाः भक्तिभाजना इति यावत्। न तु वेशमात्रधारिणः केवलं गैरिक-काषायाम्बरधारिणः। यथार्थं साधवः कल्याणाय तपसः षड्भागं लोकेभ्यो वितरन्ति। तेषां तपश्चरणेन आशिषा च सामाजिका निरापदो भवन्ति। अतः सन्न्यासिनो महनीयाः। यत्र तपश्चरन्ति तत्र तपो माहात्म्यात् भुजग नकुलयोर्विरोधाभावः। देशश्च लोभरहितः आधिव्याधिहीनः शान्तिपूर्णः स्यात्। तदुक्तं मार्कण्डेयपुराणे—

"प्रशान्त-श्वापदाकीर्णं मुनि-शिष्योपशोभितम्"।

मुनिवर्यस्य मेधसस्तपोवनमीदृगमासीदित्यर्थः। तपस्वि-भिक्षु-दरिद्र प्रभृतीनां दर्शनेन पुण्यं प्रजायते। बुद्धिरपि तादृशी भवेदिति। 'तपस्वी तापसे चानुकम्प्ये' इति मेदिनी। तपः कृच्छ्र-चान्द्रायणादीनि कर्माणि। तदस्यास्तीति 'तपः सहस्राभ्यां' इति विनिः ॥ २० ॥

अन्नदानमाहात्म्यमाह अन्नदानमिति। अन्नानां क्षुधितसंता-दनीयद्रव्याणां दानमभ्यर्थे विधार्पणम्। देवविप्र ब्रह्मचारि-विद्यार्थिसाधु दीनान्धातुर-पङ्गु निःसहायेभ्यो निजधनस्य प्राप्त्या समर्पणम्। तथा च श्रुतिः 'दानेन द्विषन्तो मित्रा भवन्ति'।

"अन्नेन धार्यते सर्वं जगदेतच्चराचरम्।
अन्नदानात् परं दानं न भूतं न भविष्यति"॥

नानृतात् परं पापम् ॥ २८ ॥

यद्बृहस्पतेर्देवगुरोर्दृष्टिः हर्षेरथं तत प्रजा। ज्योतिषे च—

"ग्रहाणामुदये चास्ते तथा वक्रातिचारयोः ।
प्रायो वर्षन्ति जलदा नृपाणामुद्यमेऽपि च" ॥

"चारिपूर्णां सर्वी कृत्वा पश्चात् सङ्क्रमते गुरुः" ।

इति च तत्रैवास्ति ।

"देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये" ।

इति विश्वः । दीव्यतीति देवाः । पचादिषु पाठादच् ॥२८॥

अनृतस्य पापजनकत्वमाह नेति । अनृतं न ऋतमनृतम् । अनृतं मिथ्येति । अनृतादसत्यात् परं प्रधानं पापं दुरितं नास्ति । यश्चानृतमाचरति स सर्वं पापं कर्तुं शक्नोति । असत्याचरणशीलोऽपि पापं क्रमशः सम्भावयिष्यति । "अनृतं कृषिः । सितस्त्वनृतं वधः" इत्यमरः । नातिविषयविशेषेषु सर्वं सत्यानृतमिथुनीभूतम् । तत्र विवेकसम्पन्नेन पुंसा क्षीरनीरयोर्हंस इव सत्यमादाय कार्यं सम्पादनीयमिति । विशेषस्तु भारते कर्णपर्वणि—

"विवाहकाले रतिसम्प्रयोगे
प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत
पञ्चानृतान्याहुरपातकानि"

लोकयात्रा दरिद्रान् बाधते ॥३३॥
अतिशूरो दानशूरः ॥३४॥

'कलह-विग्रहौ' इत्यमरः । 'कलन्तु मधुरध्वनौ' इति धरणिः। कलस्य हननम् । अन्येभ्योऽपि इति वार्त्तिकात् हन्तेर्डः ॥३२॥

निःस्वस्य लोकसमागमः पीड़ादायकस्तमाह लोकेति । लोक-यात्रा लोकानां समागमः । स्वगृहे अभीष्टजनागमः । यद्वा उत्सवः बहुसम्मेलनम् । दरिद्रान् निर्द्धनान् लोकान् सा बाधते। निरन्तरं धनाभावात् क्लिश्नाति । दरिद्रास्तु समागतलोकानां स्थानदानपानभोजनादिभिः परितोषजनने असमर्था भवन्ति। अतस्ते दुःखिताः क्लिश्यन्ति । 'यात्रा तु यापनेऽपि स्यात् गम-नोत्सवयोः स्त्रियाम्' इति मेदिनी । धनवन्तस्तु लोकयात्रा-न्त्योत्सवैरानन्दमधियन्ति । उक्तञ्च वृद्धैः—

> 'लोकयात्रा विवाहश्च उत्सवो बान्धवागमः ।
> गीतं नृत्यं देवसेवा धनिकानाञ्च शोभनम्' ॥

या प्रापणे, यानम् । 'हु या मायभसिभ्यस्त्रन्' इति याति त्रन्। स्त्रियामाप् । दरिद्रा दुर्गता, दरिद्राति । ततः पचाद्यच् ॥३३॥

धनदातुर्वीरश्रेष्ठत्वमाह अतीति । दान-शूरः । शूरो दाने सद्देशे स्वधनस्य सम्यगर्पणे । यद्वा धर्म्मार्थं स्व-स्वत्वध्वंसपूर्वक-परस्वत्वापादानकर्म्मणि । तत्र शूरो वीरः वदान्यः । अतिशूरो-ऽधिकश्रेष्ठः, वीरो दैहिकबलात् शौर्य्यमात्रं प्रकटयति । दानशूरस्य

आचाराद् आयुर्वर्द्धते कीर्त्तिश्च ॥ ९८ ॥

प्रियमप्यहितं न वक्तव्यम् ॥ ९९ ॥

सदाचरणस्य फलमाह आचारादिति। आयुर्जीवितकालः। कीर्त्तिर्यशो गुणप्रवाद इति। इमावुभौ आचारात् सदाचरणात् वर्द्धेते इति। 'आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः' इति धर्मशास्त्रकाराः। [illegible] [illegible], [illegible] [illegible], ततो ह्यायुषो वर्द्धनम्। आचारः कुत्रचिद् व्यवहारः। यथा च इत्यत्र 'आचारे' [illegible] प्रयुक्तम्। सदाचरणं त्रिविधम्। [illegible]। कौलिकम्। [illegible]। [illegible]। [illegible] इति। [illegible] [illegible]। [illegible] [illegible]। [illegible] इत्यादिना [illegible] निपातितम्। ९८।

[illegible] [illegible]

न कृतार्थेषु नीचेषु सम्बन्धः ॥४३॥

ऋणाग्नि-शत्रु-व्याधिष्वशेषः ॥४४॥

उपसंयोगे काले सुप्तोऽपि कर्णो भवति तद्वत् तत्सम्बन्धय। भज
ष्विड् सेवायाम्। भज्यते। ततः कर्मणि घञा निष्पन्नाद्भाग-
शब्दात् 'भागरूपनामभ्योधेय' इति वार्त्तिकाद्धेयप्रत्ययः ॥४१॥

सम्पादितार्थेषु हीनजनेषु सम्बन्धो न विधेयस्तमाह नेति।
कृतार्थेषु नीचजनेषु शठेषु च। कार्यार्थसम्बन्धो नोचितः। तेषु
पामरेषु कार्यार्थसम्बन्धे कृते कार्यहानिः स्वयमपि विपदः
स्यादिति रहस्यम्। तदुक्तं भारविभिः—

'प्रकुर्वत् भूतिमनार्यसङ्गमा—
द्वरं विरोधोऽपि समं महात्मभिः'।

प्रसङ्गादन्यत्र तु प्राप्यम्। अपरञ्च—

त्यज दुर्जनसंसर्गं भज साधुसमागमम्'।

इति सामान्यनाम। नाथ क्रूरो दुर्जनश्च शठोऽनार्यस्तु पामरः'
इति कोषः। उक्त व्याख्यानमन्यत ॥४२॥

ऋणादीनां परिशेषरक्षणे पुनर्वर्धनशङ्कया तद्विशेषमाह
ऋणेति। ऋणमुत्तमर्णाद् गृहीतद्रव्यम्। यद्वा यथाकृत्याध-
लेनाङ्गीकृत्य गृहीतं द्रव्यमृणम्। तत दत्ता धनमर्णः।
गृहीता चाधमर्णः। अग्निरनलः। शत्रवोऽरि रिपुरिति। व्याधि
पीडा रोग इति। यद्वा व्याधिः धातुवैषम्यजन्य

सुदुष्करं कर्म्म कारयित्वा कर्त्तारं नावमन्येत ॥ ४६ ॥

न कृतघ्नस्य नरकान्निवर्त्तनम् ॥ ४७ ॥

इति वार्त्तिकादिनिः । यद्वा अर्थ याचने, अर्थयते । गर्ह्यादित्वात् णिनि. ॥ ४५ ॥

दुष्करकर्म्मानुष्ठानात् परं तत्कर्त्तुरवमाननं नोचितमित्याह सुदुष्करमिति । सुदुष्करमतिकठिनं दुःसाध्यमिति । यत् कर्म्म तत्कारयित्वा सम्पादयित्वाऽभिनिष्पाद्य च । वैकल्यद्वये कार्य्ये तत्कर्त्तारं कार्य्यानुष्ठातारं नावमन्येत । तं नावजानीयात् । 'दुष्करं कर्म्म कारयित्वा कर्त्तारमवमन्यते नीच' इत्येवं पाठान्तरत्वे नीचोजनः दुष्करं कर्म्मकारयित्वा तत्कर्त्तारं अवजानातीत्यर्थः । यदि कर्म्मकर्त्तुर्दोषो वर्त्तते तदा तस्य गर्हणं युक्तमिति । कर्म्मणो दुष्करत्वे तत्फलस्यालाभे तत् कर्त्तुर्न दोष इति प्राज्ञानामभिमतम् । अज्ञानान्तु तद्विपरीतम् । कारणगतदोषात् कार्य्यहानिरिति समाधिः । असम्पन्ने कर्म्मणि निष्फले वा तत्कर्म पुनरनुष्ठेयम् ॥ ४६ ॥

कृतघ्नस्य तत्कार्य्ये फलं नरकमाह नेति । कृतघ्नस्याकृतज्ञस्य । कृतमुपकारं हन्तीति तस्य । नरकाच्चिरयात् परमदुर्गतेः । न निवर्त्तनं नापि तस्मादव्याहतिः परन्तत्रैव पापाधिक्याच्चिरनिवासः । तदुक्तं विष्णुना—

जिह्वायत्तौ वृद्धि-विनाशौ ॥ ४८ ॥

'ब्रह्मघ्ने च सुरापे च चौरे भग्नव्रते शठे।
निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः' ॥
इति पूर्वमुक्तमन्यत् सर्वम्।

कृतघ्नस्तूपकारमनुभूयापि प्रत्युपकारमकृत्वा तत्कर्तुरनिष्टाचरणं कुर्वन्नधिकं पापिष्ठः। 'नरकः पुंसि निरयो देवाराति प्रभेदयोः' इति विश्वः [illegible] नृ नये, नरति नृणाति वा। 'कृञा-दिभ्यः संज्ञायां वुन्' इत्यौणादिकात्। यद्वा नराः कायन्त्यत्रेति 'मूलविभुजादित्वा'दिति वार्त्तिकात् को न भवति, 'कर्त्तरि कृत्' इति बाधनादधिकरणे तदाशिंकोऽत्र विपर्यासवृत्तिः। ॥ ४७ ॥

कार्य्यस्याकार्य्यस्य चोभयोरप्यनाधीनत्वमाह जिह्वेति। जिह्वाया रसनेन्द्रियस्यायत्तौ अनुगतौ। वृद्धिर्वर्द्धनमाधिक्यम्। विनाशः समुच्छेदो [illegible] वा। कार्यस्य [illegible] जिह्वाधीनौ स्याताम्। [illegible] तु कार्यमाकार्य [illegible] मित्यता [illegible] तदुक्तं [illegible] कनापि। अथ [illegible] यथा [illegible] 'वाक् पारुष्यात् [illegible] जिह्वा [illegible] विनाशस्य। अर्थ धनादेर्वृ [illegible] एवं जिह्वाधीनत्वमन्यासामिन्द्रियाणामपि [illegible] चिन्तनीयं। जिह्वेति।

स्तुता देवा अपि चिरन्तुष्यन्ति ॥५१॥

अनृतादपि दुर्व्वचश्चिरन्तिष्ठति ॥५२॥

[illegible]वाक्य-कथन-शीलस्य जगति कोऽपि शत्रुरतिर्न भवतीत्यर्थः। [illegible]ञ्च कश्चिभिः, 'हितं मनोहारि च दुर्लभं वचः'। अन्यच्च—

'मधुरतया हितता च प्रिया भवति सर्वतः।
पारुष्यवचनाच्छत्रुर्लोको भवति नियितम्' ॥

अपरञ्च—

'हितवाक्पयोमुच दातुः परोपकारिणः।
माधीशीलस्य जगति रिपुर्नैव महस्यते' ॥

[illegible]मोभ् तर्पति, प्रीणाति। 'इगुपध' इत्यादिना कः। 'प्रियोहरी-[illegible]यचे हृदये भवे' इति हैम। प्राङ्निर्दिष्टमन्यत् ॥ ५० ॥

प्रियाचरणेन देवानामपि परितोषमाह स्तुता इति। स्तवेन आरोपितगुणादिकथनेन परितुष्टा। गौरविताः। देवा अमरा इन्द्रादयः [illegible] चिरमनन्तम्। तुष्यन्ति सन्तुष्टा प्रसन्ना भवन्ति। पुनः [illegible] देवा अपि स्तवसदा[illegible] यु। अत [illegible] जगति [illegible] कापि गुणं [illegible] जगति प्रातिकार व दुर्लभ [illegible]। [illegible] 'अनुन प्रियमाप-[illegible]ते अनायाम [illegible] च। तस्मात् [illegible] ॥ ५१ ॥

असत्याद् दुर्वाक्यस्य [illegible] अनृतादिति।

न प्रवृद्धत्वं गुणहेतुः ॥६३॥

अति दीर्घोऽतिप्रवृद्धेन प्रज्वलितः खद्योतो ज्योतिरिङ्गणः । अपि प्रकाशवत्त्वात् पावकः माध्यनलो भवति गतिवैधर्म्यात् । यथा कुम्भोऽचिरविशीर्णोऽपि न जातिमान् तत्र मन्दार-महीरुहस्य कन्दोऽपि न स मारवतः शालकारायते दीप । दीप दीप्तौ दीप्यते । तत रूपत्वात् व्योम्नि आकाशे द्योत्यते । स्व दीतयतीति कर्मणाचार्यगण वा सिद्धम् पावकोऽग्नौ सदाचारे वह्निमन्त्र्ये चेति कोशकृत । पुत्र पवते पुनाति । स्वालप्रत्ययेन सिद्ध । अतिज्वलितोऽपि खद्योतो न पावकं नियुज्यते इति पाठान्तरत्वे नास्य वैधर्म्यम् । समासाद्यत्वेद सूत्रम् ॥ ६४ ॥

प्रवृद्धत्वस्य गुणहेतुत्वनिषेधमाह नेति । प्रवृद्ध प्रकृष्टरूपेण वाद्धिक्यम् । अतिमान्यत्व प्राबल्यत्वेति यावत् । न गुणहेतुः । गुणानां तत्स्यादाय ... नाम ... कारणं न भवतीत्यर्थ । पर पालितत्वेन तत्त्वस्य नेन च ... प्रवृद्धत्व जाति तदुक्तं पालिग्रन्थ

न तत्र भवतीति येन ... स्फालित ... ।
परिपक्वा ... ... सार्वत्रमिति ... ॥

[illegible] ... प्रागुक्तं तत्र स पुनरुक्तिभिया [illegible]

शास्त्रप्रधाना लोकवृत्तिः ॥७८॥

शास्त्राभावे शिष्टाचारमनुगच्छेत् ॥७९॥

नम्। तद्‌द्रव्यादि परकीयमिति निश्चितं ज्ञात्वा विदित्वा द्रव्यादिकं संगृह्य चैवादौ प्रविश्य वा दोपमपराधं करोति अतः परकीये द्रव्ये गृहादौ प्रवेशे च अनुमतिः प्रदानञ्च अपे पीयम्। प्रसह्य तन्नैव कुर्यात्। 'दायोऽपराधो विज्ञतिरन्या से'ति ॥ ७७ ॥

लोकवृत्तेः शास्त्रमूलकत्वमाह शास्त्रे ति। शास्त्' हिताय शासनम्। यद्वा शासनोपदिष्ट-प्रमादर्थ वा। अथवा शा ऋग्वेदादि। तत्प्रधानं यस्यां लोकवृत्तौ इति बहुव्रीहिः। तादृशं लोकवृत्तिः शास्त्रप्रधाना शास्त्रानुशासनमूलिका भवतीत्यर्थः। शास्त्रेषु लोकवृत्तिरुपदिष्टा। शास्त्रविध्यनुसारेण लोकाः कार्याकार्यं अवबोध्य प्रवर्त्तन्ते। याद्दच्छिक प्रवर्त्तने तु नैष्फल्यं का हानिश्च। तथा च स्मृतौ—

'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः'।

इत्यादि प्रमाणैः शास्त्रनामानि प्रागुक्तानि। नास्ति न्याय-वैद्यक ज्योतिष-वास्तु-शास्त्राणि तेषु अन्तर्नीतानि। अन्यदस्ति श्रीमधु सूदन कृतं प्रस्थानभेदे। 'लोक प्रवृत्तिरिति' पाठभेदे शास्त्रप्रवृ त्यनुसारेण लोकप्रवृत्तिर्भवतीति ॥ ७८ ॥

शास्त्रानुशासनाभावे लोकयात्रा निर्वाहोपायमाह शास्त्राभावे इति। शास्त्राणां श्रुतिस्मृतीतिहासपुराणवाक्यानाम्। यत्र

गतानुगतिको लोकः ॥ ८२ ॥

जीविभिस्तस्मिन्नाजीवेत् ॥ ८३ ॥

लोकाः प्रायशः समयपरम्परागतविषयमनुधावन्ति तदाह गतेति। यद्गतं तदनुपयाद्गतं गतिर्यस्य सः। अविवेकेनातीत-लोकपथानुवर्त्ती। तादृशः साधारणो लोको भवति। सन्तः परीक्ष्य विषयमेकं हित्वा अन्यतरम् उपादेयं भजन्ते, न तु सर्व्वे माहता जनाः विमृश्यकारिणः स्युः। साधारणा लोकाः प्रति-विषयं विविच्य न किमपि कुर्वन्तीति भावः। लौकायतिका अपि तथैवाचरन्ति। नापि सर्वेषां वस्तुविवेकबुद्धिर्वर्त्तते। ते लोकदृष्टान्तानुसारेण सर्वं सम्पादयन्ति। अतस्ते लोकप्रवाह-मध्ये धावन्ति विपर्य्येष्विति। तथाच महाकवि भारविनोक्तम्—

"कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति लोकपङ्क्तिः"।

'लोकस्तु भुवने जने' इति। नापि सर्व्वं पुरातनमेव ग्राह्यं वर्त्तमानमपि हितकरमुपादेयम्। तदुक्तं कविप्रवरेण—

"पुराणमित्येव न साधु सर्वम्
न चापि काव्यं नवमित्यवद्यम्"। इति।

पूर्वसूत्रमन्यत्। ८२।

जीवानां गतानुगतिक रीत्या जीवन-निर्व्वाहः स्यात्तदाह जीवेति। जीविभिर्मानवैः प्राणिभिर्वा। यस्मिन् गतानुगति-करोतिमनुसृत्य तादृशमुपायमाश्रित्य च। आजीविकोपयात्रा

यमनुजीवेत्तं नापवदेत् ॥ ८४ ॥

सम्पादयेत् । [illegible] लोका [illegible] यस्तु विषार्था· [illegible] प्राप्तानागतनियमा· [illegible] निवारयन्ति । महात्मना· [illegible] महात्मनो [illegible]

[illegible] पितामहः ।

[illegible]

[illegible] समनुसरेत् । [illegible] समाधि [illegible] समाचरन्तु· [illegible]

[illegible] । यम् [illegible] विनाय [illegible] चौको [illegible] दक्षपि [illegible] भेति । [illegible] वस्तुर्भ [illegible] आदिभिरु· [illegible] । प्रवि

तपः सार इन्द्रियनिग्रहः ॥ ८५ ॥

दुर्लभः स्त्रीबन्धनान्मोक्षः ॥ ८६ ॥

योग-ध्यान-तपसां मध्ये श्रेष्ठमाह तप इति । इन्द्रियाणां चक्षुरादीनां ज्ञानकर्मेन्द्रियाणामुभयेषां निग्रहो निरोधः संयमः, विषयतो निवृत्तिरिति यावत् । स च तपः सारः तपसश्रेष्ठः, प्रधानम् । येषामिन्द्रियनिग्रहो नास्ति ते नैव तपस्विनो भवन्ति । निगृहीतेन्द्रिया एव तपसः सारं लभन्ते [illegible] । तथा च श्रुतिः 'ध्यानमपश्चरन्नतपस्वीति' इति । तपः कृच्छ्रचान्द्रायणादि । तच्च यमाद्यष्टाङ्गयोगेषु नियमान्तर्गतम् । 'तपसा कल्मषं हन्ति' इति श्रुतिः । 'तपांसि कायसंतापेऽपि च । चान्द्रायणादौ' इति मेदिनी । [illegible]—

"[illegible] प्रभवन्ति [illegible],

[illegible] निगृह्णताम् ।

[illegible]

[illegible] ॥"

[illegible]

[illegible]

स्त्रीणां हि मनः चलितमिवान्यत्र तिष्ठति ॥८९॥
स्वप्नमध्ये दिवः स्त्रीषु न प्रमत्तः ॥९०॥

र्थिनः पुंसाम् । तत्र पुरुषैरेव विचारात् प्राक् स्त्रीणां सम्यक् परीक्ष्य विधेयम् । तदाह शास्त्रेण दोषः । परीक्षणी काले न पुंसैव व्यवहारात् स्यात् । स्मृतिषु वेदवाक्येष्व तथा विचारात् प्राक् परीक्षणीया । तस्मात् स्त्रीषु जहा यथा-र्थिना, विशेषेण दानतया स्वस्था पुंसामपि सम्प्र-दायतां इति केवल मोदिनिदं । सम्यक् परीक्ष्य दिव्यक्रिया । सा च शास्त्रदिव्यक्षयति स्त्रीषु सर्वथा धर्मशास्त्रनियमे दिव्यमान-सम्बोधिता ॥ ८८ ॥

कार्येषु स्वाभाविक स्वाभाव्येऽप्यस्माकं स्त्रीणामिति । स्त्रीणां स्वभावदर्शनात् । तत्र चित्त नैसर्गिकस्वाभाव्यादधिकमस्थिरं चञ्चलमिति यावत् । तत्र तस्मिन् विषये दर्शनार्थं स्यात् इति । तत्र तस्य विषये तस्मिन् स्थैर्यं सर्वं प्रवर्तते । यद्यपि स्वभावेन स्त्रीणां चापल्यमस्ति । तथापि स्त्रीणां धारणात् कोऽपि स्वभावाधिक्यमाह तथापि सम्यगभ्यासात् । अत एव संयमादभ्यासात् । तस्मात् यत्नेन पुरुषाणां तासां स्वाभाविकचञ्चलताया अपत्यात्पादनमात्र एव हानिर्भवति । पूर्व-सूक्ष्मपरम् । सम्यगस्ति तद्वाच्यता ॥ ८९ ॥

स्वप्नमध्ये स्त्रीषु नावाप प्रमादनिषेधमाह स्वप्नेति ।

यज्ञफलज्ञारिवेदविदः ॥८१॥

पञ्चमस्यामङ्गलस्योपद्रवस्येति यावत् । द्वेषिणः द्वेष्टारः दोषप्रदर्शारः । शुभाकाङ्क्षिणो लोकाः । ते स्त्रीषु नारीषु । न प्रसक्ताः न सम्यगासक्ताः मातुरता भवन्तीति शेषः । 'पञ्चमवेगाः स्त्री न प्रगमन्ताः' इत्येवं पाठान्तरमपि दृश्यते । पञ्चमवेगा मलिनवेगाः पुरुषा रुग्णा भग्नस्वास्थ्या वा नारीषु न श्रेष्ठा भवन्तीत्यर्थः । ये तु शुभागयास्ते स्त्रीषु निरन्तरं समासक्ता न स्युः । तेन स्वास्थ्यमत्यायुः यशसो बुद्धेश्च प्राखर्य्यं वर्द्धते । स्त्रीषु अत्यासक्ताः दुर्बलाः क्षीणाः पीड़िताः प्रायः स्मृतिहीनाश्च भवन्ति । ये मध्यमासक्तास्ते शक्तिमन्तः । अनासक्तास्तु श्रीजास्विनो भवन्ति । अन्यद्देयर्के कामसूत्रादौ च विषयेऽस्मिन् वर्त्तते ॥ ८० ॥

यज्ञकर्म्मविदां वेदज्ञत्वेन प्रशंसनमाह यज्ञेति । यज्ञानां अग्निष्टोमाश्वमेधवाजपेयराजसूयाणां पञ्चमहायज्ञानाञ्च यानि फलानि स्वर्गलाभ ब्रह्महत्यापनोदन-स्वाराज्यादीनि । तज्ज्ञातार ऋषयो मन्त्रद्रष्टारः । अन्ये च ऋत्विजः । त्रिवेदान् त्रयीः ऋग्यजुः सामानि । तद्विदो ज्ञातारः ते सम्यग्जानन्तीत्यर्थः । नान्ये अज्ञा लोका नास्तिका वा । अथर्ववेदस्य ऋगादिषु अन्तर्भावः । वेदानां पौर्वापर्य्यालोचनसरणौ प्रमाणाभावः । ये तु ईदृशं मन्यन्ते पुराहन्तृदृष्ट्या ननु ते तात्त्विकबुद्ध्या पौर्वापर्य्यं इच्छन्ति । तेषाम् अनिर्दिष्टकालागतत्वे नेश्वरप्रणीतत्वेना-

स्वर्गस्थानं न शाश्वतम् ॥८२॥

सौविकार्यसमर्पकत्वेन च वा पौर्वापर्ये भावः। वेदविदो हि परमिदं मानन्ति। तथा च श्रुतिः 'नावेदविन्मनुते तं बृहन्तम्'। 'तन्त्वौपनिषदं पुरुषं पृच्छामि' इति। तं परमात्मानमित्यर्थः। 'यज्ञः स्यादात्मनि मखे नारायण हुताशयोः' इति हैमः। यज देवपूजादौ, इज्यते अनेन वा। 'यजयाचम' इत्यादिना नङ्। तान् यज्ञादीन् विदन्तीति वेत्तेः 'सत्सु द्विष' इति क्विप्। पञ्चमहायज्ञाः स्मृतौ प्रसिद्धाः। 'यज्ञहुत' कात्यायनाश्वला-यनापस्तम्बश्रौतसूत्रादिषु सन्ति ॥ ८१ ॥

कर्मफलेन प्राप्त-स्वर्गलोकस्य फलभोगानन्तरं पतितत्वमाह स्वर्गेति स्वर्गस्यामरलोकस्य यत्स्थानं देवनिवासभूमिः। न तत् शाश्वतं नैव नित्यं सनातनमिति। तदुक्तं गीतायाम्—

'क्षीणे पुण्ये मर्त्यलोकं विशन्ति'।

इत्यत्रापि प्रकरणप्रसङ्गादायातम्। तत्रैव च—

'एकया यात्यनावृत्तिमन्यया वर्त्तते पुनः'।

श्रुतिरपि छान्दोग्ये 'तस्मिन् यावत् सम्पातमुषित्वाथैतमेवाध्वानं पुनर्निवर्त्तन्ते' इति। ज्योतिष्टोमादि यागजन्यापूर्वभोग-विषयस्य स्वर्गस्यानित्यत्वम्। तथा च न्याय-निष्प्रयोगः-स्वर्गः ध्वंसी सत्त्वापूर्वजन्यत्वात् घटादिवत् यद् यज्जन्यं तत्तदनित्य-मिति। शाश्वतम् आत्मस्वरूपापवर्गादिरिति बोधनिपदा। सिद्ध-मधुविषयत्वेन ब्रह्मार्क कल्पागमस्याक्रिया जन्यत्वेन च सना-

यावत् पुण्यफलं तावदेव स्वर्गफलम् ॥८३॥

न च स्वर्गपतनात् परं दुःखम् ॥८४॥

तनत्वात्। अन्यदाकारे भाष्ये भामत्यामद्वैतसिद्धौ चास्ति। स्वर्गः। अर्ज्ज अर्ज्जने, सुष्ठु अर्ज्यते इति कर्म्मणि घञ्। शाश्वतम्। शश पत गतौ, शश्वति। बाहुलकाद्वत्। शश्वद् भव 'तत्र भवः' इत्यण्। अनित्योऽव्ययानां टिलोपः। 'वहिषष्टिलोपवचनादिति' वार्त्तिकादिति ज्ञापकात् ॥ ८२ ॥

स्वर्गभोगस्य पुण्यकर्म्मफलस्य परिमितत्वमाह यावदिति। पूर्व्वसूत्रोदाहरण भूतत्वेनेदमुत्सूत्रमिति केचनाहुः। यावत् कालं व्याप्य पुण्यस्य सुकृतस्य फलं विद्यमानं भवेत्तावत्काल-पर्य्यन्तं स्वर्गप्राप्त-पुरुषेण तद् भुज्यते। तत्समाप्तौ तस्य पुनरागतिर्म्मर्त्यलोके, छान्दोग्य-पञ्चमप्रपाठकोक्त पञ्चाग्निविद्या नियमेन भवतीति। सुगममन्यत्। पुण्यकर्म्मणा मर्त्यलोके कीर्त्तिं सुखं परोपकारं सुशिक्षा च वर्द्धते। परकाले अमर-धाम लाभः। काय-निरुक्ता प्रागुक्ता ॥ ८३ ॥

अमरलोकात् पतनमपि-दुःखकरमस्तीत्याह न चेति। स्वर्ग-पतनात् स्वर्गात् शुभकर्म्मफल-भोगानन्तर' पतनात् मर्त्यलोका-गमनात्। अपरं किञ्चिद् दुःखं नास्तीति। मर्त्येऽनित्यक्षणिक-सुखलाभे तथा अमरधाम-सुखभोगः श्रेयानिति विशेषदुःख-जनकत्वात् पतनम्। उक्तञ्च सांख्यवृद्धैः 'दृष्टवदानुश्रविकः सह-

देवी देहत्यक्त्वा ऐन्द्रपदं यास्यति ॥ ८५ ॥
दुःखानामौषधं निर्व्वाणम् ॥ ८६ ॥

विशुद्धिविषयातिशययुक्तः । तदितरोऽसौ त्रयात् व्यक्ताव्यक्तज्ञ-विज्ञानात्' इति । श्रुतौ तथैवोक्तम् । 'तद्यथेह कर्म्मचितो लोकः क्षीयते, एवमेवामुत्र पुण्यचितो लोकः क्षीयते' । कर्म्मणा चितो लोकः कर्म्मचितः कर्म्मणा लब्धः । पुण्येन चित पुण्यचित । तयोरुभयोर्म्मीक्षयोः पुनरागतिर्भवति । 'न च स्वर्गफलं दुःखम्' इति पाठान्तरमस्ति । तदा स्वर्गेऽपि पुनः । स्वर्गभोगे दुर्गतिसं-भावः पुनर्दुःखादिकं गमनकं दुःखम् । यदा स्वर्गेऽपि तारतम्य-जनितं दुःखमस्ति ॥ ८४ ॥

गौतमी मनुजानां देव-परिवाराणामपि [illegible] भवति तदाह देवीति । गौतमी देहम् आह । [illegible] [illegible]

[illegible] ॥ ८६ ॥

अनार्य्य-सम्बन्धाद्वरमार्य्य-शत्रुता ॥८७॥

दुःखात्यन्तनिवृत्त्युपायमाह दुःखानामिति। दुःखानां प्रतिकूलवेदनीयानां परितापानाम्। औषधं परिनिवृत्तिहेतुः तत्रान हेतुर्वा, यथौषधेन रोगोपशान्तिस्तद्वत् निर्व्वाणेन दुःखनिवृत्तिः। 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इति कापिलाः। तदत्यन्तनिवृत्ति... निर्व्वाणं कैवल्यं मोक्ष... सम्यग्ज्ञानापायादपवर्ग इति गौतमाः। 'पदार्थतत्त्वज्ञानादि... इति काणादाः। 'आत्मस्वरूपाधिगम ... कर्म्मोच्छेदात् परमनश्वरतजीव... एतदये 'तत्त्वार्थश्रद्धानं सम्यग्दर्शनम्। ... दुःखं रोगः सम्यग् ... अन्यः। तत्त्वार्थाधिगमसूत्रभाष्यादावपि। ... धारणपोषणयोः। ... निर्गति। 'सत्यशौ... ॥ ८६ ॥

... इत्याह धर्म... सम्यग्भान् सर्व्वमनात् ... सङ्गामत थेर मर्

... सङ्गा

... इत्युक्तं प्राक्।

निहन्ति दुर्वचनं कुलम् ॥८८॥
न एव संन्यासात् परं सुखम् ॥८९॥

अन्यच्च शास्त्रान्तरे—

'दुर्जनः परं सम्बन्धात् सज्जनोऽपि विनश्यति' ।
दस्यु-तस्कर-पामर सम्बन्धेन धननाशात् साधुसङ्गेनमात्तदना-
शोऽपि विनश्यति । तादृशसम्बन्धाभावे शान्तिरवश्यम्भाविनी ।
साधुसङ्गे कार्ये धननाशेऽपि शान्तिर्भवेति । चौरादिसम्बन्ध-
वदसाधुसम्बन्धः । अतः सर्वदा परिहर्त्तव्यम् असाधुसम्मिलनम् ॥८८॥

कोऽपि कुत्सितवाक्य-प्रयोगे स्वीय कुलविनाशमाह नेति ।
दुर्वचनं गर्हितवाक्यं परं निहन्ति गौरवहानिं करोति सम्पूर्ण-
मपि वर्द्धते । अत स्वकुलगौरवरक्षणाय कार्य्ये धीकार्य्येऽपि
च न वदेत् कुत्सितं वच । 'नातिदुर्वचनं कुलमिति' पाठा-
न्तरम् । तादृशे पाठे कुलं नातिदुर्वचनं नाति निन्दनीयम् ।
यतो दोषावहं लोकस्येव न तु तत्कुलस्य । पुरुषकार्य्यदोषेण
कुलं दोषं प्राप्नोति । कुलमर्यादां परिचितं पराम् तस्य परि-
चय । पूर्वपाठोऽत्र मनोहरः ॥ ८८ ॥

अथाह तत्त्वज्ञानात् परमाधिकसुखाभावमाह नेति ।
पुत्रस्याकस्मान्स्वाधिकारियस्य । अभ्यर्गादशादौ समुपसर्पणात्सम्बन्ध-
र्शनादौ । इत्यतः श्रेष्ठ सुखहर्षजनकमनुभवनार्थं नास्ति ।
तथाच 'पर्त्तं वाऽपि नाकोऽजय.' । महाभारते च

विवादे धर्ममनुस्मरेत् ॥१००॥
निशान्ते कार्य्यं चिन्तयेत् ॥१०१॥

'पुत्रः मियाणामधिको भार्य्या च सुहृदाम्वरा'! इत्युक्तं प्राक्। श्रुतिः स्मृतिरप्यत्रार्थे प्रमाणम्। 'अपुत्रस्य गतिर्नास्ति'। 'पुत्रहीनं गृहं शून्यमि' ति लघुचाणक्यवाक्येन पुत्रस्य श्रैष्ठ्यं प्रख्यापयति। अतस्तत्संसर्गे अतिसुखं स्यादिति। प्रागुक्तमन्यत् ॥ ९९ ॥

विवादे उपायान्तरमाह विवादेति। विवादे धनसम्पदादेर्विरोधे समुपस्थिते कौशलेन धनेन च यदि मीमांसा न भवेत्तदा धर्म्मं लोकविधारकं श्रेष्ठोपायमनुस्मरेदनुतिष्ठेत। विवादमीमांसायै अन्योपायमनपेक्ष्य धर्म्माश्रयणं प्रधानमुपायः। अद्यत्वेऽपि धर्म्माधिकरणे सत्यनिरूपणाय धर्म्मोद्देशे न्यायाधीशः शपथं कारयति। एवमपि समाजिकेषु धर्म्मशपथेन विवादो मीमांस्यते। यद्य मानवोक्तः सामासिको धर्म्मः स सर्व्वेषामाश्रयः। अनुस्मरेदित्यत्र पश्चात् स्मरणतो हि प्राग् धर्म्माश्रयणमनुष्ठानञ्च श्रेयः। अतः अनुस्मृतेरनुसरणार्थो युक्तः। 'विवादे कार्य्यमनुस्मरेत्' इति सूत्र पाठभेदे, विवादे समुपस्थितेः कार्य्यं स्वापराजयजनकं कर्म्मानुचिन्तयेदिति। येन कर्म्मणा स्वोत्कर्षो भवति तदेवानुसन्दध्यात्। अनपूर्व्वात् स्मरतेर्लिङानुस्मरेदिति सिद्धम् ॥१००॥

कार्य्यानुचिन्तनस्य प्रशस्तावसरमाह निशेति। निशायाः यामिन्या ... अवसाने रजनीशेषे, तन्मध्ये या, निद्राविगमे शरीरेन्द्रिय-

प्रदोषे न संयोगः कर्त्तव्यः ॥ १०२ ॥

ऐश्वर्य्यकामस्य स्थैर्य्यं संजाते विषयान्तरात् प्रत्याहृतमानसः सुख-स्थेन । कार्य्यं सांसारिकं कर्म्म । अन्यदा धर्म्मादिकं चिन्तयेत् । स्वयं कार्य्यगुरुत्वेन मन्त्रिभिः सार्द्धं वा, तदा तादृगकार्य्य-प्रणिधौ धर्म्मादीनां अवधानायोग्यत्वमपि बोध्यम् । प्रागुक्तियामे पश्चात् मनसः स्थैर्य्यात् कालस्य सुखकरत्वात्तस्मिन् विषयपरिचिन्तनम-क्लेशेन भवतीति सारः । वासरे कार्य्यबाहुल्यात् मानसचाञ्चल्यात्तत् न सम्भवति । तदुक्तं पूर्व्वाचार्य्यैः 'शुभस्थाने स्निग्धभार्य्यो विविक्ते सुहृदि परान्तरं प्राज्ञः स्वयं वा चिन्तयेत्' इति । निशान्ते गृहे विजने वा । 'निशान्तं त्रिषु शान्ते स्यात् क्लीवन्तु भवनो-षसोः' इति मेदिनी । 'निशान्तं सदनं वस्यमागारं मन्दिरं पुरम्' इति वाचस्पतिः । निशेति । षम गतौ, षम्यते । निशा-यामम्यते वा । तत, क्तप्रत्ययः । 'क्षुब्ध स्वान्त' इत्यादिना नेट् । निशाया अन्तो यत्रेति वा ॥ १०१ ॥

सायंकाले कर्म्मसम्बन्ध-निषेधमाह । प्रदोष इति प्रदोषे रजनीमुखे सायकाले दिनरात्र्योः सन्धिसमये इति । संयोगः केनापि कर्म्मणा सम्बन्धः तदारम्भोऽनुधावनं वा । न कर्त्तव्यः नैवोचित । तत्क्षणस्य सान्ध्यत्वेनानुधावनायोग्यत्वादवसरकालः स । तदुक्तं शास्त्रान्तरे —

'चत्वारि घोररूपाणि सन्ध्याकाले विवर्ज्जयेत् ।
आहारं मैथुनं निद्रां स्वाध्यायञ्च विवर्ज्जयेत्' ॥

न दानसमं वश्यम् ॥ १०५ ॥

दुग्धप्रयोजनसिद्धिः । यस्य तु यत् प्रयोजनं तदुपादानद्रव्यं समाहार्यम् । यथा तण्डुलार्थिनो धान्यानि न तु माषाः । यस्य तु यत्र प्रयोजनम्, तेन तथोपादेयम् । यथा जलार्थिना सिकता । तथा च—

'प्रयोजनमनुद्दिश्य न मन्दो हि प्रवर्त्तते' इति ।

तथा कर्मानुष्ठाने कश्चित् कदापि स्वानिष्टमपि स्यात् । शास्त्रतातोऽपि 'न कुर्वीत वृथा चेष्टाम्' इत्युक्तम् । तत्कार्यानुपयोगिवस्त्वासादनमपि वृथा भवति ॥ १०४ ॥

दानस्य परवशीकरणे हेतुमाह नेति । दानसमम्, दानेन सद्द्रव्यस्य हितोद्देशेनोपकाराय परवशीकरणेन । तत्समं तुल्यम् । वश्यं लोक-वशीकरणकार्यमन्यद् नास्तीत्यर्थः । तथा च स्मृतिः—

'दानेन द्विषन्तो मित्रा भवन्ति'
'तस्माद्दानं परमं वदन्ति' ।

यथा च 'सर्वां [illegible] दानमि'ति । कृतिरपि [illegible] इत्यादिना [illegible]
"न [illegible] दानि [illegible]
[illegible] दानमित्रि [illegible]" । इति च
"[illegible] दानि [illegible]" ।
[illegible]

परायत्तेषूत्कण्ठां न कुर्य्यात् ॥ १०६ ॥

रनायासेन स्वपरहित-कीर्त्ति जनक-परवशीकरण-कार्य्याणि साधयितुं शक्यते। दानविषये पूर्व्वमुक्तं सूत्रोक्तविषयप्रसङ्गादत्रो-च्यते ॥ १०५ ॥

परहस्तगतविषये उद्वेगकरणनिषेधमाह परेति। परेषा-मन्येषां बलवता वा। आयत्तानि हस्तगतानि यानि धनान्यन्ये विषयाश्च। तेषु उत्कण्ठामुत्कलिकामुद्वेगमिति। सन्मतिमान् न कुर्य्यात्। 'उत्कलिका तु हेलायां तरङ्गोत्कण्ठयोरपि' इति रभसः।

"चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः।
उत्कण्ठोत्कलिके तस्मिन् अभिध्यातूभयोरपि'।

इति शब्दार्णवे च। पराधीन-धनदर्शनेन स्वधनस्य परकराय-त्तत्वेन च पुनरुद्धार सम्भावना विरहादुत्कण्ठां खेदञ्च मतिमान् न विदध्यात्। परन्तु तदर्जन रक्षण सन्नियोगाश्चिन्तनीयाः। यन्मया—

"पराधीनं न कर्त्तव्यं तरुणीधनपुस्तकम्।
कृतञ्चेल्लभ्यते दैवाद् भ्रष्टं नष्टं विमर्द्दितम्" ॥

उत्कण्ठा। कठि शोके, उत्कण्ठनम्। ततो 'गुरोश्च' इत्यादि सूत्रेण अः स्यात् ॥ १०६ ॥

असत्समृद्धिरसद्भिरेव भुज्यते ॥१०७॥
निम्बफलं काकैर्भुज्यते ॥ १०८ ॥

असदुपायार्जितधनस्यासद्व्ययगामित्वमाह असदिति। असती परपीडाचौर्यादिना हीनमार्गेण वा आगतोपार्जिता या समृद्धि-र्विपुलधनमैश्वर्यमिति यावत्। तादृशी समृद्धिरसद्भिः चोर-दस्यु-शठ-गणिकादिभिर्भुज्यते उपभोगः क्रियते च, यदि तस्याः भोगः सत्कार्ये व्ययः सत्पात्रे समर्पणं न स्यात्। तदुक्तं [illegible]—

'सञ्चितं क्रतुषु नोपयुज्यते, मार्गितं गुणवते न दीयते।
तत्कदर्य-परिगतं धनं चोर-पार्थिवगृहेषु भुज्यते' ॥

प्रागुक्तमन्यत्। 'असदि. स्यादोषधिभेदे अस्त्रयामपि योषिति' इति मेदिनी। समृद्धि, ऋधु इद्धौ, समर्द्धनम्। ततः क्तिन् ॥१०७॥

पूर्वसूत्र विशदीकरण समर्थन-प्रसङ्गेनेदं प्राह निम्बेति। निम्बफलं पिचुमर्द्दास्वादितिक्तफलम्। काकैर्वायसैर्भुज्यते अद्यते। न सुस्वनोरैः। तिक्ताधिक्यादस्वाद्यत्वादिति। अतितिक्तः स्वस्याप्यानिष्टकरः। एतेन यथा स्वभावतिक्तं निम्बफलं तथा तद्-योग्यो भोक्ता काकः इति। एवमसदुपायार्जितं धनं तस्करादिभि-रेव भुज्यते इति पूर्वसूत्रान्मयङ्ग। 'पिचुमर्द निम्बौ' इत्य-मरः। 'काके तु करटारिष्ट बलिपुष्ट सकृत्प्रजाः। बलिभुग् वायसा अपि' इत्यमरः। निम्ब निम्बि सेचने, निम्बति लोकानां

नाम्भोधिस्तृष्णामपोहति ॥१०८॥

बालुका अपि स्वगुणमाश्रयन्ते ॥११०॥

स्वास्थ्यम्। सतः पचाद्यच्। काकः। 'कै शब्दे, कायति। इण् भीका' इत्यादौणादिकसूत्रात् कन् ॥ १०८॥

लोकतृष्णाविगमे वारिधेरपि सामर्थ्याभावमाह नेति। अम्भोधिर्वारिधिः सागर इति। लोकतृष्णां विषयवासनाम्। नापोहति न पूरयितुं शक्नोति नित्यवृद्धिस्वभावात्। तदुक्तं कविभिः—

'धनाशा जीवनाशा च जीर्य्यतोऽपि न जीर्य्यति'। इति। वारिधिपक्षे तु पिपासायाः सततं वर्द्धमानत्वेन पुनः पुनः दिया-सुत्वाज्जलधिस्तामपनेतुं न शक्नोति। पौराणिकास्तु 'आशा वैतरणी नदी' इत्याहुः। यथा जीवनावसाने वैतरणी नदी समुत्तीर्य्यते तद्वत् आशानद्यपि। सति जीवने आशानदी समुत्तरणे नास्ति सम्भवः। तात्त्विकैरुक्तम्—

'सा तृष्णा चेत्परित्यक्ता को दरिद्र' क ईश्वरः'।

'आशाहि परमं दुःखं नैराश्यं परमं सुखम्'।

अम्भोधिः। अभि शब्दे, अम्भो जलं धीयते इति। 'उदकेस्वम्भो च' इत्यनेन असुन्, नुमागमश्च। 'टट लिप्सायामुदन्यायां स्मरपुत्रामपि स्त्रियाम्'। तृष्णा। त्रितृष् पिपासायाम्, तर्षणं तृष्णा। "तृषिधृषिरसिभ्य कित्" इत्यौणादिकात्र ॥१०८॥

क्षुद्रस्यापि स्वगुणत्यागाभावमाह बालुका इति। बालुका सिकताः। परस्परासंहता अपि स्वस्यात्मनो गुणं स्वाभाविक

न हंसाः प्रेतवने रमन्ते ॥ ११२॥

अर्थार्थं प्रवर्त्तते लोकः ॥ ११३ ॥

इति श्रीतिदर्शभाष्ये चाणक्यसूत्रे पञ्चमोऽध्यायः ॥ ५ ॥

अयोग्यस्थाने भ्रमण-गमनादेर्निषेधमाह नेति। हंसाः सारसाः जलपादा इति। प्रेतवने मृतवने श्मशाने इति। न रमन्ते नापि क्रीड़न्ति विचरन्ति च। तद्वदिहांसः साधवः। असत्सु स्थानेषु न मज्जन्ते। यस्य तु यदनुरूपकारम् अनुकूल-स्थानं स तत्रैव मिलति संमतश्च भवति, नान्यत्र। अतः सूत्रं पूर्वसूत्रस्य भावप्रसारणव्यञ्जकम्। 'प्रेतो भूतान्तरे पुंसि मृते स्याद्वाच्यलिङ्गकः' इति मेदिनी। तद्विषये सूरिभिरुक्तं 'काकः पद्मवने धृतिं न लभते हंसश्च कूपोदके' इति। 'हंसः स्या-न्मानसौकसि' इति विश्वः। हन हिंसा गत्योः, हन्ति गच्छति। 'हु' तु यदि हन्ति' इत्यादिना सः। यद्वा अचिप्रत्यये 'भवेद्वर्णा-गमाद्धंसः' इत्यनेन सक्॥ ११२ ॥

धनादिप्रयोजनसाधनार्थं लोक-प्रवृत्तिस्तदाह अर्थेति। अर्थार्थं धनार्थं लोको जनः। प्रयोजनसम्पादनाय च। प्रवर्त्तते लोक प्रवृत्तिर्व्यापारः जगति अर्थार्थं दृश्यते। तेन जागतिक-कार्य्य-निर्वाहः। द्विविधं हि लोकप्रवर्त्तनं कार्य्यं भवति। स्वार्थेन करुणया वा। अज्ञानात्तु वृथैव प्रवृत्तिः। यत्र तु स्वार्थकरुणे न तत्र प्रवृत्तिः। यथा मरुस्थल दर्शने। भारते च—

न चाशापरैः श्रीः सह तिष्ठति ॥२॥

'आशापाशेन बध्यन्ते मानवाः सततं भुवि।
निराशाः सुखिनो लोका यथा कुक्षाञ्चयाऽपरे'।

सा तु यदि मद्विषये भवेत्तदा तत्परो लोको मानवोत्तमः स्यात्। 'आशा ककुभि तृष्णायाम्' इति हैमः। अश्नु व्याप्तौ, आसमन्तादश्नुते। ततः पचादित्वादच्। 'इतः परमधोतः परं कुशलो भविष्यतीत्याशया लोको जीवति' इति पाठेऽपि वैचित्र्यमस्ति। तदा अस्मात् कालात्परमधोतः आलयास्थः सन् मानवः कुशलो भविष्यतीदृश्याशया स जीवति। प्राणान् धारयतीत्यर्थः स्यात्। 'लोकस्तु भुवने जने' इत्यमरः। प्राङ्निरुक्तमन्यत् ॥ १ ॥

आशापाशबद्धपुरुषस्य तद्वेगेन धावतः श्रीपरिहारहेतुमाह न चेति। आशा तृष्णा विषयस्पृहा। तत्परास्तदनुसर्त्तारः मानवाः। तैः सह श्रीः ऐश्वर्यं सम्पद् न तिष्ठति, नापि वर्त्तते। ये च लोके आशा पाशवद्धहृदया इतस्ततो नितरां भ्रमन्ति क्वापि परितोषं न लभन्ते, तैः सार्द्धं श्रीर्नैव तिष्ठति।

'श्रीर्लक्ष्मीः कमला शोभा ऐश्वर्यं सम्पदित्यपि'।

अन्यच्च—

'आशया जीव्यते जन्तुराशया बध्यते पुनः'।

अपरञ्चोक्तं सूरिभिः—

'दुराशां परिहृत्यैव सदाशां वर्द्धयेत् सदा'।

माध्यामा परं धैर्य्यम् ॥ ८ ॥

दैन्यामावणमुत्तमम् ॥ ९ ॥

[illegible] ॥ ८ ॥

[illegible]

'[illegible]'

[illegible] ॥ ९ ॥

[illegible] —

'[illegible]

[illegible]'

आशापरो निर्लज्जो भवति ॥ ५ ॥

न मात्रा सह वासः कर्त्तव्यः ॥६॥

राजनीतौ च—

'चण्डालश्च दरिद्रश्च द्वावेतौ तुल्यतां गतौ।

एकः स्वजातिभिः [illegible] इति।

'निःस्वस्तु [illegible] दरिद्रो [illegible] इत्यमरः। [illegible] इत्या-

दिना [illegible] । [illegible] नत्वम्।

[illegible] ॥ ४ ॥

आशातत्परस्य [illegible] आशादयाभि-

काङ्क्षा [illegible]

[illegible]

[illegible]

नात्मा क्वापि स्तोतव्यः ॥ ७ ॥

यदि तु तरुणानाम् । मात्रा युवत्या प्रौढ़या वा न स्वतिष्ठदया भवति । तदुक्तं मानवे—

'मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति' ॥

भोगलौल्यात् स्वभावतो हि मानवानां विषय-विषयाणोन्द्रियाणि कदा कस्मिंश्चिद्विषये कस्येन्द्रियस्य विक्रान्तमवैस्तदत्तु मैव नि शक्नुवन्ति । ततो युवती जननी गुरुपत्नी कुमारी परमस्यादिभिः सार्द्धं एक-शय्या सन्निधानोपवेशन पान भोजनादीनि न कुर्य्यादिति । अत्र मातृपदं वामपदस्योपलक्षणम् । मित्र विमाह्यगण्यादिभिः सार्द्धं शयनादीनि न विदध्यात् । यथास्य-भावपूर्व-व्यवहारे गौरवहानिव भवति । प्रागुक्तमन्यत् ॥ ६ ॥

स्वप्रशंसा करणनिषेधमाह नेति । क्वापि कुत्रचित् कार्य्ये विषये च । स्वस्यात्मनः श्रैष्ठं न कीर्त्तनीयम् । यदा परःकृतं स्वयं, स्वेनात्मना न स्तोतव्यः । न गुणादिकथनैः श्लाघनीयः । परमन्यद्वारा स्वप्रशंसा कार्य्या । उक्तञ्च कविभिः—

'स्वगुणं हि स्वयं श्रोता न दमाय कदाचन ।
कामिनी करपद्माभ्यां स्वहृत् मन्मथार्त्तं यदा' ॥

यथाऽसावात्मना स्तनौ नार्हति, तदुक्तं यथा ... अपि च लोके: ...

न दिवा स्वप्नं कुर्य्यात् ॥ ८ ॥

न चासन्नमपि पश्यत्यैश्वर्य्यतिमिरचक्षुः शृणोतीष्टम् ॥ ९ ॥

प्रीताः स्युः। परप्रशंसाचरणमात्मनश्च यशोऽन्येन प्रसार्यम्। नहि प्रसूनं स्वसौरभं दिक्षु विकिरति अपि च वायुना। तद्वत् प्राज्ञेन गुणप्रकाशने ते च गुणा परिवर्द्धन्ते। लोकाश्च प्रीताः भवन्ति। यदभिहितमित्यादि प्रागुक्तम्। ७॥

दिवसे निद्रा निषेधमाह नेति। दिवा दिवसे दिवा इत्यव्ययम्। शयनं न विदध्यात्। तेन कार्य्यहानिः। आलस्यं आयोध वृद्धिः। अग्निमान्द्यं शिरोरोगश्चेति। शिशोर्न तद्दूषणम्। रोगिणोऽवस्थाविशेषे दिवा भोजनात्प्राक् स्वप्नः प्रशस्तः। यत्र यामिन्यामनिद्रः स दिवसे शयानो भवेत्। 'मा दिवा स्वाप्सीः' इति श्रुतिः। 'आयुःक्षयी दिवानिद्रा' इति स्मृतिश्च। भारते च—

'दिवाशय्या न ते पुत्रा न रात्रौ दधिभोजिनः'।

इत्येतत्प्रसङ्ग सामान्यतया निषेधः। विशेषतश्चाह [illegible] [illegible] निद्रितस्य सन्निकृष्टे [illegible] [illegible] वा भवति [illegible] [illegible] [illegible] [illegible] [illegible] प्रागुक्तमिति। ८॥

[illegible] [illegible] [illegible]। [illegible]। ऐश्वर्यं विपुलं धनम्।

स्त्रीणां भर्त्ता परं दैवतम् ॥ १० ॥

तमसावृतया चक्षुषोः तिमिरं [illegible]
[illegible] पुमान्। [illegible]
[illegible] महत्। [illegible]
[illegible]
तु [illegible] भवति। तथाच

'पाप, [illegible]
[illegible] भवन्ति'। [illegible]

[illegible]
[illegible] भवति। [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ १० ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

तदनुवर्त्तनमुभय-सौख्यम् ॥ ११ ॥

गुरु-स्वजन-शुश्रूषणे नार्य्यौचित्यज्ञानम्। भर्त्ताऽत्र पतिरेव। नाथादिना पालन-पोषण-कर्त्ता। 'स्त्री योषिदबला नारी महिला' इति। ये तु केचन वदन्ति 'न स्त्री स्वातन्त्र्य मर्हती'ति तद्युक्तिः। तत, स्नेह-प्रीति-लावण्य-स्वभाववत्त्वात् स्त्रीणां स्वातन्त्र्येऽपि पुरुषवत् तत्सर्वं नश्यत्येव। अन्यच्च यत् तासामेकमेवावलम्ब्य मतोऽस्वस्थं तदप्यागमज्ञानुस्यूतं निगमज्ञ स्यात्। तथापि न पुनर्लाभो भवत्येव, प्रागुक्तमन्यत् ॥ १० ॥

पत्यनुसरणं नारीणां सौख्यमित्यत आह तदिति। तस्य पत्युः स्वामिनः। अनुवर्त्तनं व्यावहारिक-धर्म्म-कार्य्ये चानुगमनम्। उभयोरैक्येन कार्य्यसम्विधानं वा तयोर्यावज्जीवनं सुखप्रदं हितकरञ्च। तथाविरोधे गार्हस्थ्यधर्म्महानिः निरर्थक्लेशश्च। अन्यदप्यत्र वृद्धचाणक्ये। 'अपत्यं स्त्रीणामुभयत्र सौख्यं वहति' इति सूत्रपाठभेदे पति-पत्न्योर्द्वयोरपत्यं सौख्यप्रदमित्यर्थः। यद्वा उभयत्र अस्मिन् लोके परत्र च। 'अपत्यं पुत्रकन्ये' इतिकोषः। अद्य देशे सामाजिके च कर्म्मणि सर्व्वत्र भर्त्तार-मनुसृत्यानुगामुकमन्यथानुवर्त्तन नारीतिसारः। अन्यथा स्त्रीधर्म्मे व्याकुलित स्यात्। यत्र देशे एतादृशी रीतिर्नास्ति तत् देशनिवासी हि दुर्निवार्य्यः इति। धर्म्मशास्त्रे अन्यत् द्रष्टव्यमस्ति ॥ ११ ॥

अतिथिमभ्यागतं पूजयेद् यथाविधि ॥१२॥
नित्यं संविभागो स्यात् ॥१३॥

अतिथ्यभ्यागतयोः सत्कारं गृहस्थस्य कर्त्तव्यमभिधातुकाम आह अतिथिमिति । अतिथिमकस्मात् समयमनिश्चित्यागतं जनम् । अभ्यागतं ज्ञातपूर्वं प्रत्यागतम् । एतयोरनिश्चितनिश्चितसमयोपस्थितयोरागमने भेदः । अनियता तिथिः कालो यस्य सोऽतिथिः । 'अतिथिः कुशपुत्रे स्यात् पुमानागन्तुकेऽपि च' इति विश्वः । यथाविधि यथाशक्ति गृहस्थितद्रव्यादिभिः पूजयेत् सत्कारं कुर्यात् । यद्यपि सत्कारयोग्यं किमपि नास्ति तदासन-वारि-दानमधुरवचोभिः प्रीणयेत् । आर्य्येषु गृहस्थस्यातिथिसेवा सुमहती धर्मः भारतवर्षे प्रसिद्धः । अन्यत्र कुत्रचिद् देशे एतस्याभावः । निराश्रयस्यागन्तुकस्य निरुपायस्य आश्रय-पान-भोजनदाने प्रीतिरुपकारो धर्मेण प्रत्यक्ष एव उपलभ्यते । अस्यादर्शमात्रे प्रदर्शितमस्ति । अतिथि । अत सातत्य गमने, अतति । 'अतस्यथि' इत्यौणादिकइथन् इथिन् ॥ १२ ॥

स्वधनस्य स्वपरहिताय सततं दानपूर्वकं भोगव्यवहारादिकमाह नित्यमिति । नित्यं सततं सर्वेष्वप्युत्सवेषु वा । कश्चिन्मौ सम्यक् 'विभागोऽस्यास्तीति' । विभागो नाम 'वैदेवे भजनं' स्वस्वधारण वा विभाग … … आत्मनो परस्परविहरणसाम्यधर्मप्रकारेण प्रतिपादन हि विभाग

नास्ति हव्यस्य व्याघातः ॥१४॥

मृगतृष्णा जलवद्भाति ॥१५॥

इति श्राद्धविवेकव्याख्यायाम् । स्वधनस्य प्रत्यहम् अतिथि-देव-पितृ-दीनादिभ्योऽर्पणं कर्त्तव्यम् । नात्मप्रीतये सर्वं रक्षणीयम् । तेनेन्द्रिय-काय-सेवायाः प्राबल्यं स्यात् । तथा च श्रुतिः-

'स केवलमघं भुङ्क्ते यो पचत्यात्मकारणात्' ।

अन्यच्च 'यो भुङ्क्ते तेन एव सः' । आत्मभोगस्तु जीवमात्रेऽस्ति न तस्य प्राशस्त्यम् । परपिण्डप्रदानपूर्वकं भोग एव जगति श्रेयान् तेनापरस्यापि रक्षणं भवेत् ॥ १३ ॥

अतः पूतहविर्द्रव्यस्य सत्पात्रत्वाद् व्याघाताभावमाह नेति । हव्यस्य देवभक्ष्यस्य तदंशस्य वा । व्याघातः व्याहतिर्विनाशो नास्ति । यस्मात्पुरःसरं देवाद्युद्देशेनानीतद्रव्यस्यापनाशोऽस्ति । अन्यद् यत् स्वत पूतं वस्तु तस्यैव तादृशी दशा यया सत्यस्य क्षयतं प्रतिपद्यते यदा क्षयन्ते प्राप्यन्ते देवा येन तद्धव्यम् । हुदानादानयो. हव्यतोऽचा यत् स्यात् । 'हव्यकव्ये दैवपैत्रे च' । देवानामर्थं हव्यम् । पितृणामर्थं कव्यम् ॥ १४ ॥

मरीचिकाया वारिवद्गगनप्रकाशाभावाद मृगेति । मृगतृष्णा-मरीचिका । सा तु मरुभूम्यां निकटावधि प्रसृतप्रखर-सौरालोक-प्रालाभाव-तरङ्गवदाभाति । मृगास्तु वारिभ्रमेण पिपासवः सन्तः गत्वा तत्स्थानाधिगमात् सलिलाभावाद्यावन्न परिज्ञः ।

दुर्मेधसां शास्त्रार्थो बुद्धिं मोहयति ॥ १८ ॥

वर्तिन् मनेन प्रतिबोधितः दुर्बुध च । शास्त्रार्थो विशे भाति । यदा निजानुभवेन विशिष्टोऽयमर्थः न भाति, दुर्बो- धविषयाभावात् । 'दुः अलिकः भागाभ्य' इत्यमरः । न भागानभ्यासेन गुणाविष्करणात्, यतो दुर्वहनानुभवः । शास्त्राणां यथा प्रयोजनमनायत एव विमूढितमिदम् । किन्तु समार्थानुभव एव समुचितमिदमेवेति । शास्त्रपूर्वं यन्त्रित- मिदम् । तत्त्वोऽयमोह कल्पः' इति सूत्रम् । अत्र वस्तु- प्रत्ययनम् । मतं तत्त्व ॥ १७ ॥

मन्दमतिः कठिनशास्त्रादि बुद्धेर्मालिन्यात् दूरितः । दुर्मे- धसाम्, दुष्टं मन्दं मेधा धारणावतीबुद्धिरिति यद्धर्तिः । मन्द- बोधानाम् । शास्त्रविचारो शास्त्रम् । यथा नवीनम्लान-मलिन- शास्त्रावत् कठिनं दुरवगाह्यम् । बुद्धिं धारणामिम् । मोहयति बुद्धिभ्रंशं जनयति । तदुक्तं नातिनिश्चितः—

'चलमो मन्दबुद्धिश्च सुप्ता वा व्याधि-पीडितः ।

निद्रालु कामुकश्चैव षडेते शास्त्रवर्जिताः' ॥ इति माधवम् । बुद्धेर्मालिन्यात् कठिनशास्त्रे न प्रविशति । प्रखरमतिषु सह- स्येव शास्त्राणि झटिति प्रविशन्ति बुद्धेर्नैर्मल्यात् । 'धीर्धारणा- वती मेधा' इत्यमरः । अत्र मेधा, मेधत्यभिप्रायः । यत्र नाना- विषयाध्ययने, बुद्धेः प्राबल्यमवताति तद्बोधावततामेव न तु दुर्- ॥ १८ ॥

आर्य्यः स्वमिव परं मन्यते ॥२१॥

अयमेकः सारः,। कविसमयश्च 'सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति'। तदेवान्यच्च 'सतां सङ्गे यद्वा यदि भवति सा दैवघटिका'। 'मेलके सङ्गसङ्गमौ' इत्यमरः। षञ्ज सङ्गे, सञ्जनम्। ततो घञ्। सह मेलनात् वसु श्रेष्ठं भ्रष्टञ्च भवति। तद्वत्साध्वसाधुसम्मेलनान्मानवस्य श्रेष्ठत्वनिष्कृष्टत्वे भवतः। यथा टङ्कणधातुद्रावकाग्नियोगात् सुवर्णं निर्मलं भवति। तदेव ताम्राग्निधमनान्मलिनं स्यात् ॥ २० ॥

आर्य्यस्यौदार्य्यं स्वपरसुखदुःखयोस्तौल्यमाह आर्य्य इति। आर्य्यः आचार्य्यः कर्त्तव्याकर्त्तव्यज्ञानसम्पन्नः कविः महाकुलजात इति यावत्। तादृशो मानवः स्वस्यात्मनः सुखदुःखे इवान्यस्य ते जानाति अनुभवति। तदुक्तं नीतिपारगैः—

'उदारचरितानान्तु वसुधैव कुटुम्बकम्'।

अपरञ्च—

'आत्मौपम्येन सर्व्वत्र दया कुर्व्वन्ति साधवः'।

अन्यच्च लघुचाणक्ये—

'आत्मवत् सर्व्वभूतेषु यः पश्यति स पण्डितः'।

एतत्प्रसङ्गात् पुनरप्युक्तम्। पण्डितोऽत्राऽऽत्मीयज्ञानसम्पन्न उदारमतिः। आत्मौपम्येन आत्मतुलनया। 'महाकुल-कुलीनार्य्याः' इत्यमरः। महाकुलभवाः सुधीराः आत्मानमिवान्यत् पश्यन्तीति। नापि स्वपर-विवेकं विदधति। आर्य्यलक्षणञ्च—

दैवायत्तं न शोचयेत् ॥ २४ ॥

विष्णुना च—

'निष्कृतिर्विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिरिति।

कृतमुपकारं हन्तीति कृतघ्नः। विश्वासो दृढ़-निश्चयप्रत्ययः तं हन्तीति विश्वासघाती। 'विस्रम्भः केलिकलहे विश्वासे प्रणयेऽपि च' इति विश्वः। श्वस प्राणने, विश्वसनम्। विपूर्वात् श्वस् धातोर्घञा सिद्दम्। जागतिकं सर्व्वं कार्य्यं विश्वासमूलकं ये तद् घ्नन्ति तेऽन्यद् दुष्कृताचरणं कर्त्तुं समर्था भवन्तीति। अपरं पूर्व्वसूक्तम्। विश्वासघाती। अत्र हन्तेः 'कर्मणि हनः' इत्यनेन णिनिः ॥ २३ ॥

दैवसम्पादितकार्य्ये अनिष्टजनित-शोचनं कृथेति तदाह दैवायत्तमिति। दैवाधीनं दैवकृतं कार्य्यम्। भूकम्पाग्नुपयःप्लावन-झञ्झासमीरण-महामारी दुर्भिक्षादि-लोकोत्तरविविधं यद् यत् कार्य्यं तत्तद् विद्वान् न शोचयेत्। तदर्थं परिचिन्तनं न विदध्यात्, परं मति सामर्थ्ये कौशलेन शान्त्यादिना वा, प्रतिविधानम् विधेयम्।—

'पूर्व्वजन्मकृतं कर्म्म तद्दैवमिति कथ्यते'।

इति पौराणिकाः। 'दैवं प्राक्तनसंस्कारः'। 'नच दैवात् परं बलम्' इति धर्म्मशास्त्रकृतः। यत्र पुरुषकारे व्यर्थशक्तिस्तत्रैव शरणम्। तथाचिन्त्यं स्वाभाविकमिति। तथा चान्यत्रनीतिविदा 'दैवेन देयमिति कापुरुषा वदन्ति'। एतत् पुरुषकार

धीहीनः पिशाचादनन्यः ॥ २७ ॥

'मनस्यन्यद्वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम्' ।
इत्यादि ।

आर्य्याणान्तु महतां सदैकरूप्यम् । तथाहि कविसमयः—

'चित्ते वाचि क्रियायाञ्च महतामेकरूपता' इति ।

शठानान्त्वन्याद्दृग्यम् । तथाहि वृद्धचाणक्ये—

'दुर्ज्जनस्य मुखे प्रीतिः वाचि चन्दनशीतता ।
हृदये तस्य दुर्बुद्धिः कुलिशादपि कर्कशा' ॥

हृदिति । हृञ् हरणे, हरति ह्रियते वा । हरतेर्बाहुलकात् केवलोऽपि दुक् । अथवा 'हृञोः पुक् दुकौ च' इति । सुगम-मन्यत् ॥ २६ ॥

धीहीनस्य बुद्ध्यभावात्लघुत्वे पिशाचतुल्यत्वमाह धीति । धी-र्धारणावती मेधा धीमुषीति' । तया प्रज्ञया शक्त्या हीनः धीरहि-तो जनः । पिशाचाद् गुह्यकाद् भूतादिति । अनन्योऽभिन्नः । आचरणे सर्वत्र लघुत्वा-ग्यणे तादृश एव । सुधी-जनो धिया हिताहितं विविच्य हेयं विहायोपादेयं प्रगृह्य सर्वं सम्पादयति । यस्तु धी-शून्यः स तत्कर्त्तुं नार्हति । प्रत्युत स्वैराचारेण पैशाच्यं याति । अतः सर्वस्मिन् बुद्धिवैशद्यमत्यावश्यकम् । 'पिशाचो ... मिषः' इत्यमरः । धीरिति, ध्यायति अनया, ध्यानं वा । ... सम्प्रसारणम्' इति वार्त्तिकात् क्विप् । ततो ...

स्वामी स्तोतव्यः सर्व्वानुजीविभिः ॥ ३० ॥

'लालयेत् पञ्चवर्षाणि दशवर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् ॥

शुक्र नीतौच—

"षोड़शाब्दात्परं मित्रं द्वादशाब्दात्परं स्त्रियम् ।
नताड़येद्दुष्ट वाक्यैः पीड़येन्न क्षुधादिकम्" ॥

अन्यच्च 'पुत्रे शिष्ये हितं वदेत्' । यत्तु—

'सर्वतो जयमन्विच्छेत् पुत्राच्छिष्यात्पराजयम्' इति ।

तत्तु विद्या शिल्प शौर्य्यगुणादिभिः पराभवमिच्छेदिति श्रेयत् नतु हितचिन्तन-सदुपदेशादौ । 'तनयः सूनुः सुतः पुत्र' इत्यमरः । यथा शिक्षा काले पुत्रेषु तथा कन्यास्वपि स्नेहो नोचितः, यतः शिक्षायां—

'लालने बहवो दोषास्ताड़ने बहवो गुणाः' ।

ताड़नम् विद्याशिक्षार्थं तिरस्कारादौपि पूर्व्वं समुल्लिखितम् । प्राह निगदितं पदनिरुक्तादि । २८ ॥

प्रभोर्यस्यानुवृत्तिपराणां स्तुतिकरणं समुचितमाह स्वामीति । सर्वैः सकलैरनुजीविभिः सेवकैर्भृत्यैश्चेति । स्वामी प्रभुरधिपतिर्गुरुश्च । स्तोतव्यो वन्दनीयः प्रशंसनीयश्चेति । सौर मादुपलब्धि-रक्षणाहरणाच सेव्यः स्वामी । 'न निन्दनीयः' इति सूत्रादौ क्वाप्यभिन्नपाठोऽस्ति । तेन न कोऽपि विशेषः सर्वोपरि 'सेवकार्थ्यानुजीविनः' इत्यमरः । प्रभुमाश्रित्यानुजीवितुं शीलमे षामिति 'सुपि' इत्यादिना णिनिः । स्वामीति । स्वमस्यास्ति

धर्मकृत्येष्वपि स्वामिनमेव घोषयेत् ॥३१॥

राजाज्ञां नातिलङ्घयेत् ॥ ३२ ॥

'स्वामिवैश्वर्य्यं' इत्यादिना साधुः । हीनजन सेवने तत्स्तवे च स्वस्यापि तद्भावयद्वा प्रवर्त्तेति ॥ ३० ॥

धर्मकार्य्येषु प्रभोः प्रशंसाकरणमुचितमाह धर्म इति । धर्म-कृत्येषु यागदानव्रतोत्सवादिषु । अपि निश्चितार्थे । स्वामिनं प्रभुम् अधिपतिमिति । घोषयेत् कीर्त्तयेत् प्रशंसया तदा-धिपत्यं लोकेषु प्रचारयेत् । स्वामिनामनुमतिं विना न कार्य्यं विदध्यात् । कानिचित् कर्म्माणि तदाज्ञां गृहीत्वैव कुर्य्यात् । यद्वा अन्यैः सम्पादिते कार्य्यं तत्फलं प्राधान्यात् स्वामिनि उप-चरितं भवति, 'स्वामीत्वीश्वरः पतिरीशिता' इत्यमरः । 'सर्व्व-कृत्येष्वपि' इत्थं सूत्रादौ पाठे सर्व्वेषु व्यावहारिक कृत्येषु तदनु मतिग्रहणं युक्तम् । एवं गुर्व्वनुज्ञा च । तेन कृत्येषु विघ्नाभावः स्यात्, सामाजिकानां प्रीतिश्च ॥ ३१ ॥

नृपादेशावज्ञाकरण-निषेधमाह राजाज्ञामिति । राज्ञां भूभुजां नृपाणाम् । आदेशमनुमतिं विधानञ्च । लोको नाति-लङ्घयेत् । हेलया बलाद् देषबुद्ध्या वा नावजानीयात् । तल्लङ्घने दण्डो गुर्व्वसमाननमाकनाश्च स्यात् । राजादेश-लङ्घने चोर तस्कर-लम्पटानां कार्य्यावसरश्च भवेदिति । नृपे वर्णनीयानि यथा कल्पलतायाम्—

> 'नृपे कार्त्ति प्रतापाज्ञा दुष्टशास्ति विवेकिता. ।
> धर्मनयाज-संग्राम-[illegible]' सनयक्रमाः ॥

स्वाम्यनुग्रहो धर्मकार्यं भृत्यानाम् ॥२३॥
यथाज्ञप्तं राज्ञा कुर्यात् ॥ २४ ॥

प्रजारागोऽपि नैन्यादिवामोऽरिपुरगुप्तता ।
सौदार्य्यधैर्य्यगाम्भीर्य्यशौर्य्यं मर्य्यादमादयः' ॥

इति पूर्व्वमुक्तम् । नृपादेशेन नगर-ग्राम-हट्ट-घट्ट-मिन्ध-वाणिज्यादीनां सर्व्वस्मिन् सौजन्यं भवति । तदादेशाभावे मात्स्यन्यायः प्रवर्त्तिष्यते । पदनिरुक्तिः प्रायुक्ता ॥ २२ ॥

अनुवृत्तिपराणां यः प्रभोरनुग्रहः स एव धर्मकार्य्यमवाप्त स्वामीति । स्वामिनः प्रभोर्नृपस्य च । अनुग्रहः कृपा सदयभावः । भृत्यानां कर्म्मकाराणामाश्रितानाम् । धर्म्मकार्य्यं धर्म्मकार्य्यम् । तदनुग्रहलाभ एव धर्म्मानुष्ठानमज्ञेयम् । तस्य दुर्लभत्वात् । तत्कृपा लाभे तु उन्नतिर्निर्बाधा भवेत् । यत प्रभोरनुग्रहाभावे किमपि सत्कार्य्यं भवितुं नार्हति । तस्मिन् भूपे प्रसन्ने अनुगतानां सर्व्वं प्रमवं राष्ट्रञ्च शान्तिमयम् । कोपे तस्य सर्व्वमुपद्रवपूर्णं स्यात् । यथा धर्म्मकृत्याद् निर्विघ्नेन दुःखं तथा नृपानुग्रहे ऐहिकं महत् सुखम् । उक्तञ्च मानवे—

'यस्य प्रसादे पद्मा(श्री)र्विजयश्च पराक्रमे ।
मृत्युश्च वसति क्रोधे सर्व्वतेजोमयो हि सः' ॥

इति पूर्व्वमुक्तम् । नृपाश्रितानामपि तत्प्रसादात्तथैव फलं स्यात् । प्रागुक्तमन्यत् ॥ २३ ॥

भूपालेन लोकहिताय यथादिष्टं तथैवानुष्ठेयमित्याह यथेति ।

सविशेषं वा कुर्य्यात् ॥ २५ ॥

स्वामिनो भीरुः क्वोपयुज्यते ॥ २६ ॥

नृपालेनेत्युक्तम्। तेन यथा यादृगाज्ञप्तमादिष्टं विहितमुपदिष्टञ्चेति। सेवकास्तथैव तादृगेव कर्म्म कुर्य्यु र्न तु विपक्षभावेन। आदिष्टनियमानुसारे कर्म्मकरणे नापि विपक्षभयः। 'यथैव यः स्वामिना चाज्ञापितं तथैव वा' इति पाठविकल्पे नार्थभेदः। सर्व्वत्र प्रभुभृत्ययोरुपाध्यायशिष्ययोरुत्तमर्णाधमर्णयोः स्वाधीनपराधीनयोरेवं नियमो बोध्यः। २४।

राजाज्ञाविषये विशेषमाह सविशेषमिति। विशेषेणासामान्येन सह वर्त्तमानं सविशेषं सामान्यमिति। नृपादेशेन सविशेषं कार्य्यं विदध्यात्। ननु अविशेषम्। यथासामर्थ्यं यद् गृहपत्यादीनां प्रात्यहिकं कर्म्म आवश्यकं तत्सर्व्वं नृपादेशं विनापि कर्त्तुं शक्यते। एवं धर्म्मकार्य्यमपि। अथवा वैशिष्ट्यञ्च व्यावहारिकविषयेतरकुल-धर्म्म-देशाचारादिषु। न तानि नृपादेशमूलकानि। अतस्तानि तदादेशाननुगतान्यपि कुर्य्यादिति भावः। साकारेणात्र सविशेषं कार्य्यविकल्पेन कुर्य्यादिति। अर्थात् काप्यनुचितं कार्य्यं न्यापि विदध्यात्। २५।

प्रभोः समीपे भीतस्य कार्य्योपयोगाभावमाह स्वामिन इति। स्वामिनः प्रभोर्नृपस्य च। सकाशे भयाभीतस्याकर्म्मण्यस्येति। क्व कुत्रचित् कार्य्ये उपयुज्यते, न कुत्रचिद् योग्यो भवति।

नात्यनार्य्यस्य कृपा ॥ ३७ ॥

नास्ति बुद्धिमतां शत्रुः ॥ ३८ ॥

कर्म्मसम्पादने शक्त्यभावाद्गोबलप्रतिबन्धकत्वाच्च । तदुक्तं पूर्व्वाचार्य्यैः—

'निरुत्साहो मन्दमतिर्भीरुश्च रोगवांस्तथा ।
दुर्बलो बधिरोऽन्धश्च एते कर्म्मसु गर्हिताः' ॥

'अधीरे कातरः त्रस्नो भीरु भीरुक भीलुकाः' इत्यमरः । ञि भी भये, बिभेति । 'भियः क्रुक् क्लुकनौ' । 'क्रुकन्नपि' इति वार्त्तिकात् सिद्धम् ॥ ३६ ॥

अनार्य्यजनानामनुकम्पाभावमाह नेति । अनार्य्यस्य नीचस्य शवरादेः । कृपा दया च । नास्ति, न विद्यते अमौदार्य्यहेतुण्याभावात् क्रौर्य्याच्च । ये त्वार्य्यास्तेषां स्वभावदाक्षिण्यात् माधुर्य्याच्च कृपा विद्यत एव । जातिः स्वभावः पृथग् दृश्यते । यथा भूमिः स्वभावस्तथा । कुङ्कुमस्योत्पत्तिः काश्मीरे एव मनु प्राग्ज्योतिः पुरे । गान्धारे च गोस्तन्याः प्रादुर्भावो नतु वृन्दावने । लोकस्वभावो यथा चार्य्येषु प्राच्येषु चातिथेयता न प्रतीच्येषु । कृप कृपायां, कृपनम् । 'कृपेः सम्प्रसारणञ्चे'ति भिदादिपाठादङ् । ३७ ॥

मतिमतां कौशल-प्राचुर्य्यं चारात्यभावमाह नेति । बुद्धिमतां धीमतां विदुषामिति । शत्रुररिरमित्रोऽथ्र्य, लोको नास्ति । ... हि स्वबुद्धिप्राबल्येन मधुरव्यवहारनैपुण्येन च शत्रु-

शत्रुं न निन्देत् सभायाम् ॥ ३६ ॥

नात्मच्छिद्रं प्रकाशयेत् ॥ ४० ॥

यत् सर्वान् शत्रु-मित्रसमजनान् समादाय कार्यं सम्पादयन्ति। इष्टानिष्टं न कस्यापि विदधति। अतस्तेषां सर्वे मित्राणि भवन्ति न कोऽपि द्विडिति। 'न सद्बुद्धिमतां शत्रुरिति' पाठे तु पर्यानैक्यं नास्ति। अवान्तं बुद्धिविपदेन। 'कृत्स्नो हि लोको बुद्धिमतामाचार्यः' इत्याचार्याः प्राहुः। कोष-पदनिरुक्तादिकं पूर्ववत्म ॥ ३८ ॥

परिषदि अरातेर्निन्दाकरणानौचित्यमाह शत्रुमिति। सभायां परिषदि समितावित्ति। शत्रुं रिपुं न निन्देदपि जुगुप्सेत। परिषदि शत्रोः कुत्सने सोऽतिशयः क्रुद्धोऽवमानितः सन् अचिरं गर्हिताचरणं विधास्यतीति। अतो रहस्ये तस्य विनाशं कुर्यात्। कौशलजालेन तमायत्तीकृत्य पराजितं कुर्यात्। तथा चोक्तं सूरिभिः—

वशीकृत्य रिपून् सर्वान् कौशलेन बलेन वा।
स्वकार्यं साधयेत् प्राज्ञः तदनिष्टं न चिन्तयेत् ॥

इति। सभा। सह भान्ति ये यस्यां वा। भा दीप्तौ, भाति। 'सुपि' कप्रत्यय.। यद्वा 'अन्येभ्योऽपीति' वचनात् डप्रत्ययः। ॥ ३६ ॥

आत्मदोष-प्रकाशावसरदाननिषेधमाह नेति। आत्मनः स्वस्य छिद्रं दोषं परानिष्टकरण-सन्धानयाग्यं प्रवेशमार्गम्।

शक्तौ क्षमा श्लाघनीया ॥ ४१॥

कदापि न काशयेत्। नापि तदनुयोगप्रदानं युक्तम्। अपि तु स्वरक्षणाय यत्नतो गोपयेत्। तदुक्तं मानवे—

'नास्यच्छिद्रं परे दद्यात् परच्छिद्रं प्रकाशयेत्'।

इत्यादि प्रागुक्तम्। एवमेव श्लोकः कौटिलीयेऽर्थशास्त्रेऽस्ति। अनयोः श्लोकयोः पाठभेदेऽपिनार्थभेदः। यस्य प्रकाशेऽस्त्यनिष्टं न तत्प्रकाश्यम्। यस्य प्रकटने स्व-परानिष्टं भवेत्तदपि न प्रकाशनीयम्। यस्य तु व्यक्तौ करणे शत्रोरनिष्टस्तत् प्रकाशनीयमेवेतिसारः। यस्य प्रकाशेऽप्रकाशे च न कोऽपि कस्यापि लाभस्तत्रौदासीन्यम्। 'न सर्षपमात्रमप्यात्मच्छिद्रं प्रकाशयेदिति' पाठभेदे अर्थसाम्यमस्ति। अनेन सर्वथाप्यात्मच्छिद्रप्रकाशे निषेधोद्योतितः अर्थशास्त्रे पुष्कलमप्यदस्ति ॥ ४० ॥

शक्तिमतः क्षमा-प्रकाशे प्रशंसनमाह शक्ताविति। शक्तौ सामर्थ्ये विद्यमाने। तत्तत्कार्यनिर्वाहकरण-सामर्थ्यं शक्तिः। नियहानुग्रहकारिणी वा। अस्यां शक्तयाम्। क्षमा रागादि सहनम्। परैरनिष्टकरणे तत्प्रत्यपकाराकरणं वा। श्लाघनीया प्रशंसार्हा अतः शक्तिमतां क्षमा श्रेयसी। अशक्तस्य तु दौर्बल्य-सूचिका। यत्तत्र अनुशासनेऽपि 'क्षमा रूपं तपस्विनः' इति तत् सर्वकर्म्म परमेश्वरार्पणशीला तस्यासिनां न तु विषया-सक्तानाम्। तदुक्तं पूर्वसूरिभि —

'क्षमा शक्तिमतां भूषा दुर्बलस्य स्वतः क्षमा'। इति

क्षमावानेव सर्व्वं साधयति ॥ ४२ ॥
आपत्प्रतीकारार्थं धनमिष्यते ॥ ४३ ॥

'क्षमा तितिक्षा क्षान्तौ च योग्ये शक्ते हिते क्षमम्'। इति धरणिः। क्षमू सहने, क्षमते, ततः पचाद्यच्। षित्वादङ्प्रत्ययः। यद्वा घञा क्षितम्। घञि परे नोदात्तोपदेशस्येत्यादिना न वृद्धिः ॥ ४१ ॥

सहनशीलस्याशेषकार्य्यसाधने योग्यतामाह क्षमेति। क्षमावान् शान्तिमान् दुःखापमान-धननाशादि सहनशीलश्च। तादृशो जनः सर्वं कार्य्यं साधयति। परोपापकृतौ तस्यापकाराकरणं क्षमेति। यत्र कार्य्ये क्रोधोद्रेकाद्विवादादि सम्भवति तत्र क्षमा साधनीया। तया कौशलेनानायासेन च कार्य्यं सम्पत्स्यते। न तत्र मानसिकः क्लेशः। न वा भविष्यति विवादान्तरमिति। 'क्षमं शक्ते हिते युक्ते क्षमावति। क्षमा शान्तौ क्षितौ' इति हैमः। 'क्षमावानेव जयति लोकान्'। इति पाठवैलक्षण्येऽपि अर्थसारूप्यमस्ति। 'क्षमायुक्ताः सर्वं साधयन्ति' इति ग्रन्थान्तरे पाठभेदेऽपि अर्थस्यैकरूप्यात् सूत्रमिदं प्रागुक्तसूत्रार्थस्य स्पष्टीकरणार्थमिति प्रतीयते ॥ ४२ ॥

आपत्त्राणार्थं धनसञ्चयो न्याय्यस्तदाह आपदिति। धनं वसु मणिमुक्तादिकम्। आपदां विपदामनिष्टपातानाम्। प्रतीकारार्थं निवारणार्थं रक्षार्थं वा। धनं इष्यते आव-

व्यवहारानुलोमो धर्म्मः ॥ ४७ ॥

सर्व्वज्ञता लोकज्ञता ॥ ४८ ॥

क्षिकम्। तत्र कार्य्यान्तरान्तराले प्रत्यूहः कार्य्यान्तरमालस्य-श्चापततीति भावः। प्रागुक्तमन्यत् ॥ ४६ ॥

धर्म्मस्य विशेषभावेन व्यवहारानुयायित्वमाह वेति। व्यव-हारस्यानुलोमः पश्चाद्गामी। यथा पूर्व्व-पूर्व्वव्यवहारो जात-स्तदनुसारी धर्म्मोऽभूत्। व्यवहारो नैतिकं कार्य्यम्। द्दवम्पर-म्पराचरणञ्च। सम्प्रति तदनुलोमः व्यवहार-नियमक्रमेण धर्म्मश्च स्यात्। अत एव यथा व्यवहारस्तथैव धर्म्मः। साधुषु सत्य-मूलकः शठ-तस्कर-दुर्जनेषु शाठ्यसूचक इति। धर्म्मशास्त्रकृत-स्त्वाहुः 'धर्म्मः पैतामहः स्मृतः'। अन्यच्चोक्तं महर्षिणा—

'येनास्य पितरो याता येन याताः पितामहाः'। इति।

पूर्व्वपितामहैर्यादृशधर्म्मोऽनुष्ठितः तादृशः तत्परजातैरप्यनुष्ठेयः। अन्ये त्वेवं वदन्ति लोकविधारणाद्धर्म्म इति। तथा च महाभारते—

धारणाद्धर्म्म इत्याहुर्न लोकचरितञ्चरेत्'।

लोकैश्छाकल्पितो न धर्म्मस्तस्य सनातनत्वात्, लोकमति बाहु-ल्याद्धर्म्मबाहुल्यञ्च स्यात्। प्राक् प्रपञ्चितमन्यत् ॥ ४७ ॥

सर्व्वज्ञत्वस्य लोकज्ञत्वमाह सर्व्व इति। सर्व्वज्ञता सकल-विषय-वेत्तृत्वम्, सकलविषयाभिज्ञता विशेषनैपुण्यमिति यावत्। सातु लोकज्ञता। लोकतत्त्वज्ञत्वं भवति। यात्वोर्ध्वरे यावं ...षु च परमाणम्। यावं सिन्धोरावं उदबिन्दुं यावत्

शास्त्रप्रयोजनं तत्त्वदर्शनम् ॥ ५० ॥

तत्त्वज्ञानं कार्य्यमेव प्रकाशयति ॥ ५१ ॥

स्वेच्छया यो वर्त्तते सविवेकहीनः कार्य्य-साफल्यवर्जितः । 'अज्ञ मूढ़ यथाजात मूर्ख वैधेय बालिशाः' इत्यमरः । तत्रैव 'लोकस्तु भुवने जने, इति । लोकज्ञतायाः सतत प्रयोजनीयत्वात्तस्य प्राधान्यमत्र कीर्त्तितम् । मूर्खः । मुह वैचित्त्ये, मुह्यति । 'मुहेः खोमूर्च' इति सिद्धम् ॥ ४८ ॥

वस्तुतत्त्वदर्शने अलौकिकज्ञाने च शास्त्रस्यावश्यकत्वमाह शास्त्रमिति । शास्त्रस्य प्रागुक्तस्य अर्थवेदादेः । प्रयोजनम् आवश्यकमभीष्टमिति । तत्त्व तत्त्वस्य पदार्थयाथार्थ्यस्य लौकिकालौकिकपदार्थरहस्य वा । दर्शनं ज्ञानम् । शास्त्रं प्रयोजनम् यस्मिन् तत्त्वज्ञाने तत् । उक्तञ्च विष्णुना—

'अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शनम् ।

सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः' ॥

यः शास्त्रज्ञानहीनः स चक्षुष्मानपि तत्त्वम् न पश्यति । अन्धश्च चक्षुषोर्द्दृष्टिशक्तेरभावान्नावलोकयति । 'निदेश-ग्रन्थयोः शास्त्रम्' इत्यमरः । 'तत्त्वं ब्रह्मणि याथार्थ्ये धर्म्मे साधारणेऽपि च' इति । प्रयोजनमिति । युजिर योगे, प्रयुज्यते । 'कृत्यल्युटो बहुलम्' इत्यनेन ल्युट् । विषयतत्त्वज्ञाने नीतिशास्त्रस्य सम्यगावश्यकत्वम् ॥ ५० ॥

प्रागुक्ततत्त्वज्ञानस्य फलमाह तत्त्वज्ञानमिति । तत्त्वज्ञानं

अपक्षपातेन व्यवहारः कर्त्तव्यः ॥ ५२ ॥

पदार्थयाथार्थ्यबोधः । यथार्थप्रतीतिश्च । कार्य्यं विषयमेव निश्चितम्, प्रकाशयति प्रभावयति । यदा न्यायमते तत्त्वानि षोडश । सांख्यमते चतुर्विंशतिः । वैशेषिकमते षट् तत्त्वानि । नीतिशास्त्रे तत्त्वानि च त्रिवर्गः । धर्म्मार्थकामाः । सामादिचतुष्टये उपायाः । सन्ध्यादयः षट् । वार्त्तायां—कृषि गोरक्ष-वाणिज्यानि । राज्याङ्गानि सप्त । षोडश मण्डलानि च पुष्कल-मर्थशास्त्रेऽपि । एतत्तत्त्वज्ञानेन विषयावबोधः प्रजायते नान्यथेति । शास्त्रपाठेन विना न सम्यक्तत्त्वज्ञानम् । तत्त्वज्ञानेन विना नापि सूक्ष्मविषये प्रतीतिरिति रहस्यम् । अथवा तत्त्वं साधारणम् । साधारणविषयज्ञानेन शिल्पादि विषये प्रत्याययति । तत्त्वमिति । ततनं तत् । सम्पदादित्वात् क्विप् । तदस्यास्तीति 'व-प्रकारेऽन्यत्रापि' इति वः । 'तयोः सत्वयौ' इति भत्वा-च लत्वम् ॥ ५१ ॥

पक्षपातरहित-व्यवहारस्यौचित्यमाह यतेति । द्वयोरेकतरः पक्षः । तयोरेकस्यानुकूल्यं पक्षपातः । तत्र नञ् समासः । कार्य्यकाले पक्षपातरहितेन व्यवहारः आचरणं कर्त्तव्यम् । तेन सम्यक्त्वा कार्य्यमीक्ष्यश्च । अन्यथा तु तादृश व्यवहारे स्वपरानिष्ट कार्य्यहानिर्दुर्नीतिश्च प्रवर्त्तेत । सभायेषु पक्षपातकरणे विचारकाले वा न्याय-गर्हितं तेन लोकविक्षोभश्च स्यात् अतो माध्यस्थेन भवितव्यम् । यदा धर्म्माधिकरणे विचाराद

धर्मादपि व्यवहारो गरीयान् ॥ ५३ ॥

आत्मा हि व्यवहारस्य साक्षी ॥ ५४ ॥

मध्यस्थत्वे च पक्षपातो न कार्यः । एवं साक्ष्यप्रदानेऽपि । पक्षपात करणे धर्महानिर्नीति प्रातिकूल्यञ्च भवेदिति ॥ ५२ ॥

व्यवहारस्य प्राचुर्यात्लोकस्थितिर्हेतुत्वाच्च, स च धर्मतः श्रेष्ठ इत्याह धर्मादिति । व्यवहारो वृद्धपरम्परागताचारः लोकोपचारः कार्य्यानुष्ठानमिति यावत् । यद्वा अर्थशास्त्रविधानं व्यवहारः । वार्त्ताचैतदन्तर्गता । अन्यदुक्तं कात्यायनेन—

'वि-नानार्थे अव-सन्देहे हरणं हार उच्यते ।

नानासन्देह-हरणाद् व्यवहार इति स्मृतः' ॥

इति प्रागुक्तम् । सच धर्माद्गरीयान् धर्मादपि श्रेष्ठः । धर्मानुष्ठानात् सततं व्यवहारस्य बाहुल्यात् । व्यवहारं विना प्रात्यहिकं कार्य्यं न प्रचलति । व्यवहारस्तु नीतिमूलकः । तेनास्य श्रेष्ठत्वम् । धर्मतत्त्वमजानन्तोऽपि व्यवहार-निपुणा दृश्यन्ते । 'व्यवहारः स्थितौ पणे द्रुमेहे' इति हैमः । व्यवह्रियते अनेनेति व्यवपूर्वाद्धर्तेर्घञा सिद्धः । ५३ ॥

आत्मनः सर्वव्यवहार साक्षित्वमाह आत्मेति । आत्मा जीवो मनो वा । 'आत्मवान् राजेति' वार्हस्पत्यसूत्रे आत्मपदार्थम् मन एव । एवमेव भारतव्याख्याने नीलकण्ठोऽप्याह । आत्मपदार्थविषये यथा दर्शनानां विप्रतिपत्तयः सन्ति । तत्र विचार-

सर्व्वसाक्षी ह्यात्मा ॥ ५५ ॥

भिया मोक्षावनुपयोगित्वेन च नोच्यते। स चात्मा लोकानुवि येन यत्कृतं तत्सर्वस्य साक्षाद्द्रष्टृत्वेन् साक्षी, प्रत्यक्षद्रष्टा भवति। तं विना कार्य्यानुपपत्तेः। साक्षीति। 'साक्षाद्द्रष्टरि संज्ञायामिति' निपातनात् सिद्धम्। मत्तः पक्षे तु तदगोचरे किमपि मोक्षानुष्ठितं कर्म्म नास्ति।

'आत्मा कलेवरे यत्ने स्वभावे परमात्मनि।
चित्ते धृतौ च बुद्धौ च परव्यावर्त्तनेऽपि च'॥

इति धरणिः। पदनिरुक्तिः पूर्व्वात्मा ॥ ५४ ॥

पूर्व्वमात्म-सामान्यरूपेणात्मनः साक्षित्वमुक्त्वा सम्प्रति सर्व्व-कर्म्म साक्षित्वमाह सर्व्वेति। सर्व्वेषां कर्म्मणां तत्फलानां-शुभा-शुभानाञ्च हि निश्चितम् आत्मा साक्षात् प्रत्यक्षद्रष्टा भवति। तेन विना सकल-कर्म्मानुष्ठानानुपपत्तेः। 'सत्यसाक्षी ह्यात्मा' इति पाठ-भेदप्ये सत्यस्य शुभकर्म्मणः। यद्वा यथार्थस्य जगद्विषयनिकरस्य साक्षीत्यर्थः। नेदं सूत्रं पूर्व्वसूत्रेण गतार्थम्। तत्र सामान्यतः व्यवहारमात्रस्य आत्मा सता लौकिकालौकिक सर्व्वसाक्षी। अत्र तूपलक्षणेन सत्यासत्य-सकलविषयस्य। आत्मनः साक्षित्वं सांख्यमते साध्यस्यम्। वेदान्तमते साक्षिचेतन्यम्। तथा च श्रुतिः 'साक्षी चेता केवलो निर्गुणश्च' इति। सत्यं यथावस्थित-

नच कूटसाक्षी स्यात् ॥ ५६ ॥

'अश्वमेध सहस्रञ्च सत्यञ्च तुलया धृतम् ।
अश्वमेध सहस्राद्धि सत्यमेवातिरिच्यते' ॥ इति ।

पदनिरुक्तयादिकं प्रागुक्तम् ॥ ५५ ॥

कूटसाक्ष्यदाने निषेधमाह न चेति। कदापि साक्ष्यदाने कूटसाक्षी न भवेत्तेन सत्यावरणं परवञ्चनं समाजगर्हा च भवेत् कूटो मिथ्या शाठ्यं कापट्यञ्चाव बोध्यम्। एवं दृष्ट्वा श्रुत्वा ज्ञात्वा च अन्यथा साक्ष्यदानं कूटत्वम्। तदुक्तं याज्ञवल्क्येन—

'न ददाति हि यः साक्ष्यं जानन्नपि नराधमः ।
स कूटसाक्षिणां पापैः तुल्यो दण्डेन चैव हि' ॥

तत्र कात्यायनश्चाह—

'अवीचिनरके वर्षं वसेयुः कूटसाक्षिणः' इति ।

यद्वा कूटेन वक्ररीत्या वर्त्तते साक्षी कूटसाक्षी। कूटसाक्षी-गूढ़साक्षि-मिथ्यासाक्षि प्रभृति भेदेन साक्षिणो बहुविधाः। साक्ष्यान्यथा कथनेन प्रत्यवायो स्यात्। यथा च—

'पृष्टो हि साक्षी यः साक्ष्यं जानन्नप्यन्यथा वदेत् ।
स पूर्व्वानात्मनः सप्त कुले हन्यात्तथापरान्' ॥

अन्यत्र—

'यस्य कार्य्यार्थे तत्त्वज्ञो जानन्नपि न भाषते ।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः' ॥

कूटसाक्षिणो नरके पतन्ति ॥ ५७ ॥
न कश्चिन्नाशयति समुद्धरति वा ॥५८॥

इति भारते आदिपर्व्वणि । अन्यदपि व्यवहारतत्त्वे मानवे सप्तमाध्याये च ॥ ५६ ॥

कूटसाक्ष्यदानस्य फलमाह कूटेति । कूटसाक्षिणो जनाः नरके घोरये परस्मिन् काले । अक्षिय दुःखे जन्मद्वयेहे च पतन्ति यान्ति । 'पितृभिः सह नरके निमज्जति कूटसाक्षी' इत्थं पाठभेदेन अर्थमात्रमस्ति । 'कूट पूर्त्ति यन्त्रयोः । माया-दम्भादिष्वङ्गेषु घोराद्रेऽनृत-शुष्कयोः । निश्चले आयोघने राशौ' इति हैमः । कूट अप्रदाने । कूट दाहे सन्तथे च, कूटयति । कूट्यते वा । ततोऽचा घञा वा सिद्धम् केचित्तु 'इगुपधत्वात्' कमत्यय इत्युक्तम् । तत्र कूटधातोरुपधादित्वेन निरूक्त्यादिगुरु-धत्वाभावाच । निश्चोऽप्याधि वैति अचप्रत्यय इष्यते ॥ ५७ ॥

प्रागुक्त कूटसाक्षिणः वैफल्यमाह नेति । पूर्वोक्त कूटसाक्ष्य-प्रदानेन कोऽपि आत्मा न कश्चन जनं भूभागं वा नाशयति कदा न कञ्चन समुद्धरति त्रायति च । यत्तु विवाहादि विषये मिथ्या-भाषणेऽपि दोषमुक्तं तदपि नासत्यपरत्वेन । नीतिविहित काल-नादि-चौर इत्य धामर ऋतेषु यथा आपद्युक्तम् । सत्या-भावात् कोऽपीदानिष्टानिवारयति । एवंतु नासाम्बतां वैकल्य-मुक्तम् । सामान्यत. कूटसाक्ष्यदाने अतः नर परत्रापि नाश-

प्रच्छन्न-पापानां साक्षिणो महाभूतानि ॥५८॥
आत्मनः पापमात्मैव प्रकाशयति ॥६०॥

यतो'ति न्यायप्रसङ्गापातः । माध्यस्य मिथ्यात्वप्रकाशे उपचयादपचयोऽधिकः । धर्म्मशास्त्रे तस्य सम्यग्विगानमस्ति ॥ ५८ ॥

गुप्तानुष्ठितपापानां साक्षिणमाह प्रेति । प्रच्छन्नपापानाम् प्रच्छन्नं गुप्तमज्ञातमिति यावत् । तादृक्पापं दुरितं येषां तेषां जनानाम् । दुष्कृति-साक्षिणो महाभूतानि क्षित्यादि पञ्चसंज्ञकानि बहिरन्तः स्थितानि साक्षाद्द्रष्टारो भवन्ति । अन्ये पश्यन्तु मा वा पश्यन्तु एते मनोवचियतं देहे स्थिता पश्यन्त्येव । क्षित्यादयः पञ्चमहाभूतानि पञ्चतन्मात्रेभ्यो जातानि । तथा च कापिलं सूत्रम् 'स्थूलात् पञ्चतन्मात्रस्य' इति । धर्म्मशास्त्रकृताप्युक्तं 'महाभूतानि पञ्च च एते शुभाशुभस्येह कर्म्मणो नव-साक्षिणः' । अन्यत्र चोक्तं मन्वशास्त्रविद्भिः—

'आदित्य-चन्द्रावनिलोऽनलश्च,
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये,
धर्म्मो हि जानाति नरस्य वृत्तम्' ॥ इति ।

'गुप्तमन्तरितं प्रच्छन्नमावृतं रहस्यं कृतम्' इति कोषः ॥५८॥

स्वकृतपापस्य स्वयं प्रकाशकस्तदाह आत्मेति । [आत्मनः स्वस्य । पापं दुरितं यत्तदात्मैव मन एवानुभूय प्रकाशयति प्रकटी करोति । तदगोचरं तदभावात् । समये कार्य्यप्रसङ्गे च स्वकृत-

व्यवहारेऽप्यगर्हिताकारः सूचयति ॥ ६१ ॥

पापं स्वयमिव व्यक्तीकरोतीति। 'प्रच्छन्नं यत्कृतमन्यदपि न प्रच्छन्न-मात्मनः' इति पाठेऽपि सति येन पुंसा यत् पापं [illegible] तदन्यस्य सर्वाधिकृतोऽपि तदनुष्ठातुराकारो वाचापि चेष्टा-यापि च सव्यञ्जनमनुभूतमिव प्रवर्तीति। तदुक्तं स्मृतौ—

'मानसं मनसैवेदमुपभुङ्क्ते शुभाशुभम्।

वाचा वाचा कृतं कर्म कायेनैव तु कायिकम्' ॥ इति।

भारतेऽपि च—

'मन एव मनुष्याणां कारणं बन्धमोक्षयोः' । इति च।

यदा [illegible] [illegible] [illegible] प्रव्रजयति ॥ ६० ॥

व्यवहारेण [illegible] [illegible] [illegible] इति। व्यवहारे लौकिके [illegible] वा। [illegible] [illegible] [illegible] [illegible] [illegible]। तदुक्तम्

'[illegible]।

[illegible]' इति।

यदा [illegible]

[illegible]

[illegible]

आकार सम्वरणन्देवानामशक्यम् ॥ ६२ ॥
सुदर्शना हि राजानः प्रजा रञ्जयन्ति ॥ ६३ ॥

लोको व्यवहारकाले चिन्तया मनोगतभावं प्रच्छाद्यान्यद्ब्रवीति। तथः, प्रश्न-प्रतिवाक्य-वितर्कैश्च यत् प्रच्छन्नं तदनुमीयते ॥ ६१ ॥

कार्यकाले बुद्धिमतां सविधावाकार गोपनस्य दुःसाध्यत्वमाह आकारेति। आकारस्य वस्त्वाकृतेः स्वरूपस्य यत् सम्वरणं गुप्तिर्निह्नव इति यावत्। तद्देवानाममराणामप्यशक्यं दुःसाध्यं सामर्थ्यातीतम्। का कथा मनुजानाम्। आकारस्य सम्वरणमिति षष्ठीतत्पुरुषः। 'आकाराविङ्गिताकृती' इत्यमरः। यद्वा शाठ्येन शोकोन्मादनादिनाचाकारस्य निह्नवकरणम्। धीमता तु नयनदृष्टिसञ्चालनेन वाग्भङ्ग्या तज्ज्ञातुं शक्यते। स्थिरदृष्टिः स्थिरवाक् यचिन्त्यकथनं ययाकारप्रकाशे शिष्टस्य हेतुः। शिष्टस्य लक्षणं पूर्वमुक्तम्।

अशिष्टस्याप्रकृतिस्थस्यैतद्विरुद्धम्। 'आकारसम्वरणम् अकारणा वार्ता राजपुरुषेभ्यो नित्यं रक्षेत्' ईदृशो पाठान्तरे राजपुरुषेभ्यः नृपामात्यादिभ्य नित्यं सततमाकारसम्वरणमनिष्टभिया। लोकादकारणा कारणशून्या वार्ताऽपि भेभ्यय रक्षेदिति ॥ ६२ ॥

भूपालस्य प्रजारञ्जनं सौम्यत्वहेतुमाह स्विति। सुदर्शनाः शोभनदर्शनाः। गुण-गौरव-शौर्य-प्रज्ञा-दयाभिमण्डिताः। शोभनं येषां ते इति बहुव्रीहिः। तादृशाः सौम्यदृष्टयो भूपाः

चौरराजपुरुषेभ्यो वित्तं रक्षेत् ॥ ६४ ॥

प्रजाः अनिशम् रञ्जयन्ति प्रीणयन्ति । तदुक्तं महाकविना 'राजा प्रकृतिरञ्जनात्' इति । पाणिनिनापि 'किमः क्षेपे' सूत्रम् । यो न रक्षति प्रजाः स किं राजा इति क्षेपाभिधान-दर्शनाद् राज्ञः प्रजासु सौम्यदर्शनं शुभम् । अन्यत्र केयो राजा किं राज इति टच्प्रत्ययात् सिद्धम् । तत्र तु 'न किमः क्षेपे' इति प्रत्ययनिषेधः । भूमिपो यदि स्नेह-दयाऽभय दर्शनैः सर्वाः प्रजाः पालयति तदा ते अनुरक्ताः प्रीताः सुखिनश्च भवन्ति । प्रजानां नरेश-शासनं सततं शिरोधार्यं पालनीयञ्चेति । चन्द्रचक्रनीतौ भारते राजर्षौ चास्ति । प्रागुक्ता पदनिरुक्तिः ॥ ६२ ॥

चौरादिभ्यो धनरक्षणोपदेशमाह चौर इति । चौरास्तस्करा दस्यवश्च । एभ्यो वैधावैधाभ्यामुपायाभ्यां धनं रक्षेत् । राजपुरुषेभ्यो वैधोपायेन धनं सञ्चिनुयात् । राजपुरुषा राजामात्यादयः । चौरादयो बलादसदुपायेन च वित्तमपहरेयुः । राजपुरुषा नानाविध-करायादान-कौशलेन च वित्तं नयन्ति । तेभ्यः धनं नीति-नैपुण्येन रक्षेत् । समुद्दत्त-धनस्य हिताय धर्माय च व्ययं कुर्यात् यत —

'उपार्जितानां वित्तानां त्याग एव हि रक्षणम्' ।

त्यागः सन्निमित्ते मतः निन्द्ये विषये । सन्मार्गे त्यागाभावे अपमार्गे वित्तं यास्यत्येवेति । प्रागुक्तमन्यत् ॥ ६४ ॥

दुर्दर्शना हि राजानः प्रजा विनाशयन्ति ॥६५॥

न्यायवर्त्तिनं राजानं मातरमिव मन्यन्ते प्रजाः ॥ ६६ ॥

नीतिहीनानां भूपानां प्रजाहानिकारकत्वमाह दुरिति। दुर्दुःखेन दुर्लभो वा दर्शनं येषां ते दुर्दर्शनाः नृपाः। तेषां दर्शनं कदाचिन्नीयदशायां प्रजाः कुर्वन्ति। नृपश्चावहितत्वाद् दुर्वर्त्तित्वाच्च प्रजाभ्यो दर्शनं ददाति। तदा तेन तयोः महान् हानिः स्यात्। हितञ्च पराहत भवति। प्रजानां विशेषतो राजभक्तिः सुविचारलाभश्च दुर्लभः, तेन न्यायविचारस्य क्षतिः। यदा दोषः क्रोध दर्शना-नृपाःप्रजानामहितमाचरन्ति। प्रजाः क्रमशः समुच्छेदयन्ति च। शासन-सौकर्याभावाच्च प्रजाहानमवश्यं स्यादेव। अतः प्रजासु सौम्यदर्शन नृपतेः राष्ट्र-हितकरम्। यत्—

'प्रत्यासन्नाश्च राजानः पतन्ति दैवत स्मृताः'।

इत्युपद्रवहेतुत्वमुक्त तद्विवेकहीन-राजविषये सर्वदा सविहित नृपविषये च ज्ञेयम् ॥ ६५ ॥

न्यायेन प्रजापालनतत्परस्य राज्ञ मातृतुल्यत्वमाह न्यायेति न्यायवर्त्तिनं नीतिपूर्णं सुनीतिपरायण सुनृपतिमिति। प्रजाः करदातृसमूहः जनाः। ते च भूमिपालं हिताद्याधारत्वेन

तादृशः स राजा इह सुखं ततः स्वर्ग-
माप्नोति ॥ ९७ ॥

मातरमिव जननीं पितृ मन्यन्ते जानन्ति । नहि केवलं मातरं पितरञ्चेति । तदुक्तं महाकविना—

'प्रजानां विनयाधानाद् रक्षणाद्भरणादपि ।

स पिता' इत्याद्युक्तं प्राक् ।

एभिर्गुणैर्भगवदादृतोऽपि भूमिपः श्रेष्ठः । यथा हि जननी स्नेह-भावेन पालन-विपत्तारणादिना स्वसुतान् रक्षति तथा क्षितिपोऽपि करोति । 'जनयित्री प्रसूर्माता जननी' इति कोषः । यत्र देशे एवं नृपः स राजन्वानिति । प्रजाश्च तादृश-नृपादेशवर्त्तिनः सुखिनश्चेति ॥ ९६ ॥

अथ नृपतेः सुशासनफलमाह तादृश इति । तादृशो न्याय-धर्मरतः प्रजापालनतत्परः । राजा भूभुक् । स पूर्वोक्तः । इहास्मिन् लोके सुखम् । ततः परत्र स्वर्गममरधामाप्नोति लभते । न्याय-धर्मतः प्रजापालना दैहिकामुष्मिकं सुखं स्वर्गश्च निर्विशेषो भवति । परत्रेऽन्यत् पश्चाद् वक्ष्यते ।

गीतायाञ्च—

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः' ।

सुष्ठु अर्ज्यते इति स्वर्गः । अर्ज अर्जने, ततः कर्मणि घञ्प्रत्ययः ।
अपरं प्रागुक्तम् ॥ ९७ ॥

चोरांश्च कण्टकांश्च सततं नाशयेत् ॥९८

स्वधर्म्मानुष्ठानादेव सुखमवाप्यते स्वर्गम् प्नोति ॥ ९९ ॥

दुष्टानां दमने उपदेशमाह चोरांश्चेति। चोरांश्च तस्करान् पाटच्चरानिति। कण्टकान् क्षुद्रशत्रून् नियतानिष्टकारिणः। सततं निरन्तरम्। नाशयेत् कौशलेन बलेन वा समुत्सारयेत्।

'कण्टकः क्षुद्रशत्रौ च कर्म्मस्थानक-दोषयोः'।

'कण्टको न स्त्रियां क्षुद्र-शत्रौ मत्स्यादिकोकसे'।

इति विश्व-मेदिन्यौ। एतेषां निःशेषः कार्य्यः। सत्त्वशिष्टे पश्चाद्द्विगुणत्वेन वर्द्धते। ततः एषां सम्यक् समुच्छेदो विधेयः। तदुक्तम्—

'ऋण-व्याधि-शत्रु-वह्नीनां निःशेषमपि शेषयेत्'।

यदि कौशल-शक्तिविरहितस्तदा तूष्णीमवतिष्ठेत प्रबलं वा शरणं यायात्। कटि गतौ, कण्टति। ततो ण्वुल् ॥ ९८ ॥

स्वधर्म्मानुष्ठानस्य फलमाह स्वेति। स्वधर्म्मानुष्ठानात् स्वकुल-धर्म्माचरणादिहलोके विशेषसुखमवाप्यते। परलोके तस्मात् स्वर्गमवाप्नुयात्। तदुक्तं महर्षि कणादेन 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्म्मः' इति। 'धर्म्मेण गमनमूर्द्ध्वं गमनमधस्ताद्भवत्यधर्म्मेण' इत्यपीश्वरकृष्णोक्तिः प्रागुक्ता। अन्यच्च—

अहिंसा लक्षणो धर्मः ॥ ७० ॥
स्वशरीरमिव परशरीरं मन्यते साधुः ॥ ७१ ॥

'धर्मेण हि सहायेन तमस्तरति दुस्तरम्' इति । अधर्मेण दुःखमभिवार्य्यम् । त्रिवर्गे धर्मानुष्ठानमन्तरा हि इदं सर्वं मनोमलत्वमासदति । पूर्व्वापर संक्षेपविस्तररूपेणोभयो-रप्यर्थान् कथनादिति । प्राक् संक्षेपेणोक्ता ग्रन्थावसाने यथावि-स्ताररूपेणोक्तिः ॥ ६८ ॥

धर्मस्य सामान्यलक्षणमाह अहिंसेति । अहिंसा सर्व्वभूतेषु आत्मवज्ज्ञानम् । सैव लक्षणं स्वरूपपरिचायकं यस्य सः । सच धर्म्मो लोक-विधारकः । तथा च श्रुतिः 'मा हिंस्यात् सर्व्वा भूतानि' । 'स्वधिते मैनं हिंसि' इति । स्मृतिश्च 'अहिंसा प्रतिष्ठायां सर्व्वविधो वैरत्यागः' इति योगदर्शने । अन्यत्र 'अहिंसा परमो धर्म्मः' । भूतोपद्रवतद्वधजनितम् धर्मेव नहि पापं व्यपोहति । एवमेव जैनैर्बौद्धैरप्युक्तम् । तथा च स्मृतिः—

'यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् ।
भूतहत्यां तथैवैका न यज्ञैर्मार्ष्टुमर्हति' ॥ इति ।

मनुनापि सामाजिकधर्मलक्षणे तदुक्तम् । श्लोकधर्मलक्षणेन विश्वासः स्वधर्मे निष्ठा तद्बोधक शास्त्रे श्रद्धा च ध्येयेति ॥ ७० ॥

साधोः स्वपरशरीराभेदव्यवहारमाह स्वेति । स्वशरीरमिव

सर्व्वत्र मान्यं भंगयति बालिशः ॥७२॥

स्वस्यात्मनः शरीरवत् परस्याप्यस्य जीवस्य शरीरं तद्गतसुखदुःखादिकञ्च समानं साधुर्मनसा ज्ञानाध्यारोपेति मन्यते। समात्मदर्शिना साधुना सर्व्वत्रैकात्म्यबुद्ध्या विचरणात् स्वपरभेदाभावेन समज्ञानं जायते। तदुक्तं—

'आत्मौपम्येन सर्व्वत्र समं पश्यन्ति साधवः'। इति।

एतेन स्वदुःखमिव परदुःखं साधुः मन्यतेति सारः। तेन महत्त्वमपि प्रतिष्ठितं भवति। सामाजिकेषु मानसौमनस्यं परिवर्द्धते। परविद्वेषस्य गीतायामपि विगानमुक्तम्। तद्यथा—

'मामात्म-परदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।
तानहं द्विषतः क्रूरान् संसारेषु नराधमान्'॥ इति।

अन्यत् पूर्व्वमुक्तम् ॥ ७१ ॥

अज्ञस्य सर्व्वत्र गौरवज्ञानाभावमाह सर्व्वत्रेति। सर्व्वत्र सर्व्वस्मिन् विषये कर्मणि वा। बालिशः मूढोऽज्ञ इति। मान्यं माननीय सम्मानार्हम्। जन स्थानञ्चेति। भङ्गयति विनाशयति अवजानाति च। मूढस्तु मानापमानज्ञानाभावात् स्वमिव परमप्यवजानाति। यथापणे गच्छन्तं गजं गोमायुरुपहसति। न मान्यस्तादृक् करोति। परन्तु सर्व्वत्र मैत्र्यादि भावनायां लोकाः सुखिनो भवन्ति। श्रेष्ठेषु मैत्री दीनेषु करुणां गुरुषु मुदितां

न संसार-भयं ज्ञानिनाम् ॥ ७४ ॥

इति श्रीकृष्णवाक्योद्धृतम्। निरुक्तञ्चैत—

'विद्वान् बिभेति पापकर्मात् शास्त्रम् याति न दुर्गति'।

इति श्रीमत्। आसिष्टाद्यन्तो निरभिमानमात्रेरैव निर्भयत्वं लभन्ते। किन्तु निरभिमानताभावात् सदा निरभिमानं ज्ञानमेव निर्भयं समारम्भदायकः। यद्यपि समाधिमार्गे मनः स्थितौ वैशेषिका ह्यपि उपासनात्। अस्मत्तत्त्वकौमुदी मीमांसाग्रन्थेषु च सर्वत्रैवमपि। अत्र प्रमाणतेऽत्रतत्त्वमिति ॥ ७३ ॥

ज्ञानिनां तत्त्वदर्शिनां संसारभीतिर्नास्तीत्याह नेति। ज्ञानिनां तत्त्वदर्शिनां संसार-विरागिनामिति। ज्ञानदोषनिवारणोक्तपरिग्रहः संसारः इति साङ्ख्याः। यस्मादयं भीतिस्त्वामो नास्ति लोभ-भोगादि परिहारात्। यस्मिन्नात्मन्यपि न बिभेति कुतश्चनेति श्रुतिवाक्याच्च, कस्मादपि स न बिभ्यति। हिंसादिहारात् न कोऽपि क्वापि तान् हिनस्ति। तदुक्तं भारते—

'अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः।
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित्'।

श्रुतौ पुष्कलं प्रमाणमस्ति। यत्र संसारपदेन प्राप्यपत्ति सर्वस्थिति तद्विधान तदन्तरा द्वन्द्वादिकं निर्दिष्टतो ज्ञेयम्। ज्ञानिनां देहे सर्वं ममाभिमानराहित्यात्तद्भयाभावः। संसारिणान्तु स्वपरभेदज्ञानप्राबल्याद् विषयासक्तत्वाच्च भयं विद्यते एव ॥ ७४ ॥

विज्ञान-दीपेन संसारभयं निवर्त्तते ॥७५॥

विज्ञानफलं प्राधान्यमाह विज्ञानेनेति। विज्ञानमेव दीपः आलोकाधारः तिमिरहारीति। विशेषज्ञानमेव विज्ञानं सांसारिकं तत्त्वज्ञानम्। यद्वा वस्तुनो परमसूक्ष्मज्ञानेन प्रतिभया-भिनवाविष्करणं विज्ञानमिति प्रागुक्तम्। एतच्च शिल्पे नीति-विषये च तेन संसारे सुखादि भोगप्राचुर्यम् परमार्थज्ञानरूप-विज्ञानेन च उत्पत्तिनिधन-शोक-तापादि दुःखनिवृत्तिर्भवति। तदुक्तं गीतायाम्—

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।
तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम्'।

पञ्चदश्येवोक्तं 'ज्ञान-दीपेन भास्वता' इति। 'विज्ञानं कार्त्स्न्यं ज्ञानम्' इति जैनाः। सम्पूर्ण-वस्तुज्ञानञ्च सामान्यज्ञानम्। विशिष्टैर्विद्यावगाहिसूक्ष्मज्ञानं वा विज्ञानम्। कोषे च—

'चतुर्दशानां विद्यानां धारणं हि यदा भवेत्।
विज्ञानमितरद्विद्या येन सर्वं विवर्द्धते'॥

बौद्धास्तु विज्ञानं द्विविधमाहुः। प्रवृत्तिविज्ञानम्, आलयविज्ञानञ्चेति। घटपटादिविज्ञानं प्रवृत्तिविज्ञानम्। अहमस्मीत्या-काराऽऽलयविज्ञानम्। अत्र तु विज्ञानदीपेन [illegible] [illegible] [illegible] दीपालोकवत् [illegible] [illegible] [illegible] विषयकार्यदीपेनैव तत्त्वानि निरूपितं ॥७५॥

सर्वमनित्यमध्रुवम् ॥ ७६ ॥

स्वदेहे देहिनामतिमहती ॥ ७७ ॥

सांसारिक-विषयस्य अनित्यत्वमाह सर्वमिति। यच्च यद् यद् दृश्यते तत्सर्वं एव नश्वरत्वादनित्यम्। अनित्यं विनाशि। अध्रुवं चञ्चलम्। यथा घटपटस्तम्भादिकं, जन्मवत्त्वेन नाशवत्तथा धूलिरिति। सांसारिकं यद् वस्त्वास्ते, धनादिविषयास्तदाश्रयोऽपि तथाऽस्यापि-कालानुसारेण नाशस्य लोकानामनुभूय समस्तमुक्तात्मा मतिमतां आप्ये सम्पाद्यमिति भावः। अर्थशास्त्रज्ञ आह:—

'अनित्या वाग्भुजाः सर्वं सम्पदस्त्वाश्च सम्पदा।

शरीरिणां ध्रुवो मृत्युस्तस्मात्सत्यमनुस्मरेत्' । इति।

'सर्वमनित्य'मिति सुखस्यपाठभेदेनस्वर्गेऽपि अर्थकाठिन्याभावः। 'परमेश्वरातिरिक्तं सर्वमनित्यमिति' वेदान्तिनः प्रोचुः। तस्मादमर्वे परमेशबुद्धि-समुन्मेषायैव प्रारभ्य सूत्राणि उच्यन्ते। अध्रुवपदेन विषयविनाशप्यायस्यम्भाविता दर्शितेति भावः॥ ७६॥

देहात्मबुद्धि-प्राबल्यमाह स्वदेह इति। देहिनां देहधारिणां जीवानाम्। स्वस्यात्मनो देहे। अति महती बुद्धिरिच्छा वा देहरक्षार्थं निरन्तरमुत्पद्यते। अत्र बुद्धिरित्यूह्यम्। यथा संसारयात्रानिर्वाहार्थं लोकानां बुद्धिर्बलवती भवति। ततोऽधिकं देहरक्षण-भरणार्थञ्च बुद्धेः प्राबल्यम्भवति। सा च साधारणलोकानां प्रबला दृश्यते। तदुक्तं सूरिभिः—

कृमिशकृन्मूत्रभाजनं शरीरं पुण्यपापजन्महेतुः ॥ ७८ ॥

'भोजनाच्छादने चिन्ता प्रबला प्राकृते जने ।
देहेऽधिका तथा तस्य दुर्बला मतिमत्सु सा' ॥ इति ।

'स्वदेहे देहिनां मतिर्बंहती'ति पाठः श्रेयान् स्यात् । ग्रन्थान्तरे एवमिदं नोपलभ्यते । देहे स्थिते सर्वे विषयो प्राप्तुं शक्यन्ते, तदभावेऽन्यदस्तु मास्तु चेति देहस्थितिज्ञानं प्रबलं लोकेषु ॥७७॥

जीवदेहस्य पुण्यदुष्कृतोत्पत्तिहेतुत्वमाह कृमीति । कृमिः क्षुद्रकीटः । शकृत् पुरीषम् । मूत्रं प्रस्रावः । भाजनादेतेषां द्वन्द्वः पश्चात् शरीरपदेन षष्ठीतत्पुरुषः । एतेषां कृम्यादीनाम् । शरीरं देहः । पुण्यं सुकृतिः । पापं दुःखाद्युत्पादकं दुष्कृतम् । तयोर्जन्म उद्भवः । एतयोरपि शरीरं हेतुः कारणम् । यतः शरीरं विना नैव कृम्यादीनां व्यापारसम्भवात् । तदुक्तं मैत्रायणश्रुतौ 'शरीरमिदं मैथुनादेवोद्भूतं संवृद्ध्युपेतं निरयद्वारेण निष्क्रान्तं अस्थिभिश्चितं मांसेनानुलिप्तं चर्मणावनद्धम्' इति । व्यासभाष्येऽप्युक्तं

'स्थानाद्बीजादुपष्टम्भान्निस्यन्दान्निधनादपि ।
कायमाधेयशौचत्वात् पण्डिता ह्यशुचिं विदुः' ॥ इति च ।

शोच्यमिति व्याख्यादिभिः शरीरम् । एकस्मिन्नपि शरीरेऽस्मिन् एवं विभागस्तत्र पुण्यपापे एव जनकहेतु इति पृथक् सूत्रान्तरमहित-

जन्ममरणादिषु दुःखमेव ॥ ७९ ॥
तपसा स्वर्गमवाप्नोति ॥ ८० ॥

मस्ति। तयोः पार्थक्येऽर्थोपलब्धौ विशेषसौकर्यं नास्तीत्यतः अनादृतपाठन्तदिति ॥ ७८ ॥

जीवस्य जन्मादिभिर्दुःखोत्पत्तिमाह जन्मेति जन्म प्राणुत्पत्तिः तदुक्तं कौमुद्यां मिश्रैः 'निकायविशिष्टाभिरभिरपूर्वदेहेन्द्रियबुद्धि-वेदनाभिः पुरुषस्य सम्बन्धो जन्म' इति। मरणं निधनं तत्तेषां संयोगविशेषहानम्, ते चोत्पत्तिनिधने आदिर्येषां रोग-शोक-ताप-बन्धन व्यसनानां तेषु। तेषु च मानवानां केवलं दुःखमेव क्लेश एव नतु सुखम्। यद् वैषयिकं सुखं तत्तिमिरे ज्योतिरिङ्गणालोकदर्शनवदिति वेदान्तिनः। प्रकृते तु महामतीनां विपुल-धने सत्त्वे तेन कालेऽस्मिन् अमितसुखमुत्पद्यते। यस्य तु इहलोके सुखलेशो नास्ति तस्यामुत्र सुखं कुत इति नीतिशरणाः। योगिभिरुक्तं 'दुःखबहुलः संसारो हेयः' इति। पदनिरुक्त्यादिकं प्रागुक्तम् ॥ ७९ ॥

तपसः स्वर्गहेतुत्वमाह तपसेति। तपसा कृच्छ्रचान्द्रायणादिना इन्द्रमहनेन देवाराधनेन। स्वर्गं अमरधाम नित्य सुखविशेषं। अवाप्नोति तद्बलेन लभते। तथा च श्रुतिः 'तपसा चीयते ब्रह्म' इति। स्मृतिश्च—

'बहवो ज्ञान तपसा पूता मद्भावमागताः'।

तस्मात् सर्वाः कार्यसिद्धिरिति ॥ ८२ ॥

'विप्रयोगेऽपि भवेत् समागमोदयावतः ।
तथा तथा च विशाले भवत्येव दृशः शमः ।
सुदृशम् समागमः न सुखेन लब्धा भवेत्' इति

गाथा च —

'एकः समागमो दाता द्वितीयो मोदवर्धनं ।
यदेवं समागमानन्दं मन्यते जनः' । इति ।

प्रसङ्गादस्य पुनरुच्यते —

'सदा लिखिता पृथ्वी च योग्ये यात्रे हिते चलम्' ।

इति धर्मे । यदादितत्त्वादि प्राकृतम् ॥ ८१ ॥

काव्यमिदं कारणमपि तस्मादिति । तस्मादशेषक्रमगम्यमानत्वात् । सर्वथा अनायासम् । यस्मिन् संसारे कार्याणां सिद्धिः निष्पत्तिर्भवति । यद्वा ग्रन्थे ऽस्मिन् तस्मादादितः सकल-नीतिसारोपदेशात्मकत्वकथनाच्च । एतानुपदेशाननुसृत्य ये कार्यं कुर्वन्ति तेषां सर्वथा कार्यमवश्यं निष्पद्यते । अत्र सिद्धिपदोपादानाद् ग्रन्थकृता ऽन्त्यमङ्गलं सूचितम् । इतः परं केवल विषयाः सन्ति यादृशग्रन्थान्तराणां, ते चालोपयोगित्वेनास्मा ग्रन्थस्य चोद्धृत्य व्याख्यायन्ते ॥ ८२ ॥

सतां मतो साक् कात्रधर्मभिः शिलपाक्षगरोर त्रिराभिः। विहितेषु शास्त्रोपदिष्टेषु कार्य्येषु। तदन्येषु अविहितेषु अनुपदिष्टेषु अधर्मेषु च। प्रवृत्तौ वा इष्टसाधनताज्ञानजनितबुद्धौ। सामान्यप्रवृत्तौ च। निवृत्तौ द्विष्टसाधनताज्ञानजनित बुद्धौ अगत्या कार्य्यनिवृत्तौ च। आर्जवं सारल्यमौदार्यञ्च। ऐकरूप्यं ननु सत्यासत्ययुक्तम्। कौशलेन नानारूपत्वं वा। तदुक्तं 'चित्ते वाचि क्रियायाञ्च महतामेकरूपते'ति। सूरिवर्य्येण चाणक्येन अर्थशास्त्रे नीतिविषयाः सुबहुधा प्रौढ़-रीत्या प्रपञ्चिताः। अत्र सूत्रात्मकग्रन्थे स्वल्पतया सरलमतीनामवबोधाय ते विषया गुम्फिताः ॥ १ ॥

अश्वा नागाः स्यन्दनानाञ्च सङ्घाः,
मन्त्राः शुद्धा दैवतञ्चानुकूलम् ।
एतान्याहुः साधनानि ग्राम्,
तेभ्योऽप्यायं बुद्धिरुत्कृष्यते मे ॥ २ ॥

सम्प्रति महामनीषिणो तुः कौटिल्यस्य सन्दर्भपरिशेषे प्रतिभाश्चर्य्य-परिचयमुपसंहरन्नाह अश्वा इति। अश्वाः घोटकाः। आरोहणशकटसमराद्युपयुक्ताः। नागाः कुञ्जरा वारणाः तत्तत्कार्य्ये योग्याः। स्यन्दनानां सङ्घाः। रथ-शकटिवलसमूहाः। मन्त्राः शुद्धाः शुद्धमन्त्राः गूढ़प्रणिधानेन रहस्ये सम्मन्त्रिभिर्विचारिताः। दैवतञ्च दैवम्। अनुकूलं शुभसूचम्। कस्मिन्नपि कार्य्ये दैवविघ्नाभावात् तत्साधने नीतिनिपुणाः।

एतानि राज्ञो नरेन्द्राणां राष्ट्रपालने साधनानि उपायभूतानि प्राहुः मौलुः । यतश्च—

> 'हस्तिघोटकसामन्त नौकादिग्देश साधनैः ।
> राजा भवति लोकेऽस्मिन् न पुनर्वाक्यमात्रतः' ॥ इति ।

तेभ्यः साधनेभ्यो मे मम बुद्धिर्मनीषा । उत्कृष्यते श्रेष्ठा भवतीति । यतो मरोरोपाय बलादिभ्यामन्नत्वं श्रेयः । विज्ञानन्तु पदार्थविमालोचनादिभिः विद्या प्रतिभया चोत्पद्यते । श्लोकोऽयं रविनर्त्तकविरचिते चाणक्यग्रन्थेऽपि दृश्यते । नवनन्दकुलताप-माला-महिष्योर्मनीषि-कौटिल्यस्योक्तिरियम् । नवनन्दभोजन-गृहाद्विर्गत्यानेन महामतिना तेनात्मपरिचयो दत्तः । रविनर्त्त-कस्य चाणक्यकथायामन्यदस्ति । नवनन्दास्तु न्यायान्यायविवेक-हीनाः समुद्धतास्तथा चासन् ॥ २ ॥

> बुद्धिरेव जयत्येका पुंसः सर्व्वार्थसाधनी ।
> यद्बलादेव किं किं न चक्रे चाणक्य-भूसुरः ॥ ३ ॥

परिशिष्टे साधनसामर्थ्योक्तो वात्स्यायनापरनाम्नः चाणक्यस्य बुद्धेः श्रेष्ठत्वमाहानेन । बुद्धिरिति । बुद्धिरेव जयत्येका पुंसः मानवस्य । सर्वार्थसाधनी । सर्व्वं पारमैहिक-पारत्रिककार्य्याणां सम्पादनकारिणी सती एका पठितोया । जयति सर्व्वश्रेष्ठत्वेन वर्त्तते । यद्बलाद् यस्यास्तादृश्या बुद्धेः बलात्प्रभावात् । चाणक्य-भूसुरः चाणक्यनाम्ना विमलमतिः भूदेवः । किं किं कार्य्यं न चक्रे न कृतवान् । अपि सर्व्वमेव राज्यविध्वंसने राष्ट्रसृष्टिम् ।

महासमरम्। विपुलनीतिप्रसारणादिश्चेति। तदुक्तम् अर्थशास्त्रपरिशेषे—

'येन शास्त्रञ्च शस्त्रञ्च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्'॥

हितोपदेशे विग्रहप्रकरणे च—

'नन्दं जघान चाणक्यस्तीक्ष्णदूत-प्रयोगतः।
तद्दूरान्तरितं दूतं पश्येद् वीरसमन्वितः'॥

विष्णुगुप्तः चाणक्यः चणकात्मजः वात्स्यायनः, मल्लनागः, द्रामिलः, अङ्गुलः, पक्षिलस्वामी, कौटिल्यः—इत्येतानि नामानि भोजराजीय नाम मालायाम्, हैमे कोषे, यादवीयवैजन्त्याञ्च उपलभ्यन्ते। श्लोकोऽयं चाणक्यकथायामपि वर्त्तते। कार्यसम्पादने बहिः साधनानि बहूनि। अन्तःसाधनं बुद्धिरेव। सात्वन्यत्रापिचरत।

'मूलसूत्रं प्रवक्ष्यामि चाणक्येन यथोदितम्।
यस्य विज्ञानमात्रेण मूर्खो भवति पण्डितः'॥

'नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
सर्वबीजमिदं शास्त्रं (सूत्रं) चाणक्यं सारसंग्रहम्'॥ इति च

लघुचाणक्यप्रारम्भश्लोकाच्चाणक्यसूत्रमिदं न श्रद्धाभूमिं यातीति। अन्यच्चोक्तमर्थशास्त्रावसाने। 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं भाष्यञ्चेति'। एतदेव सूत्रम्, भाष्यं तदर्थशास्त्रमिति॥ १॥

चाणक्य-माणिक्य-महार्घभूतम्,
न्यायाकराज्जर्ममिदं हितार्थम्।

बालोकृतस्त्वं मतिजाड्यहारकम्,
बुधैः सहृद्भिर्हृदयेषु धार्य्यम् ॥ १ ॥
योऽप्ययुक्तं क्वापि प्रयुक्तं यत्र कुत्रचित् ।
क्षाम्यमिदं भ्रमाज्जातं क्षन्तव्यं सहृदाम्बरैः ॥ २ ॥

शाकेऽम्बरेभगगनागसुधांशुमाने,
पक्षे सुधाकरयुते तिथि-पूर्णिमायाम् ।
कौटिल्यसूत्रनिचये विमला टीकेयम्,
ग्राह्या सुधीन्द्रनिकरैः कृपया सहृद्भिः ॥ ३ ॥

पूर्वबङ्गाब्धि-पूर्वस्मिन् चन्द्रनाथाद्रि-दक्षिणे ।
चट्टग्राम (+) समाख्ये 'द्वारका' विषये मम ॥ ४ ॥
शाण्डिल्यः सामगो विप्रः षड्दर्शनसुसेवकः ।
धीरेशरामशर्म्मस्य ज्योतिःशास्त्रविदोऽङ्गजः ॥ ५ ॥
नीति नौकर्णधारस्य चाणक्यस्य सदाशयैः ।
तत्सूत्रनिकरे चेयं टीका सारार्थबोधिनी ॥ ६ ॥

इति दर्शनभूषणचाणक्यसूत्रव्याख्यायां श्रीईश्वरचन्द्रशर्म्मशास्त्रि-
कृतायां सारार्थबोधिन्यां षष्ठोऽध्यायः ॥ ६ ॥

चाणक्यनीतिसूत्रोक्ताध्यायेषु सूत्राणां संख्याः ।

	सूत्राणि	संख्याः
प्रथमाध्याये	,,	१००,
द्वितीयाध्याये	,,	११६,
तृतीयाध्याये	,,	९८,
चतुर्थाध्याये	,,	१०८,
पञ्चमाध्याये	,,	११३,
षष्ठाध्याये	,,	८३,
		५८८,

—०❀०—

अथ चाणक्य-सूत्राणि।

प्रथमाध्याये—

प्रथमाध्यायः।

—:*:—

द्वितीयाध्याये—

सूत्राणि,	द्वितीयाध्याये	पृष्ठे
७७। क्षीराश्रितमुदकं क्षीरमेव भवति।	...	११९
७८। मृत्पिण्डोऽपि पाटलि गन्धमुत्पादयति।	...	१२०
७९। रजतमपि कनकसम्पर्कात् कनकमेव भवति।		१२१
८०। उपकर्त्तर्य्यपकर्त्तुमिच्छत्यबुधः।	...	१२१
८१। तद्विपरीतो बुधः।	...	१२२
८२। न पापकर्म्मणां संक्रोशभयम्।	...	१२२
८३। उत्साहवतां शत्रवोऽपि वशीभवन्ति।	...	१२३
८४। विक्रमधना राजानः।	...	१२४
८५। नास्त्यलसस्यैहिकामुष्मिकम्।	...	१२४
८६। निरुत्साहो दैवं परिपतति।	...	१२५
८७। मत्स्यवज्जलमुपध्याधे गृह्णीयात्	...	१२५
८८। अविश्वस्तेषु विश्वासो न कर्त्तव्यः।	...	१२६
८९। विषं विषमेव सर्व्वकालम्।		१२६
९०। अथ सामान्येऽरिणा संसर्गो न कर्त्तव्यः।	..	१२७
९१। आस्थादिमिव जीवस्य सम्बन्धः।	...	१२७
९२। अर्थसिद्धौ वैरिणं न विश्वसेत्।	..	१२८
९३। अर्थाधीन एव नियतसम्बन्धः।		१२८
९४। शत्रोरपि सखा सुतो रक्षितव्यः।		१२९
९५। यावच्छत्रोश्छिद्रं पश्यति तावद्धस्तेन स्कन्धेन वा वाह्यः।		१३०
९६। आत्मच्छिद्रं न प्रकाशयेत्।		१३१
९७। शत्रुं छिद्रे प्रहरेत्।	.	१३१
९८। छिद्रे प्रहारिणो हि शत्रवः।	...	१३२
९९। [illegible] विवृणुयात्।	.	

—०—

तृतीयाध्याये—



चतुर्थाध्याये—

पञ्चमाध्याये—

षष्ठाध्यायः।

४३।

	सूत्राणि,	पत्राध्याये,
४०।	नात्मच्छिद्रं प्रकाशयेत्। ...	...
११　४१।	शक्तौ क्षमा श्लाघनीया। ...	...
१　४२।	क्षमावानेव सर्वं साधयति। ...	..
१　४३।	आपत्प्रतीकारार्थं धनमिष्यते।	..
१·　४४।	साहसवता प्रियं कर्त्तव्यम्।	..
४५।	श्वः कार्य्यमद्य कुर्व्वीत। ...	..
४६।	आपराह्णिकं पूर्व्वाह्ण एव कर्त्तव्यम्।	...
४७।	व्यवहारानुलोमो धर्म्मः। ...	...
४८।	सर्व्वज्ञता लोकज्ञता। ...	..
४९।	शास्त्रज्ञोऽप्यलोकज्ञो मूर्खैष्वनन्यः।	..
५०।	शास्त्रप्रयोजनं तत्त्वदर्शनम्। ...	...
५१।	तत्त्वज्ञानं कार्य्यमेव प्रकाशयति।	...
५२।	अपक्षपातेन व्यवहारः कर्त्तव्यः।	...
५३।	धर्म्मादपि व्यवहारो गरीयान्।	...
५४।	आत्मा हि व्यवहारस्य साक्षी।	...
५५।	सर्व्वसाक्षी ह्यात्मा। ..	...
५६।	न च कूटसाक्षी स्यात्। ..	...
५७।	कूटसाक्षिणो नरके पतन्ति।	...
५८।	न कश्चिद्विनाशयति समुद्धरति वा।	
५९।	प्रच्छन्नपापानां साक्षिणो महाभूतानि।	
६०।	आत्मनः पापमात्मैव प्रकाशयति।	
६१।	व्यवहारेऽन्तर्गताकारः सूचयति। ..	
६२।	आकार सम्वरणं देवानामशक्यम्। ..	

विश्वितेषु तदन्येषु मनो वाक्-काय-कर्मभिः।
प्रवृत्तौ वा निवृत्तौ वा एकरूपत्वमार्जवम् ॥ १

मत्ता नागाः स्यन्दनानाञ्च सङ्घाः,
मन्त्राः गूढा दैवतञ्चानुकूलम्।
एतान्याहुः साधनानि स्म राज्ञाम्,
तेभ्योऽप्येयं बुद्धिरभ्यर्च्यते मे ॥ २ ॥

बुद्धिरेव जयत्येका पुंसः सर्व्वार्थसाधनी।
यद्बलादेव किं किं न चक्रे चाणक्य भूसुरः ॥

समाप्तिमितानि चाणक्य-सूत्राणि।

—:—